Shri ShiVoham Sagar Granthamala's Eifth Puspa-

**Shri Vasugupta's**

# SPANDAKARIKA

With Five Commentaries

1. Vritti OF Shri Bhattakallat
2. Vritti OF Shri Ramakanthacharya
3. Spandanirnaya OF Shri Kshemaraj
4. SpandaranJani OF Shri Krishnnand Sagar
5. pandapradipika OF Shri Utpalavacharya (With appendix )

Edited with Introduction

**Sarvadarshanacharya Shri Krishnanand Sagar**

Under direction from

1008 Mahamandaleshvar

**Shri Svami Akhandanand Sagar Maharaj**

श्रीशिवोऽहंसागरग्रन्थमालायाः पञ्चमं पुष्पम्—

महामाहेश्वराचार्यश्रीवसुगुप्तकृता

# स्पन्दकारिका

**पञ्चभिः टीकाभिः समलंकृता**

| | |
|---|---|
| १. वृत्तिः | श्रीभट्टकल्लटस्य |
| २. वृत्तिः | श्रीरामकण्ठाचार्यस्य |
| ३. स्पन्दनिर्णयः | श्रीक्षेमराजस्य |
| ४.स्पन्द रञ्जनी | श्रीकृष्णानन्दसागरस्य |
| ५. स्पन्दप्रदीपिका | श्रीमदुत्पलाचार्य ( परिशिष्टे ) |

सेयं

अनन्तश्रीविभूषित १००८ महामण्डलेश्वर–

**अखण्डानन्दसागरमहाराजानां**

निदेशेन

**सर्वदर्शनाचार्य**

**श्रीकृष्णानन्दसागरेण**

भूमिकया सह सम्पाद्य

प्रकाशिता

Published by :
**Acharya Krishnanand Sagar,**
**Shri Madhavanand Ashram**
P. O.-Dharmaja. Dist.-Keda.
Gujarat.

First Edition 1984

**Price Rs.** Rs 2 50

Copies can be had From
**Shri om Prakash Saraf**
D. 38/135. Bans Phatak
Vasanasi-221 010

Printed by :
**Jyoti Press,**
Madhyameshvar
VARANASI.

# भूमिका

**स्पन्दतत्त्व का स्वरूप—**

भगवान् शङ्करका यह सारा परिदृश्यमान नाम-रूपात्मक विश्व विलास है। 'ईश्वरो बहिरुन्मेषो निमेषोऽन्त: सदाशिवः।' क्योंकि उसके उन्मेष एवं निमेषमात्रसे ही सृष्टि-स्थिति-संहार-तिरोधान-अनुग्रह-रूप पञ्चविध कार्य सम्पन्न हो जाता है। इस विश्ववैचित्र्यके अनेकविध रूपोंमें प्रवहमान स्पन्दतत्त्व ही सारे जडचेतन पदार्थोंके संयोजन एवं वियोजनमें प्रधान कारण माना जाता है और उसी सत्ताको शङ्कर कहते हैं। जो भक्तजनोंका सदा अपने पञ्चविध कृत्योंसे अनुत्तर स्पन्दात्मक भूमिका पर पहुँचानेके रूपमें कल्याण-श्रेय करते हैं इसलिए उसकी शङ्कर या शिव संज्ञा पड़ी है।

वह चिद्रूप स्वभाववाला होनेसे सारे जागतिक पदार्थोंके एक मात्र स्रष्टा है, प्रत्येक क्रियाका सर्वतन्त्र स्वतन्त्र कर्ता है इसलिए अपने और अपनेसे भिन्न नील-पीतादि तथा शून्यादि वस्तुओंमें भी व्याप्त होकर रहते हैं उसका स्वभाव यह है कि वह ज्ञाता और कर्त्ता है और ईश्वरप्रत्यभिज्ञाके अनुसार 'स्वातन्त्र्ये तन्मुख्यम्' स्वातन्त्र्य ही उसकी मुख्य शक्ति है। जो कि उसमें अभिन्नरूपसे रहती है—

**न शिवः शक्तिरहितो न शक्तिः शिवरहिता।**
**उभयोरस्ति तादात्म्यं वह्निदाहकयोरिव॥**

शिव शक्तिके बिना नहीं है और शक्ति शिवके बिना नहीं रहती है जैसे अग्नि और उसकी दाहात्मिका शक्ति दो भिन्न वस्तु नहीं है वैसे ही शिव और उसकी स्वातन्त्र्य शक्ति उससे भिन्न नहीं रहती है।

किञ्चित् चलनात्मक क्रियाका नाम स्पन्द है और वह 'स्पदि किञ्चिच्चलने' इस धातुसे स्पन्द शब्द निष्पन्न होता है इसका स्वरूप तो परिपूर्ण अहं विमर्श है और इसका कोई बाह्य स्थूलरूप नहीं समझा जायेगा। जैसे वृक्ष आदिका कम्पन, भू-स्खलन आदि, अपि तु सूक्ष्म अहं विमर्शात्मक स्फुरण ही इसका मौलिक स्वरूप है जिससे वह एक ही स्पन्दना शक्ति अनेक भाव पदार्थों में स्फुरित होकर विश्वके विचित्ररूपोंमें प्रकाशमान है यह निरन्तर स्फुरणरूपा है और इसका बाह्य जगत्के रूपमें स्वतन्त्र शक्ति प्रसारकी ओर संकल्परूप उन्मुखता है। इसी अभिप्रायसे 'श्रीवसुगुप्त'ने 'स्पन्दकारिका'के प्रथम सूत्रको उन्मेष एवं निमेष शब्दसे द्योतित किया है। तथा सारगर्भित अर्थ यह है कि

विज्ञानात्मक परमतत्त्वकी वह एक मात्र संकल्पात्मक गतिरूपता है और अहं-विमर्श इसका मौलिक स्वरूप है इसलिए इसमें न उन्मेष अर्थात् उदयरूप-सक्रियता ही होगी और न तो निमेष अस्त-परिच्छिन्नरूपता ही आती है। 'स्वात्मन्युच्छलनात्मकः' इस तन्त्रालोकके वाक्यानुसार स्पन्द शक्तिका स्वरूप उच्छनात्मक कहा गया है!

अनुत्तर स्पन्दना शक्तिका स्वरूप किञ्चित् चलनात्मक सिद्ध होता है 'किञ्चिच्चलनमेतावदनन्यस्फुरणं हि तत्'॥ त० ४, १८४। जबकि काश्मीर दर्शनमें किञ्चित् चलनात्मक शब्दका तात्पर्यार्थं स्वतन्त्ररूपमें प्रस्फुरित होना माना गया है। इसलिए संवित् प्रकाश कदापि स्फुरणके बिना नहीं रह सकता है इससे फिर उसकी चेतनरूपता नहीं हो पायेगी। ऐसी स्थितिमें तो फिर समस्त संसारमें जडरूपताके अतिरिक्त अन्य कुछ भी नहीं प्रतीत होगा। वस्तुतः चेतनके आश्रित इसकी जडवस्तुएँ रहती हैं। ईश्वर प्रत्यभिज्ञामें उत्पलाचार्य द्वारा उल्लेख किया गया है कि—

**स्वभावमवभावस्य विमर्शं विदुरन्यथा।**
**प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादि जडोपमः॥** ( १-५-११ )

अवभासरूप प्रकाशका स्वभाव ही प्रत्यवमर्श है। इसको अपने स्वरूप-का परामर्श करनेवाला ही आत्मसात् कर सकता है, अन्यथा अर्थसे उपरक्त रहनेपर भी विमर्शसे रहित संवित्प्रकाश तो मात्र स्फटिकादिकी भाँति अचेतन ही हो जायेगा। स्पन्दना स्फुरणा प्रतिक्षण प्रमाता आदि प्रमेय पदार्थके सहित सतत गतिशील रहती है। अभिनवगुप्तपादने तन्त्रालोकमें 'निरतरङ्गतरङ्गा-दिवृत्तिरेव हि सिन्धुता' यह स्पन्दतत्त्व ही ज्ञान सागरकी लहरें हैं। जो सदैव सतत स्पन्दरूपा होनेके कारण विश्वोत्तीर्णरूपमें विद्यमान पदार्थोंका स्वतन्त्र अहं प्रत्यवमर्शरूपमें विमर्श करती रहती है। प्रत्येक क्रियाको संपादित करनेमें स्पन्दशक्तिका अपना एक स्वतन्त्र स्वरूप देखा जाता है इसलिए वह संसारके दृश्यमान और अदृश्यमान अर्थात् भावपूर्ण अथवा अभावपूर्ण प्रत्येक पदार्थको व्याप्त करके रहती है और उन सबमें उसकी सत्ता 'सूत्रे मणिगणा इव' रहती है। जैसाकि ईश्वरप्रत्यभिज्ञाकी विमर्शिनी व्याख्यामें अभिनवगुप्तपादाचार्यने कहा है कि 'लोकेऽपि विविधवैचित्र्ययोगेऽपि स्वरूपात् अचलन् जनो गम्भीरः स्पन्दवान् उच्यते। सत्ता च भवनकर्तृता सर्वक्रियासु स्वातन्त्र्यम्। सा च खपुष्पादिकमपि व्याप्नोति।' तात्पर्य यह है कि विश्वकी सभी वस्तुओंमें बाह्य अथवा आन्तर इन सभी रूपोंमें यह स्पन्दशक्ति प्रकाशित रहती है और उनसे भिन्नरूपमें भी अवभासमान रहती है।

**बाह्य और आन्तर वस्तुओंमें विमर्शरूपता :—**

जो पदार्थ विमर्शरूपसे अन्तर्जगत्‌में स्थित है उसीका बाह्य जगद्रूपमें अवभासन होता हैं यद्यपि शरीरेन्द्रिय, भुवन, घट-पटादि भेदरूपमें विद्यमान स्वभावोंकी अनेकता देखी जाती है ऐसी स्थितिमें विश्वरूप अनेकत्वका स्वभाव चिद्रूप एक प्रमातामें कैसे हो सकता है ? यह बात नहीं है अपि तु प्रमेयरूप अनेकाकार अहं प्रत्यवमर्श अभेदतया अन्तर्निहित है। स्पन्दात्मक प्रत्यवमर्श दशामें यह सारा कार्यरूप विश्व अभिन्नरूपमें अवस्थित है जिससे इसका बाह्यरूपमें फैलाव होना है इसलिए उस महान् स्पन्दात्मक सत्ताको किसी भी प्रकारका आवरण आच्छादित नहीं कर सकता है। भगवान् परमशिवकी ज्ञानमय शक्तिके विस्तारमें कोई भी प्रतिबन्धक नहीं आता है अपनी इच्छामात्रसे बाह्य जगद्रूपमें पदार्थराशि प्रसृत हो जातो है। ऐसा ही ईश्वरप्रत्यभिज्ञामें कहा गया है—

**तदेवं व्यवहारोऽपि प्रभुर्देहादिमाविशन्।**
**भान्तमेवान्तरर्थौमिच्छया भासयेद्बहिः॥** (१-६-७)

जैसे वटवृक्षके अतीव सूक्ष्म बीजमें बड़ा भारी न्यग्रोध वृक्ष शाखा, पत्ते, फूल एवं फल इत्यादि रूपसे स्थित रहता है। इसी प्रकार चिद्रूपमें स्वाभाविक प्रसारका रस है इसलिये वही अन्तःस्थित कल्पना बाह्य स्थूल अनेकरूपोंमें प्रकट हो जाती है और जो अन्तः स्थित वस्तुएँ हैं वे ही बाह्यरूपमें आती हैं। अतः 'यदन्तस्तद्बहिः' कहा गया है।

सामान्यतया यह व्यवहार जगत्‌में देखा जाता है कि प्रत्येक व्यक्तिके आन्तर प्रत्यवमर्शमें उसके परिचित वस्तु ही प्रत्यवमर्श रूपमें वर्तमान रहती है फिर जिसका जितना ही विमर्श होता है उतना ही वह बाह्यरूपमें पदार्थोंका विस्तार कर देता है। जैसे स्वर्णकार कुण्डल आदि वस्तुओंका निर्माण करता है जबकि यहाँ कुण्डल एक कार्य है जो किसी एक चेतनकर्ता स्वर्णकारकी क्रियाका विषय बना हुआ है और स्वयं कुण्डल आदिमें अचेतनता होनेसे विमर्श शक्तिका सर्वथा अभाव रहता है। इसलिए वह अपने स्वरूपको न जान पाता है और चेतनरूप सत्ता देनेमें समर्थ भी है। किन्तु स्वर्णकार चेतनरूप कर्ता है इसीसे स्वर्णको आकार-प्रकार देकर कुण्डलका स्वरूप प्रदान करता है; जबकि स्वर्ण स्वतः कुण्डलका रूप नहीं धारण कर सकता है और कुण्डलके निर्माणकालमे अन्य वस्तुका आकार-प्रकार भी नहीं बन पाता है; इसलिए कि स्वर्णकारके अन्तर्विमर्शमें कुण्डलके निर्माण करनेके पूर्वमें उसकी

आकृति, परिमाण आदि यथावत् कल्पना बनी रहती है इसीसे स्वर्णकारके अन्तर्जगत्में स्थित बाह्य साकाररूपमें अभिव्यक्त हो जाती है। इस प्रकार दोनों रूपोंमें किञ्चित् भी अन्तर नहीं आता है। यद्यपि बाह्य रूपमें प्रकाशित होनेपर भी यह सारा संसार सर्वथा विनष्ट नहीं होता हैं, किन्तु अन्त: चेतनामें विलीन होकर सदैव विद्यमान रहता है। थोड़ी देरके लिए मान लो कि वह विनष्ट हो जाता है तो स्वर्णकार एक स्वर्णनिर्मित आभूषणको बनानेके पश्चात् दूसरे आकारके आभूषणको नहीं बना पायेगा। इसी प्रकार परम शिव यह इदंरूप संसार अर्थात् परिच्छिन्न प्रमाता, प्रमेय एवं प्रमाणोंसे युक्त कार्यरूप विश्व अनादिकालसे अहंरूप प्रत्यवमर्श एकरूपतामें विद्यमान रहता है उस अहंरूप विमर्शमें जो इदन्ताका विमर्श उदित होता है वही बाह्य जगद्रूप प्रमेयताका विस्तार कहा जाता है। आन्तर प्रत्यवमर्शरूपमें विद्यमान पदार्थ-समूहको भेदमय प्रमेयताका अनेकरूपतामें प्रकाशित करना और उन सबको प्रत्यवमर्शात्मक एकरूपतामें विलय कर देना ही उन्मेष निमेषमय अनुत्तर-स्पन्दतत्त्वका चमत्कार है। ईश्वर प्रत्यभिज्ञामें दिखलाया गया है कि—

वर्तमानावभासानां भावानामवभासनम्।
अन्तःस्थितवतामेव घटते बहिरात्मना॥ (१-५-१)

इसलिए अपने चिद्रूपमें विद्यमान रहते हुए मायाशक्तिके स्वातन्त्र्य द्वारा भाववर्गका भिन्नरूपमें जैसे अवभासन होता है वैसे स्वर्णनिर्मित कुण्डलरूप आभूषणका अवभासन स्वर्णरूप सत्ताके अन्तर्गत ही होता है।

**स्पन्दतत्त्वकी पारमार्थिक सत्ता और उसकी उपादेयता :—**

न दुःख न सुखं यत्र न ग्राह्यो ग्राहको न च।
न चास्ति मूढभावोऽपि तदस्ति परमार्थता॥ (स्प. का. ५)

उस लोकोत्तर स्पन्द भूमिकामें सुख-दुःख, ग्राह्य-ग्राहक, भाव और मूढताकी स्थिति कदापि उत्पन्न नहीं होती है। वस्तुत: कालत्रयसे अबाधित तत्त्व ही परमार्थ-नित्य माना जाता है; जबकि त्रिगुणात्मक चित्त-धर्मकी ही ये सुख-दुःख और मोहरूपा अवस्थाएँ हैं। यदि उस परमतत्त्वमें सुख-दुःख आदि द्वन्द्वोंकी अनुभूति करनेकी सामर्थ्य नहीं है इससे यह नहीं मान लिया जाता है कि वह पाषाणवत् अचेतन ही है। ये सारे अन्त:करणके धर्म उस महान् सत्तासे पृथक् नहीं है; क्योंकि—

तत्तद्रूपतया ज्ञानं बहिरन्तः प्रकाशते।
ज्ञानादृते नार्थसत्ता ज्ञानरूपं ततो जगत्॥

यह संवित्प्रकाशरूपा स्पन्दशक्ति बाह्य और आन्तर रूपमें अवभासमान नील-सुखादि वेद्य वस्तुओंके रूपमें स्वभावतः अवभासमान है और यह प्रत्येक प्राणीको इन नील-सुखादिका अनुभव होता है इसलिए ज्ञानसत्ताके आश्रय ही समस्त वेद्य विषयकी सत्ता देखी जाती है जैसे स्वर्ण है तो कुण्डलकी सत्ता रहती है, उसके अभावमें कुण्डलकी सत्ता नहीं है।

बाह्य जगत्की ये सारी भेद प्रक्रिया अहंप्रत्यवमर्श विशुद्ध चिद्रूपमें उसी प्रकार विद्यमान हैं जैसे सारी सरिता अपने-अपने नामरूपोंको छोड़ कर एक महान् सागरके गर्भमें समाहित हो जाती हैं और उसीके भेदमयताको भूल कर एकाकारताको प्राप्त हो जाती हैं।

जिस स्पन्दतत्त्वके स्पर्शमात्रसे आन्तर शक्तिके साथ-साथ उस इन्द्रिय-वर्गको भी चेतनके समान सृष्टि, स्थिति और संहार करनेका सामर्थ्य प्राप्त हो जाता है। इसलिए वह तत्त्व अन्य अचेतन आदि पदार्थोंकी चेतनतासे युक्त करनेमें सामर्थ्यशाली देखनेपर स्वयं चेतनासे रहित कैसे माना जा सकता है जैसे उसमें चेतनहीन वस्तुओंको चेतनता प्रदान करनेकी स्वतन्त्रता है वैसे ही दूसरे देहेन्द्रिय, बुद्धि, प्राणादिको भी चेतनासे युक्त बना देता है। जैसे लोहमें स्पन्दताका संचार चुम्बक कर देता है; क्योंकि करणवर्गमें स्वतः कोई सामर्थ्य शक्ति नहीं है। स्पन्दात्मक चिद्रूपताका प्रवाह ही इनमें संचारित होकर चेतनासे युक्त कर देता है जिससे वे चेतनवत् संकल्पमात्रसे तत्तत्कार्य करते हैं। प्रत्यक्षतः यह देखनेमें आता है कि ये स्वयं ही सारा कार्य करते हैं किन्तु कार्य करनेकी शक्ति इनसे इतर अनुस्यूत होकर लोहचुम्बकवत् करती है ये तो केवल सब उसके साधन ही हैं यदि इनमें कार्य करनेकी सामर्थ्यशक्ति रहती तो मरणोत्तर भी पूर्ववत् सामर्थ्य बना रहता है। बाह्य और आन्तर कार्यकी रचना करता रहता है इससे पशुप्रमाताओंमें इन्द्रियसमूहको अपने-अपने विषयोन्मुखताकी प्रवृत्तिके साथ-साथ अपने आत्मस्वरूपके उद्गम स्थान जो सहज स्वतन्त्र स्वभाव उसे भी आत्मसात् कर लेता है। इस प्रकार स्वतन्त्रताकी पूर्णावस्था भी उनमें आ जाती है जिससे सर्वथा वह पशु भावसे छुटकारा पा जाता है और शिव स्वरूपमें समाहित हो जाता है।

**ज्ञानकी अवस्थात्रयमें अभिन्नरूपता :—**

यदि आन्तर और बाह्य इन दोनों अवस्थओंमें एक ही स्पन्दरूप विमर्शता व्याप्त रहती है तो उन जाग्रदादि अवस्थाओंमें परस्पर भेद क्यों ? यद्यपि जाग्रत्, स्वप्न और सुषुप्तादि दशाओंमें परस्पर भेदका अनुभव होता है तो, भी

अनुभविताके संविद्रूप स्वरूप पर उन भेद कल्पनाओंके द्वारा कोई भी आवरण नहीं आता है; क्योंकि उन अवस्थाओंमें अनुभवी प्रमाताका स्वरूप साधारण रहता है इसलिए उसके आत्मस्वरूपमें परिवर्तन नहीं होता है। यदि उक्त अवस्थाओंका अनुभविता भिन्न-भिन्न होता तो एक अवस्थाका वेदक प्रमाता अपर अवस्थाके विषयमें सर्वथा अनभिज्ञ ही रहता और न पुनः अनुभविताके अभावदशामें इन सभी अवस्थाओंका स्वरूप ही नहीं बन पाता। अत एव एक ही प्रमाताकी स्वयं अङ्गीकृत ये जाग्रदादि अवस्थाएँ है जो कि इनमें स्थूल दृष्टिसे पारस्परिक स्वरूपगत भिन्नता होती हुई भी अनुभविताकी चिद्रूपताकी उपलब्धृतामें कोई अन्तर नहीं है। जैसे समुद्रसे उठी हुई छोटी-बड़ी तरंगे समुद्ररूप होकर रहती है।

जाग्रदादि अवस्थाओंमें एक ही ज्ञाताकी सत्ता व्याप्त रहती है यह कहा गया है। किन्तु मैं सुखी हूँ, मैं दुःखी हूँ इत्यादि विकल्पात्मक अनुभव दशा अहं-प्रतीतिका विषय होकर अनेकतासे सम्बन्धित हो जाती है तब वह कैसे सबमें एकरूप होकर रहेगी ?

**अहं सुखी च दुःखी च रक्तश्चेत्यादिसंविदः।**
**सुखाद्यवस्थानुस्यूते वर्तन्तेऽन्यत्र ताः स्फुटम् ॥**

श्रीवसुगुप्तके कथनानुसार मैं सुखी हूँ, मैं दुःखी हूँ, मैं अनुरक्त हूँ, ये सभी अन्तःकरणके धर्म और ऐसे ही दूसरे विकल्पज्ञान शरीरादिसे व्यतिरिक्त किसी दूसरे ही अनुभविताकी सत्तासे सम्बन्धित रहते हैं वह स्वतः सभी अवस्थाओंसे भिन्न रहनेपर भा 'सूत्रे मणिगणा इव' अनुस्यूत रहती है। जैसे पहले मैं सुखी था, अब वहीं मैं दुःखी हूँ या अनुरक्त हूँ, इस प्रकार एक ही अनुभविताकी सत्ता सभी अवस्थाओंमें अहं प्रतीतिका विषय बन करके व्याप्त रहती है। यही शिवका स्वतन्त्र स्वभाव है।

**जीवन्मुक्ति :—**

शैवशास्त्रमें जीवन्मुक्ति या विदेहमुक्तिका अर्थ मायीय प्रपञ्चोंसे छूटकारा है। शरीरके विद्यमान रहनेपर शिवतत्त्वकी अनुभूति हो जाना ही जीवन्मुक्ति कही गयी है। 'स्पन्दकारिका' में श्रीवसुगुप्तने उल्लेख किया है कि—

**'इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।**
**सपश्यन् सततं युक्तो जीवन्मुक्तो न संशयः॥'**

अर्थात् जिस योगीके अन्तर्भावमें यह सारा विश्व क्रीडाके रूपमें विद्यमान

है और समस्त प्रमेयको उस रूपमें देखता हुआ वह स्वरूपसे तादात्म्य प्राप्त कर लेता है, अत एव इस विषयमें किसी भी प्रकारका सन्देह नहीं रह जाता है कि वह जीवन्मुक्ति नहीं है।

शरीरसे सम्बन्ध रहनेपर मायीय व्यवहार होता है किन्तु सारा व्यवहार जीवन्मुक्त पुरुषके लिए शास्त्रीयज्ञानपूर्वक होता है इसलिये कर्म करता हुआ भी यह बन्धनसे विमुक्त ही रहता है। यद्यपि कर्म संसार बन्धन का हेतु है, तो भी ज्ञानप्रकाशमें संपादित कर्म बन्धनकारक न होकर मुक्तिका कारण बन जाता है। सर्वकर्मसंन्यासके भावसे किया हुआ कर्म अन्तःकरणकी परिशुद्धि कर देता है और अन्तमें विमुक्तावस्था तक पहुँचा देता है। कर्म साक्षात् मुक्ति नहीं है किन्तु इसको इतना ही माना जाता है जैसे मटमेले वर्षाकालीन जलको स्वच्छ करनेमें फिटकिरीकी उपयोगिता है। गीताके सांख्योगके अनुसार स्थितप्रज्ञ अनासक्तभावसे कर्म करता है वस्तुतः यही जीवन्मुक्ति स्थितप्रज्ञ पुरुष-के लिए है। काश्मीर दर्शनमें जीवन्मुक्तका स्वरूप यह है कि वह समस्त विश्व-के कल्याणके निमित्त कर्म करता है जहाँ सीमितभावनाएँ हैं व ाँ ही आसक्ति एवं बन्धन है, जो कि प्राणीके लिए संसारबन्धनकी श्रृंखला बन जाती है। वह न उसके स्मृतिपटसे छूटती है और न किसी प्रकारसे उससे छूटकारा पाता है, शरीरकी छायावत् सदैव उसके साथ रहती हुई स्मृतिके स्वरूपको दृढ करती रहती है। इसलिये शास्त्रोंमें कहा गया है कि लोहनिर्मित श्रृंखला कालान्तरमें भी विच्छिन्न हो जाती है किन्तु पुत्र, दारा आदिके रूपमें बनी हुई आसक्ति जन्म-जन्मान्तरोंमें भी टूटती नहीं है। उसकी वह आसक्ति दर्पणमें प्रतिबिम्बित चन्द्रमाकी भाँति है, प्रतिबिम्बको परमार्थसत्य मान लिया है; जबकि वह संवृत्तिसत्यमात्र है।

जनक जैसे ज्ञानियोंका कर्म ज्ञानपूर्वक था इसलिये वह कर्म आसक्तिका जनक न होकर मोक्षपथका प्रकाशक बन गया और वह कर्म दुःखका कारण न होकर सुखका हेतु बन गया। कर्म तो ज्ञानी और अज्ञानी दोनोंका एक-सा ही हुआ करता है किन्तु भावमें अन्तर पड़ता है जैसे एक ज्ञानपूर्वक है तो दूसरेका अज्ञानपूर्वक है।

**'ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।**
**लिप्यते न च पापेन पद्मपत्रमिवाम्भसा॥'**

इस गीताके वाक्यानुसार आसक्तिको छोड़ कर सर्वकर्मसंन्यासकी भावना-से जीवन जीता है और कर्म करता है, वह सभी प्राणियोंके हितार्थ ही हुआ

करता है, यही तो जीवन्मुक्त पुरुषके लिए स्वतः आनन्दोद्रेकमें उत्थित स्पन्द है; जबकि एक ही क्रिया इसके लिए स्पन्दात्मक स्वरूप धारण कर लेती है और विश्वके लिए उपकार करनेवाली बन जाती है। अत एव स्पन्दशास्त्रमें यह स्पन्दरूप क्रिया परम शिवका ही स्वरूप है जिसमें रह कर हल-चल पैदा करती है।

**काश्मीर शैवदर्शन और स्पन्दसम्प्रदाय :--**

ऐतिहासिक अन्वेषणके आधारशिला पर काश्मीर शैवशास्त्र अत्यन्त प्राचीन है, फिर लिखित या अलिखितरूपमें इसका साहित्य भले ही आज उपलब्ध न भी हो, किन्तु साधनाकी दृष्टिसे यह अवगत होता है कि इस दर्शनकी परम्परा अत्यधिक प्राचीन है। इससे हम यह भी नहीं कह सकते हैं कि इसका साहित्य लिखित रूपमें रहा ही होगा, किन्तु वह साहित्य आज अनुपलब्ध प्रतीत हो रहा है, यदि यह देखा जाय तो आज बहुत-सा प्राचीन साहित्य देखनेमें नहीं आता है जिसमें किसीका नाम ही अवशेषके रूपमें उपलब्ध है इसलिए कि बहुत-सी वस्तुएँ युगके अन्तरालमें दब जाती है। किन्तु हड़प्पा और मोहनजोड़दो आदिसे प्राप्त अवशेषोंके द्वारा शिवलिङ्ग एवं शिव-सम्बन्धी मूर्तियोंके आधारपर शैवसम्प्रदाय कालकी अवधिमें बाँधा नहीं जा सकता है; क्योंकि भारतवर्षकी पवित्रभूमिमें शिव और उनके गणेश, शक्ति आदि सम्बन्धित देवताओंकी पूजा युग-युगान्तरोंसे चली आ रही है तथा वेदोंमें भी इसकी प्राचीनताका उल्लेख प्राप्त होता है। वेदोंकी ऋचाओंमें शिव एवं तत्सम्बन्धी नाम-रूपाकृतिका उल्लेख मिलता है। इससे सिद्ध होता है कि शैवसम्प्रदाय वैदिककालके समानान्तर है।

कालक्रमसे शैवसम्प्रदायकी परम्परा विच्छिन्न-सी होने लगी यह श्रीसोमानन्दपादकी शिवदृष्टिसे ज्ञात होता है, उस समय भगवान् शङ्करने श्रीदुर्वासामुनिको शैवशास्त्रकी परम्पराको पुनर्जागरित करनेके निमित्त आदेश दिया था और महर्षि दुर्वासाने भगवान् परम शिवकी आज्ञाको शिरोधार्य मान कर शैवदर्शन जनमानसमें फिरसे व्याप्त हो जाय इस अभिप्रायसे मानस-पुत्रोंकी रचना की थी। शैवशास्त्रमें जो त्र्यम्बक, अमर्दक और श्रीनाथ आदिके नाम प्रसिद्ध है 'शिवदृष्टि' नामक प्रसिद्ध ग्रन्थमें गुरूपरम्पराका विवरण देते हुए श्रीसोमानन्दपादने अपनेको त्र्यम्बकादित्यकी बीसवीं पीढ़ीमें प्रदर्शित किया है। अत एव वर्तमानमें उपलब्ध शैवसाहित्य लिखितरूपमें जो हमारे सामने है उसमें श्रीसोमानन्दपादकी 'शिवदृष्टिः' है, युगधर्मकी प्रधानतासे यह लिखित-

रूपमें शैवदर्शनके साहित्यका उद्भवकाल रहा है। इसके अनन्तर इस परम्पराने एक विशालरूप धारण किया और आज शैवदर्शनके अनेक उज्जवल ग्रन्थरत्न उपलब्ध होते हैं। इन्हीं ग्रन्थोंमें एक यह प्रस्तुत ग्रन्थ भी अपना अद्वितीय ही स्थान रखता है और यह स्पन्दसम्प्रदायका सर्वप्रथम सैद्धान्तिक ग्रन्थ है इसीसे स्पन्दसम्प्रदायकी धारा प्रस्फुट हुई है। यद्यपि स्पन्दशास्त्रमें गुरुजनोंने सैद्धान्तिक विचार-विमर्शका अत्यधिक विवेचन किया है, किन्तु इसके स्वाध्यायसे यह भी ज्ञात होता है कि इसमें आध्यात्मिक साधनाका उच्च दृष्टिकोण रहा है जिससे कि साधक अविलम्ब ही स्वस्वरूपकी प्राप्ति कर सके।

**आगमकाल :—**

काश्मीर शैवशास्त्रका उद्गमस्थान शैवागम है, वेदोंकी भाँति इस शास्त्रका भी मूलस्रोत शैवधर्मी प्राचीनकालसे मानते चले आ रहे हैं, इसलिए कि स्वयं भगवान् परमशिव द्वारा इसका निर्माण हुआ था। यद्यपि इसका आविर्भाव और तिरोभाव कालक्रमसे हुआ भी है तो भी इसकी साधना-सम्बन्धी परम्परा गंगाकी धारावत् मन्द-तीव्रके रूपमें अक्षुण्य ही रही है।

शैवागमके प्रधान ग्रन्थरत्न विज्ञानभैरव, उच्छुष्मभैरव, आनन्दभैरव, मालिनीविजयोत्तरतन्त्र, स्वच्छन्दतन्त्र, नेत्रतन्त्र, स्वायम्भुवतन्त्र, रुद्रयामल-तन्त्र, मृगेन्द्रतन्त्र, तन्त्रालोक आदि आगमिक परम्पराके अन्तर्गत गिने जाते हैं। आगमिक परम्परामें दार्शनिक परम्परा मुख्यरूपसे प्रारम्भ महामहेश्वर्याचार्य श्रीवसुगुप्त द्वारा हुई है। जिसमें दार्शनिक सिद्धान्तोंकी पृष्ठभूमि परिपक्व हुई है और शैवसिद्धान्तोंको प्रतिष्ठापित कर एक सुव्यवस्थित सूत्रोंमें गूँथा है। शिवसूत्र विमर्शिनीके प्रणेता श्रीक्षेमराजने 'स्पन्दकारिका'के पर स्पन्दनिर्णयकी व्याख्याकी परिसमाप्तिमें यह कहा है कि—

**'लब्ध्वाप्येतज्ज्ञानधनं हृद्गुहान्तकृतनिहितेः।**
**वसुगुप्तवच्छिवाय हि भवति सदा सर्वलोकस्य॥**

अर्थात् भगवान् परमशिवने श्रीवसुगुप्तको स्वप्नमें शिवसूत्रोंकी प्राप्ति और तद्विषयक यथार्थ अवबोध करा दिया था। इस स्पन्दशास्त्रका आधार-स्तम्भ शिवसूत्रोंको ही माना जाता है। जैसे व्याकरणशास्त्रमें पाणिनीय मुनिको प्राप्त चतुर्दशसूत्र भगवान् शिवका प्रसाद समझा जाता है।

शिवसूत्रके पर अनेक आचार्योंकी व्याख्याएँ उपलब्ध होती है। श्रीवसुगुप्त द्वारा विरचित यह 'स्पन्दकारिका' इस दर्शनशास्त्रका एक अद्वितीय

उज्जलग्रन्थरत्न है। इनका समय ८२५ से ८५० तक माना जाता है। इन्होंने अपने कालावधिमें अनेकों कृतियाँका निर्माण किया है। स्पन्दामृत, भगवद्गीता पर वासवी व्याख्या, सिद्धान्तचन्द्रिका आदि ग्रन्थोंका उल्लेख मिलता है।

**स्पन्दवृत्ति :—**

श्रीवसुगुप्तके पश्चात् उनके शिष्यके रूपमें श्रीभट्टकल्लटका नाम प्रसिद्ध है। श्रीवसुगुप्त द्वारा विरचित इस 'स्पन्दकारिका' पर एक 'विलक्षण वृत्ति'का निर्माण कर मुमुक्षुजनोंके मोक्षमार्गको अत्यधिक प्रशस्त किया है और इससे साधनाक्षेत्रमें एवं दार्शनिकक्षेत्रमें प्रगति प्राप्त हुई है। श्रीकल्हणने 'राजतरङ्गिणी'में श्रीभट्टकल्लटको सिद्धोंकी श्रेणीमें उल्लेख किया है जैसे—

'अनुग्रहाय लोकानां भट्टश्रीकल्लटादयः।
अवन्तिवर्मनः काले सिद्धा भुवमवतारन्॥'

काश्मीरके प्रसिद्ध अवन्तिवर्माके प्रशासनकालमें प्राणियोंके पर अनुग्रह करनेके लिए इनका अवतार हुआ था। श्रीवसुगुप्त और श्रीभट्टकल्लट समकालीन थे, यह बात श्री क्षेमराजने 'स्पन्दनिर्णय'के उपोद्घातमें प्रदर्शितकी है कि ये दोनों परस्पर गुरु एवं शिष्य थे। श्री उत्पल वैष्णवने 'स्पन्दप्रदीपिका' नामक व्याख्यामें यह कहा है कि श्रीभट्टकल्लटको तत्त्वदर्शी श्रीवसुगुप्त द्वारा शिवतत्त्वका गूढरहस्य प्राप्त हुआ था। जैसा कि—

वसुगुप्तादवाप्येदं गुरोस्तत्त्वार्थदर्शिनः।
रहस्यं श्लोकयामास सम्यक् श्रीभट्टकल्लः॥

इनकी प्रधान कृतियाँ स्पन्दसर्वस्व, तत्त्वार्थचिन्तामणि, स्पन्दसूत्र और मधुवाहिनी आदि हैं।

**स्पन्दविवृतिः—**

स्पन्दशास्त्रकी परम्परामें श्रीवसुगुप्तके अतिरिक्त किसी अन्यकी मौलिक कृति उपलब्ध नहीं होती है। जैसे कि प्रत्यभिज्ञाशास्त्रमें मौलिक कृतियाँ प्राप्त होती हैं। श्री उत्पलदेव, श्री अभिनवगुप्तपाद आदि लोगोंने प्रत्यभिज्ञादर्शनमें ग्रन्थोंकी रचना कर काश्मीरदर्शनका विस्तार किया है जबकि मौलिक स्पन्दसूत्रोंकेपर आचार्योंके द्वारा अनेक वृत्तियाँ लिखी गयी है किन्तु इनमेंसे कुछ ही उपलब्ध है अन्यका तो केवल विवरण ही मिलता है। 'स्पन्दकारिका' पर 'श्रीरामकण्ठाचार्य' द्वारा विरचित विस्तृत व्याख्या प्रस्तुत ग्रन्थमें विद्यमान है। इसकी रचना श्रीभट्टकल्लटके पश्चात् ही हुई है; क्योंकि अनेक प्रसङ्गोंमें 'स्पन्दवृत्तिः' पूर्णरूपसे तात्पर्यार्थको भलीभाँति स्पष्ट करती है और साथमें

मूलसूत्रोंके साथ ही साथ स्पन्दवृत्तिके गूढार्थको भी पाठकके अभिमुख अभिव्यक्त कर देती है जिससे सब कोई स्पन्द शास्त्रकी प्रक्रियाको हृदयङ्गम कर सकें।

ये श्री उत्पलदेवके शिष्य और अवन्तिवर्मके समकालीन मुक्ताकणके अनुज रहें। इनकी भगवद्गीता और मातङ्गतन्त्र पर व्याख्याएँ हैं।

**स्पन्दनिर्णय :—**

यह स्पन्दनिर्णय प्रस्तुत ग्रन्थरत्नके पर श्रीक्षेमराजकी एक श्रेष्ठकृति है। इनकी 'स्पन्दसन्दोह' व्याख्या एक सूत्र पर लिखी हुई है किन्तु सारे सूत्रोंका सारगर्भित गूढार्थ इसके अन्तर्गत आ जाता है। इसके अतिरिक्त इनकी शैवशास्त्र-सम्बन्धी कई महत्त्वपूर्ण व्याख्याएँ उपलब्ध होती हैं। जैसे—शिवसूत्रविमर्शिनी, स्तवचिन्तामणिविवृत्तिः, विज्ञानभैरव उद्योत, नेत्रतन्त्र-उद्योत, शिवस्तोत्रावली टीका, स्वच्छन्दतन्त्र-उद्योत, साम्बपञ्चाशिका आदि टीकाएँ हैं।

**स्पन्दप्रदीपिका :—**

यह उत्पलाचार्य वैष्णवकी इस ग्रन्थके ऊपर पर एक महत्त्वपूर्ण व्याख्या है। इसमें बहुत-से तान्त्रिक ग्रन्थोंके उद्धरण मिलते हैं जो संस्कृतवाङ्मयमें उपलब्ध भी हैं। श्री उत्पलदेवाचार्यसे भिन्न ही ये अन्य शैवाचार्य हैं।

स्पन्दसूत्रोंके पर उपलब्ध बहुत-सी व्याख्याओंका समीक्षात्मक स्वाध्याय करनेसे यही बात समझमें आती है कि इन व्याख्याकारोंकी भिन्न-भिन्न शैली द्वारा साधकके प्रति स्पन्दसिद्धान्तोंको समझाना ही एकमात्र लक्ष्य रहा है। इन सभीका सिद्धान्त और दृष्टिकोण तो साधकजनोंको आध्यात्मिक स्पन्द-भूमिका पर पहुँचाना ही सिद्ध होता है।

**स्पन्दरञ्जनी**

मैंने 'स्पन्दरञ्जनी'का प्रणयन 'स्वान्तः सुखाय' ही किया है जिससे अपना मानस उस लोकोत्तर स्पन्दतत्त्वमें समाहित रहे। यह एक लघुकार्य एक महान् व्यक्तिके प्रति समर्पित भावनाका प्रतीक है, जिससे मैं इसको एक छोटा-सा रूप दे सका।

कृष्णानन्दसागर

महामाहेश्वराचार्यश्रीमद्वसुगुप्तकृता

# स्पन्दकारिका

टीकाचतुष्टयोपेता

## प्रथमो निष्यन्दः

यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शंकरं स्तुमः ।। १ ।।

### श्रीभट्टकल्लटविरचितवृत्तिः

अनेन स्वस्वभावस्यैव शिवात्मकस्य संकल्पमात्रेण जगदुत्पत्ति-संहारयोः कारणत्वं, विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्यस्योत्पत्ति-हेतुत्वं, नमस्कारद्वारेण प्रतिपाद्यते ।। १ ।।

### श्रीरामकण्ठाचार्यविरचितवृत्तिः

दशादिक्कालाद्यैरकलितचिदालोकवपुषः
सदा तादृक्स्वात्मानुभवितृतया विस्फुरति यः ।

### श्रीक्षेमराजविरचितस्पन्दनिर्णयः

सर्वं स्वात्मस्वरूपं मकुरनगरवत्स्वस्वरूपात्स्वतन्त्र-
स्वच्छस्वात्मस्वभित्तौ कलयति धरणीतः शिवान्तं सदा या ।

### श्रीकृष्णानन्दसागरविरचितस्पन्दरञ्जनी

नमोऽद्वैतस्वरूपाय पञ्चकृत्यविधायिने ।
यस्य संवित्प्रकाशेन क्रियते स्पन्दरञ्जनी ॥ १ ॥

निजो धर्मः शम्भोरनुपमचमत्कारसरसः
परं शाक्तं तत्त्वं जगति जयति स्पन्द इति तत् ॥ १ ॥
तज्ज्ञैरदर्शितदिशः स्वयमाविशन्तः
केचिन्निसर्गगहनं विषमं भ्रमन्तु ।
तेनैव यत्पुनरमी हतवर्त्मनान्यान्
आकारयन्ति गमनाय महान्भ्रमोऽयम् ॥ २ ॥
नानावादानिलौघानवसरकृतान्योन्यसंघट्टघोरो-
द्घातानापादयद्भिः श्रवणविदलनोद्दामशब्दप्रबन्धान् ।
शस्त्राब्धिः क्षोभ्यते यैर्विवरणरभसादुद्यदावर्तभीम-
भ्रान्तिभ्रष्टागमार्थप्लवविधुरमतिस्तारितोऽर्थो जनस्तैः ॥३॥

दृग्देवी मन्त्रवीर्यं सततसमुदिता शब्दराश्यात्मपूर्णा-
हन्तानन्तस्फुरत्ता जयति जगति सा शाङ्करी स्पन्दशक्तिः ॥१॥
स्पन्दामृते चर्वितेऽपि स्पन्दसंदोहतो मनाक् ।
पूर्णास्तच्चर्वणाभोगोद्योग एष मयाश्रितः ॥ २ ॥
सम्यक्सूत्रसमन्वयं परिगतिं तत्त्वे परस्मिन्परां
तीक्ष्णां युक्तिकथामुपायघटनां स्पष्टार्थसद्व्याकृतिम् ।
ज्ञातुं वाञ्छथ चेच्छिवोपनिषदं श्रीस्पन्दशास्त्रस्य त-
द्वृत्तावत्र धियं निधत्त सुधियः स्पन्दश्रियं प्राप्नुत ॥ ३ ॥

इह हि विश्वानुजिघृक्षापरपरमशिवावेशोन्मीलितमहिमा स्वप्नोपलब्धोपदेशः श्रीमान्वसुगुप्ताचार्यो महादेवपर्वताद्भगवदिच्छयैव महाशिलातलोल्लिखितान्यतिरहस्यानि शिवसूत्राण्यासाद्य प्रसन्नगम्भीरैरेकपञ्चाशता श्लोकैरागमानुभवोपपत्त्यैकीकारं प्रदर्शयन्संगृहीतवान् । तत्र १ पञ्चविंशत्या स्वरूपस्पन्दः; २ सप्तभिः सहजविद्योदयस्पन्दः, ३ एकोनविंशत्या विभूतिस्पन्द उक्तः,–इति त्रिनिःष्यन्दमिदं स्पन्दशास्त्रम् । तत्र प्रथमनिःष्यन्देऽस्मिन् स्तुतिपूर्वं प्रकरणार्थः श्लोकेनोपक्षिप्तः । ततश्चतुर्भिः श्लोकैः सोपपत्तिकं स्पन्दतत्त्वं व्यवस्थापितम् । ततः श्लोकाभ्यां साभिज्ञानं तत्प्राप्तावुपाय उक्तः । श्लोकेनोपायविप्रतिपत्तिर्निरस्ता । श्लोकेनोपाय एवोपेयप्राप्त्यानुरूप्यकथनेनोपोद्बलितः । तत् एकेन तदुपायलभ्यं यादृगुपेयस्य स्वरूपं तदुपद-

प्रारब्धुमिष्टस्य ग्रन्थस्य निर्विघ्नपूर्वकपरिसमाप्तये स्वेष्टदेवतां ग्रन्थकारःस्तौति— यस्येति । भगवतः परमशिवस्य सङ्कल्परूपा इच्छाशक्तिमात्रेण दृश्यमानस्थावर-

कश्चिद्भिन्नरुचिर्विदन्नपि परं तत्त्वं विपर्यस्यति
द्वैषध्वान्तविरुद्धबुद्धिरितरो जात्यैव चान्यो जडः।
इत्थं दुर्लभ एव सर्वहृदयग्राही गिरां संग्रहः
किन्त्वेतेऽद्य विवेकिनः कतिपये सन्त्यत्र पात्रं सताम् ॥४॥
केनापि ग्रथितां प्रसारणधिया कैश्चिद्द्विसूत्रीकृता
मेकीकृत्य यथागमं विरचितां स्पन्दार्थसूत्रावलीम्।
ईशानुग्रहशक्तिवज्रशिखया विद्धेषु विद्वन्मनो-
माणिक्येषु निवेशयाम्यहमिमां कर्तुं कृतार्थां द्वयोम् ॥५॥

'तं शंकरं'–श्रेयसः कर्तारं 'स्तुमः'–प्रशंसामः। तं कं, 'यस्य उन्मेष-निमेषाभ्यां'–शक्तिप्रसरप्रलयाभ्यां 'जगतो'–विश्वस्य 'प्रलयोदयौ'–विनाश-

शितम्। ततस्तदवष्टम्भात्संसाराभावः श्लोकेनोक्तः। द्वयेनाभाववादिमतं व्युदस्यता तद्वैलक्षण्यं स्पन्दतत्त्वस्योक्तम्। श्लोकेन तदुल्लासितस्य कार्यस्य क्षयित्वेऽपि तदक्षयमित्याख्यातम्। एतदेव श्लोकाभ्यामुपपाद्याभाववाद एवोन्मूलितः। तत एकेन सुप्रबुद्धस्य सदैवैतत्प्राप्तिः, प्रबुद्धस्य तु पूर्वापर-कोट्योरित्यावेदितम्। एकेन सुप्रबुद्धस्य प्रतीतेर्विषयविभाग उक्तः। ततोऽन्येन सुप्रबुद्धस्यावरणाभावे युक्तिरुपक्षिप्ता। श्लोकेनाप्रबुद्धस्य स्थगित-स्वरूपतोक्ता। तत एकेन सुप्रबुद्धतालाभाय सततमुद्यन्तव्यमित्युक्तम्। श्लोकेन व्यवहारावस्था एव काश्चित्तदितरसकलवृत्तिक्षयरूपा उद्योगस्य विषय इत्यावेदितम्। ततोऽपि प्राप्तप्रबोधेन सुप्रबुद्धतायै योग्युचितसौषुप्त-तमोवरणविदलने प्रजागरितव्यमित्युक्तं श्लोकत्रयेण,—इति 'यस्योन्मेष' इत्यादेः 'प्रबुद्धः स्यादनावृत' इत्यन्तस्य तात्पर्यम्। अथ ग्रन्थार्थो व्याख्यायते—

'शम्' उपशान्ताशेषोपतापपरमानन्दाद्वयमयस्वचैतन्यस्फारप्रत्यभिज्ञापनस्वरूपमनुग्रहं करोति यस्तमिमं स्वस्वभावं शंकरं स्तुमस्तं विश्वो-

जङ्गमात्मकमिदं विश्वम् आविर्भवति। पुनः तत्र स्थितम् एवं लीनमपि तत्रैव जायते। परिदृश्यमानो हि समस्तसंसारप्रसारः शिवस्य स्वतन्त्रशक्तेरेव। अयमेव तस्य अनन्याधीन-स्वभावः, यदभिन्ननिमित्तोपादनरूपेण सृष्टिरूपं कार्यं रचयति। यथोक्तं 'स्तवचिन्तामणौ' 'निरुपादानसंभारमभित्तावेव तन्वते। जगच्चित्रं नमस्तस्मै कलाश्लाघ्याय शूलिने' ॥ १ ॥

प्रादुर्भावौ। अत्र यथासंख्यं न विवक्षितमिति वक्ष्यामः। तं कीदृशं 'शक्तिचक्रविभवप्रभवं'–शक्तीनां वक्ष्यमाणस्वरूपाणां 'चक्रं'–समूहः, स एव 'विभव'–ऐश्वर्यं, तस्य 'प्रभवं'–कारणम्,–इति पदसंबन्धयोजना तावत् सुबोधा। वस्तुसंगतिस्तु कथं?–इति विचार्यम्। शंकरस्तावत् नित्यम् अव्यभिचरदेकस्वभाव एक एव पदार्थः परमार्थसन्'–इति प्रकरणस्य अस्य तात्पर्यं तथानिर्वाहात्; तस्य परस्परविरुद्धौ अनित्यौ निमेषोन्मेषात्मकौ अवस्थाविशेषौ संबन्धित्वेन कथं प्रतिपादितौ? कर्तृप्रथया हि अनया एवं प्रतिपाद्यते–शंकर उन्मिषति निमिषति इति। एवं च अनित्यावस्थायोगित्वं नित्ये भगवति अनुपपन्नम्, तत् कथमुक्तं 'यस्योन्मेषनिमेषाभ्याम्' इति?

अत्रोच्यते। उन्मेष-निमेषशब्दाभ्यां तदुपचरितवृत्तिभ्याम् इच्छामात्रमेकं शंकरसंबन्धि प्रतिपाद्यते; स च तस्य नित्यो धर्मः स्वभावभूतः; तस्य उन्मेष-निमेषशब्दवाच्यत्वं द्वित्वं च उपचारात्; यतो जगत एव परमेश्वरमायाशक्त्युद्भावितकार्यरूपत्वात् अनित्यस्य प्रलयोदयसंभवे सति,

त्कर्षित्वेन परामृशन्तस्तत्क्लृप्तकल्पितप्रमातृपदनिमज्जनेन समाविशामः, तत्समावेश एव हि जीवन्मुक्तिफल इह प्रकरण उपदेश्यः। बहुवचनमनुग्रहदृष्टिकटाक्षिताशेषानुग्राह्याभेदप्रथनाय। तमित्यनेन यदस्य निःसामान्यत्वमपि ध्वनितं तत्प्रथयति यस्येत्यर्धेन। इह परमेश्वरः प्रकाशात्मा महादेवः शब्दराशिपरमार्थपूर्णाहन्तापरामर्शसारत्वात् सदैवानन्दघनस्फुरत्तात्मकोभयविसर्गारणिपराशक्त्यात्मकपूर्णस्वातन्त्र्यस्वरूपस्तत एव चित्स्वाभाव्यादचलस्यापि श्रीभगवतः स्वातन्त्र्यशक्तिरविभक्ताप्यशेषसर्गसंहारादिपरम्परां दर्पणनगरवत्स्वभित्तावेव भावियुक्त्यानधिकामप्यधिकामिव दर्शयन्ती किंचिच्चलत्तात्मकधात्वर्थानुगमात्स्पन्द इत्यभिहिता, तेन भगवान्सदा स्पन्दतत्त्वसतत्त्वो न त्वस्पन्दः, यदाहुः केचित् 'अस्पन्दं परं तत्त्वम्' इति। एवं हि शान्तस्वरूपत्वादनीश्वरमेवैतद्भवेत्। स्फुरत्तासारस्पन्दशक्तिमयशंकरात्मकस्वस्वभावप्रतिपादनायैव चेदं शास्त्रं समुचितस्पन्दाभिधानं महागुरुभि-

अस्य विमर्शात्मिका स्पन्दशक्तिः नामरूपात्मकसमस्तप्रपञ्चस्य उपरि वर्तते, सैव शुद्धज्ञानप्रधाना सती प्रकाशरूपत्वं तथा क्रियाप्राधान्येन विश्वरूपत्वं प्रतिपद्यते। तत्र भवती मयुराण्डे स्थितद्रवरूपपदार्थरूपेण आगामिशावकरूपस्य विचित्राश्चर्यजनकविभिन्नरङ्गखचितपक्षयोः कल्पना इव अहंप्रत्यवमर्शे अभेदात्मना स्थिता भवति। यद्यपि इयम्

निमेषोन्मेषौ वस्तुतः संभवतः। तौ च ईश्वरेच्छामात्रनिमित्तकौ;-इति उदयात्मकोन्मेषहेतुत्वात् ईश्वरेच्छैव उन्मेषशब्देन, प्रलयात्मकनिमेषहेतुत्वात् निमेषशब्देन च उपचर्यते। यथा आयुष्कारणत्वात् आयुःशब्देन घृतम्। सा च अव्यतिरिक्ता शंकरस्य शक्तिः; तदवगम एव च आत्मैश्वर्यप्रत्यभिज्ञालक्षणसिद्धेर्हेतुः। सा च 'दिदृक्षयेव सर्वार्थान्' ( ३ नि० ११ का० ) इत्यत्र वक्ष्यमाणन्यायेन सांसारिकपुरुषप्रसिद्धेच्छासादृश्यात्। तदवगमोपायतया इच्छाशब्देन व्यपदिश्यते। यथा हि पुरुषस्य इच्छावस्थायाम् इष्यमाणः पदार्थः स्वरूपाव्यतिरेकेणैव अवतिष्ठते, तथा भगवतः शक्तौ अनन्तावभासविशेषचित्रं जगत् मनागपि अनुपजातविशेषात् स्वरूपात् अव्यतिरेकेणैव अवतिष्ठते। सेयं परमार्थसती शिवदशा, या एवं तद्विद्वद्भिः स्तूयते--

'सदा सृष्टिविनोदाय सदा स्थितिसुखासिने।
सदा त्रिभुवनाहारतृप्ताय स्वामिने नमः॥'

इति। ईश्वरप्रत्यभिज्ञायाम्--

'या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः॥'

इति। इत्थम् एकस्या एव पारमेश्वर्याः शक्तेः इच्छा-ज्ञान-क्रियाव्यपदेशः इदन्तोन्मिषन्मायाशक्तिजनित एव; यतः शिवदशामेकां मुक्त्वा मायाशक्तिः

र्निबद्धम्। एतच्च व्यक्तीभविष्यति। सा चैषा स्पन्दशक्तिर्गर्भीकृतानन्तसर्गसंहारैकघनाहन्ताचमत्कारानन्दरूपा निःशेषशुद्धाशुद्धरूपामातृमेयसंकोचविकासाभासनसतत्त्वा सर्वोपनिषदुपास्या युगपदेवोन्मेषनिमेषमयी। तथा हि-शिवादेः क्षित्यन्तस्याशेषस्य तत्त्वग्रामस्य प्राक्सृष्टस्य संहर्तृरूपा या निमेषभूरसावेवोद्भविष्यद्दशापेक्षया स्रष्टृरूपोन्मेषभूमिस्तथा विश्वनिमेषभूश्चिद्घनतोन्मेषसारा चिद्घनतानिमज्जनभूमिरपि विश्वोन्मेषरूपा। यदागमः-

'लेलिहाना सदा देवी सदा पूर्णा च भासते।
ऊर्मिरेषा विबोधाब्धेः शक्तिरिच्छात्मिका प्रभोः॥'

इति। श्रीमान्महेश्वरो हि स्वातन्त्र्यशक्त्या शिवमन्त्रमहेश्वरमन्त्रेश्वरमन्त्रविज्ञानाकलप्रलयाकलसकलान्तां प्रमातृभूमिकां तद्वेद्यभूमिकां च गृह्णानः पूर्वपूर्वरूपतां भित्तिभूततया स्थितामप्यन्तःस्वरूपावच्छादनक्रीडया निमेषय-

एकाऽपि प्रसारभूमिकायामनन्तधारारूपेण विभक्ता सती प्रवहति। तथा इच्छाज्ञानक्रियाशक्तिरूपेण अविरतं प्रस्फुरति। समस्तप्रमातृवर्गेषु इच्छाद्यात्मकस्पन्दरूपस्य प्रतिक्षणं

सर्वत्र कृतपदा, यद्वशात् एकस्मिन् शिवतत्त्वे परमार्थसति सदाशिवादितत्त्वान्तरव्यपदेशः प्रक्रियाशास्त्रेषु । एतच्च पुरस्तात् 'परामृतरसापाय;' ( ३ नि० १४ का० ) इत्यादिश्लोकव्याख्यानावसरे प्रतिपादयिष्यते । सा एवंलक्षणा पारमेश्वरी शक्तिः स्वलीलोल्लासितस्य जगतोऽवस्थाद्वयहेतुत्वात् द्वित्वेनापि च उपचरिता । तेन इदमत्र प्रथमश्लोकपूर्वार्धे तात्पर्यम्,– यस्य इच्छामात्रेण जगतः प्रलयोदयौ तं स्तुमः । तच्च यथासंख्यम् अत्र मुख्यया वृत्त्या नापेक्षणीयम् उन्मेषेण उदयो, निमेषेण प्रलयः,–इति तु अर्थसंख्या समवैति । एतच्च इच्छामात्रम् उन्मेषनिमेषौ – इत्येतावत्तात्पर्यं प्रतिपादयितुं, स्वयं वृत्तिकृता भट्टकल्लटेन व्याख्यातम्––

'सङ्कल्पमात्रेण ········ ·····················'

इति । ये तु यथासंख्यसमर्थनानुरोधात्, यस्य उन्मेषे क्रियाशक्तिप्रतिसंहारात् स्वरूपविकासे जगतः प्रलयो विनाशः, निमेषे प्रसृतक्रियाशक्तित्वात् स्वरूपसंकोचरूपे जगतः उदय उद्भवः, इति व्याचक्षाणाः, शंकरस्यैव पारमार्थिकौ उन्मेषनिमेषौ धर्मत्वेन प्रतिपादयन्ति, ते च काल्पनिकमेव अर्थं परमार्थत्वेन प्रतिपद्यमानाः, तथा दर्शनस्य अस्य अन्तरं ननु प्रविष्टाः?–इति नमस्तेभ्यः ।

न्नेवोन्मेषयति उत्तरोत्तररूपतामव रोहक्रमेण, आरोहक्रमेण तूत्तरोत्तररूपतां निमेषयन्नेव ज्ञानयोगिनामुन्मेषयति पूर्वपूर्वरूपतामत एवोत्तरमुत्तरं पूर्वत्र पूर्वत्र संकोचात्मतां जहद्विकसितत्वेनासावाभासयति, पूर्वं पूर्वं तु रूपं यथोत्तरं विकसिततां निमज्जयन् संकुचितत्वेन दर्शयति । एवं च सर्वं सर्वमयमेव प्रथयति, केवलं तदवभासितसंकोचमात्रत इयं भेदप्रतिपत्तिरिव यदुद्दलनायेहृत्य उपदेश इत्यास्तां तावदेतत् । नीलसुखाद्याभासोन्मेषमय्यपि च संवित् प्रमात्रेकात्मकतत्स्वरूपनिमेषरूपावभातचरपीताद्याभासोपसंहाररूपा चेति स्वसंवेदनसिद्धामिमां युगपदेवोन्मेषनिमेषोभयरूपां प्रतिभां भगवतीं विचिन्वन्तु महाधियः संसारविच्छेदाय । अत एवोन्मेषनिमेषाभ्यामित्येतत्पदं निजवृत्तौ भट्टश्रीकल्लटेन 'संकल्पमात्रेण' इत्यविभक्तमेवेच्छाशक्तिरूपतया व्याख्यायि । संग्रहकृतापि—

'एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः ।
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥' ( ३/९ )

कार्यनिष्ठा विराजते । प्राणी यद्वस्तु वाञ्छति तत्तदन्तः प्रथमत एव विद्यते । अनन्तरं ज्ञानशक्त्या तदभिसंधाय क्रियया कार्यरूपेण तत्परिणमते । अनया रीत्या परमेश्वरेऽपि

ननु नित्याव्यभिचरदेकस्वभावस्य भगवतः शक्तिरपि तादृगेव प्रतिपादिता, तयोरभेदाभ्युपगमात्। तत् कथं व्याख्यातं शक्तीनां चक्रमिति? अत्र ब्रूमः। ननु इदमेव तत् निरतिशयम् ऐश्वर्यम् ईश्वरस्य इह विवक्षितं, यत् सर्वत्र 'अहम्'-इति स्वरूपपरामर्शमात्राव्यभिचारेऽपि निरवधिविजृम्भमाणविचित्रावभासखचितं त्रैलोक्यालेख्यम् इदम् उल्लिखति; इत्थम् उल्लिख्यमानमपि एतत् परमार्थतः परामृश्यमानं तत्स्वभावात् मनागपि च यत् न भिद्यते। यथोक्तम्—

'परमेश्वरता जयत्यपूर्वा
तव सर्वेश यदीशितव्यशून्या।
अपरापि तथैव ते ययेदं
जगदाभाति यथा तथा न भाति॥'

इति। अन्यत्रापि

'लिखते जगत्त्रितयचित्रमद्भुत-
प्रतिभापरिस्फुरितशंसि ते नमः।
सुसितैकसूक्ष्मनिजशक्तिवर्तिका-
रचितावभासशतशोभि शंभवे॥'

इत्यत्र प्रारब्धचिन्तासंहरणमेव परस्वरूपोदयहेतुरुन्मेष इत्यभिधास्यते प्रवृत्तचिन्तासंहारं विना परस्वरूपोदयाभावात्। एतच्च तत्रैव वितनिष्यामः।

परामृतरसापायस्तस्य यः प्रत्ययोद्भवः।
तेनास्वतन्त्रतामेति स च तन्मात्रगोचरः॥' (३।१४)

इत्यत्राप्युदयः प्रलयपरमार्थ इति स्पष्टमेव वक्ष्यते।

'यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम्।' (१।९)

इत्यत्रापि क्षोभप्रलयात्मा निमेषः परपदोन्मेषरूप इत्यपि निरूपयिष्यते। तदेवमेकैवोभयरूपापि शक्तिः कदाचिदुन्मेषप्रधानतया व्यवह्रियते कदाचिन्निमेषप्रधानतया व्यवह्रियते कदाचिन्निमेषप्रधानतया। ततश्च यस्य संबन्धिन्याः स्वरूपनिमेषात्मनः कार्योन्मेषप्रधानायाः शक्तेर्हेतोर्जगतो विश्वस्य शिवादेर्धरण्यन्तस्योदयोऽभेदसारतानिमज्जनसतत्त्वो नानावैचित्र्य-

विश्वकल्पना पूर्वत एव स्थिता सती पश्चात् ज्ञानशक्त्या तां समालोच्य क्रियाद्वारा कार्यरूपे परिणमते। अनया प्रक्रियया संसारे परिदृश्यमानानां वेद्यवस्तुवेत्तॄणां तच्छक्तित्रयेणैव

इति। एतच्च एवंविधं शांकरमैश्वर्यं तदनुग्रहग्रस्तसमस्तमायातमस्त्व-प्रकाशितपरमार्थानां स्वसंवेद्यमेव सुप्रबुद्धानां महात्मनाम्। ईश्वरशक्तिपात-प्रबोधितानां तु सम्यक् उपनतसद्गुरूपदेशक्रमेण अभ्यस्यतां प्रत्यासन्न-स्वानुभवम्। अप्रबुद्धाः पुनः अनुपदेश्या एव, इति। एतदेव इह पुरस्तात् प्रतिपादयिष्यमाणम्। तत् एवंविधे स्थिते शंकरस्य पारमैश्वर्ये या इमाः परमाद्भुतमायाशक्तिवशात् चिदचिद्भेदेन द्विविधा अपि अवान्तरभेदात् अपर्यन्ता भावव्यक्तयः, सा परमेश्वरस्य स्वरूपात् अभिन्ना शक्तिरेकैव तात्त्विकी, इदमिति परामर्शभेदमात्रजन्मना तु नानानामरूपविभक्तभाव-भेदेन अवभासमाना सती बहुत्वेन व्यपदिष्टा 'शक्तीनां चक्रम्'–इति। शक्तिशब्देन च भावव्यक्तीनां व्यपदेशे परमेश्वरात् शक्तिमतो भेदाभाव-प्रतिपादनमेव प्रयोजनम्। एता एव विभवः ऐश्वर्यमीश्वरस्य, ताभिरेव तस्य इत्थं विभवनशीलत्वात्। यथोक्तं पारमेश्वरे––

'शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते।
शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांश्च महेश्वरः॥'

शाली भेदरूपः सर्गः स्वरूपोन्मेषात्मनश्च बाह्यतानिमेषप्रधानायाः शक्ते-र्जगतः प्रलयोऽभेदमयतोदयात्मा विचित्रभेदरूपतासंहार इति प्रलयोऽप्युदय-रूप उदयोऽपि च प्रलयरूप इति व्याख्येयम्। वस्तुतस्तु न किंचिदुदेति व्ययते वा, केवलं स्पन्दशक्तिरेव भगवत्यक्रमापि तथातथाभासरूपतया स्फुरन्त्युदेतीव व्ययत इव चेति दर्शयिष्यामः। स्थितिविलयानुग्रहाणां विशिष्टप्रलयोदयरूपत्वान्नाधिक्यमिति प्रलयोदयाभ्यामेव पञ्चविधं पारमेश्वर्यं कृत्यं संगृहीतम्। निर्णीतं चैवं प्रायं मयैव प्रथमसूत्रमात्रविवरणे स्पन्दसंदोहे। ननु श्रीमन्महार्थदृष्ट्या सृष्ट्यादिदेवताभिरेव विचित्रा जगतः प्रलयोदयाः संपाद्यन्ते तत्कथमेतदुक्तं यस्येत्यादि,—इत्याशङ्क्याह तं शक्तिचक्रविभव-प्रभवमिति। शक्तीनां सृष्टिरक्तादिमरीचिदेवीनां चक्रं द्वादशात्मा समूहस्तस्य यो विभव उद्योगावभासनचर्वणविलापनात्मा क्रीडाडम्बरस्तस्य प्रभवं हेतुम्। एता हि देव्यः श्रीमन्मन्थानभैरवं चक्रेश्वरमालिङ्ग्य सर्वदैव जग-त्सर्गादिक्रीडां संपादयन्तीत्याम्नायः। अथ च कस्मात्परमेश्वरस्य जगत्सर्ग-संहारादिहेतुत्वमित्याशङ्कायामेतदेवोत्तरं शक्तिचक्रेति। यावद्धि किंचिद्विश्वं

अभिव्यक्तिर्भवति। अत एव शिवः तत्तदाकारप्रकारैः बहिरन्तः प्रकाशते। यथोक्तं प्रत्यभि-ज्ञायाम्–'वर्तमानावभासानां भावानामवभासनम्। अन्तःस्थितवतामेव घटते बहिरात्मना॥'

इति। एवं च स्वशक्तिभूतस्य अस्य विभवस्य असौ 'प्रभवः'–उत्पत्तिकारणं, न तु स्वरूपव्यतिरिक्तस्य अन्यतः कुतश्चित् लब्धात्मनः; अतश्च 'यस्य' इत्यादिना प्रथमश्लोकपूर्वार्धेन शंकरस्य जगत्कारणत्वे प्रतिपादितेऽपि, शक्तिचक्रात्मकस्वैश्वर्यभूतजगत्प्रभवत्वलक्षणविशेषप्रत्यायनपरम् इदम् 'तम्' इत्यादिना श्लोकापरार्धेन विशेषणं, न पुनरुक्तम्। एतदेव वृत्तिकृता व्याख्यातम्' विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्यस्य उत्पत्तिहेतुत्वम् ........' इत्यादिना। 'विज्ञानदेहो'–विशुद्धसंविन्मात्रमूर्तिः महेश्वरः, स 'आत्मा'–स्वभावो यस्य 'शक्तिचक्रात्मन ऐश्वर्यस्य'–इति हि तस्य अर्थोऽभिमतः। किं च यस्य एवंविधधर्माव्यभिचारः स परमेश्वरो व्याख्यास्यमानार्थेन शंकर-शब्देन इह प्रतिपादितः। स च आत्मैव नान्यः,–इति यत्तच्छब्दोपलक्षित-वाक्योपनिबन्धः सूचयति;यतः श्लोकपश्चार्धप्रपञ्चितप्रकरणार्थपर्यालोचनया तस्यैव प्रोक्तविशेषणाव्यभिचारः पर्यवस्यति। एतदेव वृत्तिकृता दर्शितम्––

'अनेन स्वस्वभावस्यैव शिवात्मकस्य'

इति व्याचक्षाणेन; 'स्वस्य'–आत्मनः 'स्व'–आत्मीयो 'भावः'–स्वरूपं, स्वस्वभावः,–इति हि तस्य विग्रहोऽभिप्रेतः। तत् अस्य आद्यश्लोकस्य अयं तात्पर्यार्थः प्रकरणनिर्वाह्यवस्तुप्रतिज्ञाबन्धरूपः यत्,–परमेश्वरः इच्छामात्रेण

संभवति तत्प्रकाशमानत्वेन प्रकाशमयत्वात्—

'स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम्।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते॥' ( ई० प्र० १। ५। १० )

इति विपश्चिन्निश्चितनीत्या परमेश्वरस्यान्तः प्रकाशैकात्म्येन प्रकाशमानं स्थितं सच्छक्तिचक्रमित्युच्यते यतः परमेश्वरस्यागमेष्वनन्तशक्तित्वमुद्घोष्यते, तस्य शक्तिचक्रस्याभासपरमार्थस्य विश्वस्य यो विभवः परस्परसंयोजना-वियोजनावैचित्र्यमनन्तप्रकारं तस्य प्रभवं कारणम्। स एव हि भगवान्विज्ञान-देहात्मकान्स्वात्मैकात्म्येन स्थितान्विश्वानाभासानन्योन्यं नानावैचित्र्येण संयोजयन्वियोजयंश्च विश्वोदयप्रलयहेतुः। तदुक्तं श्रीभट्टकल्लटेन—

'विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्यस्योत्पत्तिहेतुत्वम्।'

इत्येतद्वृत्त्यक्षराणामत्र व्याख्याद्वयेऽप्यानुरूप्यम्। अपि च—

'शक्तयोऽस्य जगत्कृत्स्नम्।' इत्यागमदृष्ट्या—

( १-५-१ )। पशुवदज्ञानान्धकारे निमग्नानां प्रमातॄणां समस्त अज्ञानजनितभेदकल्पनाम् उन्मूलयित्वा ज्ञानप्रकाशभूमौ संस्थाप्य शंकरः सृष्टिस्थितिसंहारपिधानानुग्रहात्मकपञ्चकृत्यैः

जगतः प्रलयोदयौ विदधाति, लब्धस्थितिकमपि जगत् तच्छक्तिविभूतिरेकैव मायावशात् तु नानात्वेन अवभासते,—इति। इदमेव अर्थद्वयम् अत्र प्रकरणे विस्तार्यते उपपत्त्युपलब्धिप्रदर्शनक्रमेण। तथा च—प्रथमत एव मायावशात् स्वरूपप्रत्यवमर्शस्य अनुल्लासात्, वेद्यात् देहादेरव्यतिरेकेण प्रतिभासमानस्यैव आत्मनो व्यतिरेकः प्रदर्श्यते। ततो वेद्यस्यैव जगतो वेदकात् तस्मात् उपलब्धतात्त्विकस्वभावात् शक्तिभावेन अव्यतिरिक्तत्वम्,—इति अस्मिन्नेव अर्थद्वये उपपत्त्युपलब्धी,—इति चतुर्निःष्यन्दः स्पन्दसिद्धान्तोऽनेन श्लोकेन आसूत्रितः। सिद्धान्तता च अस्य, सिद्धस्यैव—न साध्यस्य—ईश्वरतत्त्वस्य, अन्तो—निष्ठा निश्चयः, इति कृत्वा; यदि वा नानासिद्धान्तोदितस्य ज्ञान-क्रिया-योग-चर्यात्मकस्य चतुष्टयस्य एतद्विज्ञानं संस्कारकत्वात् साफल्यकारणम् इत्यस्यैव सिद्धान्तता। किंच प्रारब्धप्रकरणाविघ्नपरिसमाप्तिप्रयोजनेनापि अनेन आदिश्लोकेन संबन्धादयोऽपि सूच्यन्ते—इत्यादिशान्ति गुरवः। तच्च सर्वं 'शंकरं स्तुमः' इत्यत एव वाक्यात् लभ्यते। यतः उपायलक्षणं श्रेयःशास्त्ररूपं मुख्यतया, उपेयलक्षणं च आत्मैश्वर्यप्रत्यभिज्ञारूपं; तदुभयमपि 'शम्' इत्यनेन पदेन उक्तम्। तस्य कर्ता शंकरः इत्यन्वर्था इयं संज्ञा परमेश्वरस्य। अत एतच्छास्त्रात्मकश्रेयसः साक्षात् कर्ता परमेश्वर

'तस्माच्छब्दार्थचिन्तासु न सावस्था न या शिवः।' ( २ । ४ )

इतीहृत्यस्थित्या च जगदात्मनः—'तत्खेचर्यूर्ध्वमार्गस्थं व्योम वामेशिगोचरम्।' इति रहस्यनीत्या च वामेश्वरीखेचरीगोचरीदिक्चरीभूचरीरूपस्य मयैव स्पन्दसन्दोहे सम्यङ्निर्णीतस्य—

'अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः।' ( १ । २० )

इत्यत्रापि निर्णेष्यमाणस्यैतद्वचख्याद्वयाव्याख्यातशक्तिचक्रप्रपञ्चभूतस्य च—'यतः करणवर्गोऽयं·········।' ( १ । ६ ) इति स्थित्येन्द्रियग्रामात्मनः

'तदाक्रम्य बलं मन्त्राः······।' ( २ । १ ) इति नित्यमन्त्रात्मनः

'शब्दराशिसमुत्थस्य शक्तिवर्गस्य ·····।' ( ३ । १३ )

इति नीत्या ब्राह्मयादिदेवतास्वभावस्यैवमादेरनन्तप्रकारस्यापि मयैव स्पन्दसन्दोहे वितत्य निर्णीतस्य शक्तिचक्रस्य यो विभवो माहात्म्यं तत्र प्रभवतीति प्रभवं स्वतन्त्रं न तु पशुवत्परतन्त्रम्। शक्तिचक्रस्य रश्मिपुञ्जस्य यो

कल्याणं सम्पादयति। इत्थं ऐन्द्रीब्राह्मीवैष्णवीचामुण्डामाहेश्वरीप्रभृतिशक्तिचक्रविभवस्योद्गमस्थानमपि भगवान् शिव एव। तस्मादमु वयं प्रार्थयामः॥ १॥

एव। तत्संप्रदायमिमं निबध्नद्भिः कर्तृव्यपदेशोऽधिगतः। एवम् ईश्वर-शास्त्रयोः कर्तृकार्यलक्षणः संबन्धः। अभिधेयमिह शंकरस्वरूपमिति 'स्तुमः' इति पदात् प्रतीयते। उपादेयवस्तुस्वरूपप्रतिपादनमेव स्तुत्यर्थः,-इति हि निश्चितं विपश्चिद्भिः। अतः शास्त्राभिधेययोः प्रतिपाद्यप्रतिपादकभाव-लक्षणः संबन्धः। प्रयोजनं च आत्मैश्वर्यप्रत्यभिज्ञात्मकं शंकरपदादेव अवसीयते। परस्यापि हि श्रेयसः कर्तृत्वेन ईश्वर एव व्याख्यातः;-इति अभिधेय-प्रयोजनयोः उपायोपेयभावलक्षणः संबन्धः। इति व्याख्याताः संबन्धादयस्त्रयः। अभिधानमस्य शास्त्रस्य स्पन्द इति। यतः 'स्पन्दतत्त्व-विविक्तये।' ( १ नि० २१ का० २ पा० ) इत्यादौ इहैव व्यवहारः। स्पन्द-शब्दश्च अयं स्वस्वभावपरामर्शमात्रस्य नित्यस्य शून्यताव्यतिरेचनकारण-भूतस्य तावन्मात्रसंरम्भात्मनः शक्त्यपराभिधानस्य पारमेश्वरस्य धर्मस्य किंचिच्चलनात् 'स्पन्द' इति, अर्थानुगमात् वाचकत्वेन व्यपदिष्टः। तत्प्रति-पादनहेतुत्वात् शास्त्रमपि इदं स्पन्दशब्देन अभिधीयते। विषयश्च अस्य विशुद्धश्रद्धाभक्तिप्रकर्षपिशुनितपरमेश्वरपरशक्तिपातप्रोन्मीलयमानस्वभावा-लोकतिरस्कृतसकलसंदेहान्धकारत्वात् प्रबुद्धः सम्यगुपनतदीक्षादिसंस्कारो

विभवोऽन्तर्मुखो विकासस्ततः प्रभव उदयोऽभिव्यक्तिर्यस्येति बहुव्रीहिणाऽन्त-र्मुखतत्स्वरूपनिभालनादयत्नेन परमेश्वरस्वरूपप्रत्यभिज्ञानं भवतीत्यर्थः। किं च यस्य चिदानन्दघनस्यात्मन उन्मेषनिमेषाभ्यां स्वरूपोन्मीलननिमील-नाभ्यां 'यदन्तस्तद्बहिः' इति युक्त्या जगतः शरीररूपस्य तदनुषंगेण बाह्यस्यापि विश्वस्य प्रलयोदयौ यथासंख्यं मज्जनोन्मज्जने भवतस्तं शक्ति-चक्रविभवस्य परसंविद्देवतास्फारस्य प्रभवं भक्तिभाजामेतत्स्वरूपप्रकाशकं शंकरं स्तुमः। तथा यस्य स्वात्मनः संबन्धिनो बहिर्मुखताप्रसररूपादुन्मे-षाज्जगत उदयोऽन्तर्मुखतारूपाच्च निमेषात्प्रलयस्तं विश्वसर्गादिकार्यन्मेषा-दिस्वरूपसंविद्देवीमाहात्म्यस्य हेतुं शंकरं स्तुम इति यथासंभवमपि योज्यम्। देहाद्याविष्टोऽपि परमेश्वरः करणोन्मीलननिमीलनाभ्यां रूपादिपञ्चकमयस्य जगतः सर्गसंहारौ करोति। यदुक्तं रहस्यतत्त्वविदा—

'तदेवं व्यवहारेऽपि प्रभुर्देहादिमाविशन्।
भान्तमेवान्तरर्थौघमिच्छया भासयेद्बहि॥' (ई० प्र० १। ६। ७)

इति। एवंविधार्थपरिग्रहायापि 'यस्य स्वातन्त्र्यशक्त्या' इति त्यक्त्वा 'यस्यो-न्मेषनिमेषाभ्याम्' इति न्यरूपि गुरुणा। अत्र च शंकरस्तुतिः समावेशरूपा प्राप्यत्वेनाभिधेया, शक्तिचक्रविभवात्प्रभवो यस्येति बहुव्रीहिणा शक्तिचक्र-

गुरुवचनचोदनामात्रावशेषस्वात्मैश्वर्योपलब्धिः; तादृशस्यैव इह उपदेश्यत्वेन पुरस्तात् परिगृहीतत्वात्।—इति अभिधान-विषयावपि अवगन्तव्यौ। व्याख्यातश्च अयमादिश्लोकः समस्तप्रकरणार्थोपक्षेपगर्भः ॥ १ ॥

ननु सुर-नर-तिर्यगादिभेदेन प्रविभक्त-तनु-करण-भुवनाभोगादेः अपरिसंख्येयावान्तरभेदभिन्नस्य प्राणभृत्प्रपञ्चस्य सुख-दुःख-क्षुत्तृष्णा-जरा-मरणद्वन्द्वानुविद्धस्य जात्याद्यवच्छिन्नाभिमानभाजः सततं संसरतः परस्पर-दूरभिन्नो यः स्वभावः, स कथं समनन्तरप्रतिपादिताद्भुतैश्वर्यशंकराभेदेन प्रतिज्ञातः येन एवं व्याख्यातम्? यस्य एवंप्रतिपादितविशेषणाव्यभिचारः, स कथं शंकरो ममैव आत्मा?—इति अत आह—

विकासस्तत्प्राप्तावुपाय उक्तः, शक्तिचक्रविभवस्य परसंविद्देवतास्फारस्य भक्तिभाजां प्रभवं प्रकाशकमिति तत्पुरुषेण फलमुक्तम्। यद्वक्ष्यति—

'ततश्चक्रेश्वरो भवेत्।' (३। १९)

इत्यभिधेयोपाययोरुपायोपेयभावः संबन्ध इत्यभिधेयोपायसंबन्धप्रयोजनान्यनेनैव सूत्रेण सूत्रितानि ॥ १ ॥

नन्वेवंभूतशंकरस्वरूपसत्तायां किं प्रमाणं कुतश्चोपादानादिहेतुं बिना जगदसौ जनयति, तस्यैवोपादानत्वे मृत्पिण्डस्येव घटेन जगता तिरोधानं क्रियेत, तिरोहितातिरोहिततायां च भगवतः स्वभावभेदः स्यात्, पुनरुन्मज्जने च हेतुश्चिन्त्यो, जगदुदये च द्वैतप्रसङ्ग इत्येताः शङ्का एकप्रहारेणापहर्तुमाह—

**यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम्।**
**तस्यानावृतरूपत्वान्न निरोधोऽस्ति कुत्रचित् ॥ २ ॥**

कथं पुनः स्वस्वभावस्यैव संसारिणः शिवत्वेन निर्देशः—इति यद्युच्यते, तत् यत्र स्थितम् इदं जगत्, यस्मात् च उत्पन्नं तस्य

**'तस्य'—अस्य वक्ष्यमाणस्य तत्त्वस्य 'न क्वचित्'—कस्मिंश्चित् देशे काले आकारे अवस्थाविशेषे वा 'निरोधः'—अवच्छेदः इदन्तेयत्ताव्यपदेशहेतुः**

तस्यास्य शंकरात्मनः प्रकाशानन्दघनस्य स्वस्वभावस्य न कुत्रचिद्देशे काल आकारे वा निरोधः प्रसरव्याघातोऽस्ति अनावृतरूपत्वादस्थगितस्व-

पूर्वस्मिन् श्लोके संवित्प्रकाशात्मकशिव एव समस्तघट-पटपदार्थेषु विद्यमानोऽस्तीत्युक्तम्। परन्तु विश्वविचित्ररचितपदार्थसंघेषु विभिन्नरूपता परिलक्ष्यते। अस्यां

संसार्यवस्थायामपि अनाच्छादितस्वभावत्वात् न क्वचित् निरोधः, अतः शिवत्वमुच्यते ॥ २ ॥

**वेद्यवस्तुधर्मः 'अस्ति'–विद्यते; कुतो हेतोः ? 'अनावृतरूपत्वात्'–जात्या-द्यभिमानरूपेण मलेन अनावृतम् अनाच्छादितं रूपं यस्य तत्, तथा तस्य भावः तत्त्वं तस्मात्। तस्य अनावृतत्वोपपत्तिप्रतिपादनाय विशेषणमाह**

भावत्वात्। अयं भावः इह यत्किंचित्प्राणपुर्यष्टकसुखनीलाकिं चित्प्रकाशस्या-वरकं संभाव्यते तद्यदि न प्रकाशते न किंचित्, प्रकाशमानं तु प्रकाशात्मक-शंकरस्वरूपमेवेति किं कस्य निरोधकं को वा निरोधार्थः। एतदेव तस्येत्ये-तद्विशेषणेन यत्रेत्यादिनोपपादयति। यत्र यस्मिश्चिद्रूपे स्वात्मनि इदं मातृ-मानमेयात्मकं सर्वं जगत्कार्यं स्थितं यत्प्रकाशेन प्रकाशमानं सत्स्थितिं लभते तस्य कथं तेन निरोधः शक्यस्तन्निरोधे हि निरोधकाभिमतमेव न चकास्या-दित्याशयशेषः। यथोक्तम्—

'तदात्मनैव तस्य स्यात्कथं प्राणेन तन्त्रणा।' (अजडप्र० २१)

इत्यजडप्रमातृसिद्धौ। ननूत्पन्नस्य स्थित्यात्मा प्रकाशो भवति, उत्पत्तिरेव त्वस्य कुत इत्याह यस्माच्च निर्गतमिति। स्मृतिस्वप्नसंकल्पयोगिनिर्माणदृ-ष्ट्या चितः स्वानुभवसिद्धं जगत्कारणत्वमुज्झित्वा अप्रमाणकमनुपपन्नं च प्रधानपरमाण्वादीनां न तत्कल्पयितुं युज्यते। कार्यपदेन चेदमेव ध्वनितं कर्तुः क्रियया निष्पाद्यं हि कार्यमुच्यते न तु जडकारणानन्तरभावि जडस्य कारणत्वानुपपत्तेः ईश्वरप्रत्यभिज्ञोक्तनीत्या। भविष्यति चैतत्—

'अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम्।' [१।१४]

इत्यत्र। सर्वशब्देनोपादानादिनैरपेक्ष्य कर्तुर्ध्वनितम्। न च कार्यं घटादि कर्तुः कुम्भकारादेः कदाचित्स्वरूपं तिरोदधद्दृष्टम्। ननु निर्गतिरवस्थितस्य भवति तत्किमेतत्कचिदादवेव स्थितं, नान्यत्र स्थितम् अपि तु तत्रैव चिदा-त्मनीत्याह यत्र स्थितमिति। आवृत्त्या चैतद्योज्यम्। अयमर्थः यदि चिदा त्मनि जगदहंप्रकाशाभेदेन न भवेत्तत्कथमुपादानादिनिरपेक्षं तत उदियात्। यतस्तु—

'यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः।
तथा हृदयबीजस्थं जगदेतच्चराचरम्॥' (प० त्री २४)

स्थितौ अद्वैतरूपताया कथं भङ्गो न भवतीति स्वभावतः संशयो जायते। किन्तु नात्र संशयस्य अवकाशो भवति-यत्रेति। यतोहि यथा एकस्मिन् सूक्ष्मे वटबीजे मूलफलपलाश

'यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम्'–इति। 'इदम्' इति वेद्यतयावस्थितं; 'सर्वम्' इति यत्र यत्र दर्शने यथा यथा परिकल्पितं; तत् अशेषं कार्यं कर्त्रधीनसद्भावं 'यत्र'–यस्मिन् वेदकत्वेन कर्तृत्वेन च अवस्थिते आधेयसमस्तपदार्थसार्थसामान्याधारभूते एकस्मिन् 'स्थितं'–तेन तेन पृथिव्यादिना घटपट-गवादिना वा रूपेण लब्धप्रतिष्ठं, यदन्तर्गतस्य सर्वस्य वस्तुनः प्रकाशमानत्वात् स्वरूपसत्तासादनमित्यर्थः। ननु सूर्यादिप्रकाशान्तर्गतं घटपटादिद्रव्यं तेन तेन रूपेण प्रकाशमानत्वात् सत्ताम् आसादयति, तथैव

इत्याम्नायस्थित्या—

'स्वामिनश्चात्मसंस्थस्य।' (ई० प्र० १।५।१०)

इति पूर्वोक्तयुत्त्या च तत्रैतदभेदेन स्फुरत्स्थितं ततोऽयं चिदात्मा भगवान्निजरसाश्यानतारूपं जगदुन्मज्जयतीति युज्यते। एवं यत्र स्थितमेव सद्यस्मान्निर्गतमित्यत्र योजना जाता। च एवार्थे भिन्नक्रमः। ननु यदि तस्मात्प्रकाशवपुष इदं जगन्निर्यातं तन्न प्रतेत न हि प्रथाबाह्यं च प्रथते चेति युक्तिमित्याशङ्कय यस्मान्निर्गतमपि सद्यत्र स्थितमित्यावृत्त्या संगमनीयम्। चोऽप्यर्थे भिन्नक्रमः। एतदुक्तं भवति न प्रसेवकादिवाक्षोटादि तत्तस्मान्निर्गतमपि तु स एव भगवान्स्वस्वातन्त्र्यादनतिरिक्तमप्यतिरिक्तामिव जगद्रूपतां स्वभित्तौ दर्पणनगरवत्प्रकाशयन्स्थितः। ननु च भवत्वेवं सर्गस्थित्यवस्थयोर्जगतानिरुद्धत्वं संहारावस्थया त्वभावात्मा सुषुप्तदेशीयया जगतः संबन्धिन्या कथं नैतत्तिरोधीयते, नहि ग्राह्यं जगद्विना ग्राहकश्चिदात्मा कश्चिदित्यावृत्त्यैतदेवोत्तरं यस्मान्निर्गतमपि सद्यत्रैव स्थितमुत्पन्नमपि जगत्संहारावस्थायां तदैकात्म्येनैवास्ते न त्वस्यान्यः कश्चिदुच्छेदः शून्यरूपस्तस्य वक्ष्यमाणयुक्त्या प्रकाशं भित्तिभूतं विनानुपपत्तेरित्यर्थः। यथोक्तं श्रीस्वच्छन्दशास्त्रे—

'अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते।
देव्यभावः स विज्ञेयो यत्र भावाः क्षयं गताः॥' [४।२९२]

इति। एवं सर्वं यस्य कार्यं यत्प्रकाशेनैव प्रकाशते संहृतमपि च सद्यत्प्रकाशैकात्म्येन तिष्ठति न तस्य देशकालाकारादि किंचिन्निरोधकं युज्यते,–इति व्यापकं नित्यं विश्वशक्तिखचितं स्वप्रकाशमादिसिद्धं चैतत्तत्त्वमिति नास्य सिद्धावज्ञातार्थप्रकाशरूपं प्रमाणवराकमुपपद्यत उपयुज्यते संभवति वा

शाखाप्रशाखादिभेदेन विशालवटतरुर्विलसति। अनेन एकस्य वटबीजस्य भेदो न भवति, एवमेव एकस्मिन् अभिन्ने अद्वैते त्रिविधपरिच्छेदशून्ये भगवति परमशिवे विद्यमानविभिन्न-

**सर्वमिदं कार्यं 'यत्र स्थितम्' इत्युक्तम्, उत अन्येन प्रकारेण? इत्याह— 'यस्माच्च निर्गतम्' इति,—प्रधानादिकारणान्तरपरिहारेण 'यस्मात्' एककर्तृभूतात् एकस्मात् कारणात् 'निर्गतम्' उद्भूतम्। तत् अयत्रमार्थः,— यः पदार्थः सर्वस्य इदन्तापन्नतया प्रमेयभूतस्य शास्त्रेषु नानाविभागेन संगृहीतस्य तत्त्वव्रातस्य एकः प्रकाशकत्वेन स्थितिहेतुत्वात् आधारभूतः, कर्तृत्वात् च प्रभवः कारणं, स्वयं च वेद्यत्वसंस्पर्शासहिष्णुत्वात् मायीयप्रमात्रन्तराविषयभूतोऽनवच्छिन्नमहिमा निर्मलचिन्मात्रैकरूपः, स इह स्वस्वभावशब्देनाभिमतः, न तु जात्याद्यवच्छिन्नाभिमानसंकोचितात्मनो मायाशक्त्य-**

प्रत्युतैतत्तत्त्वसिद्धयधीना प्रमाणादिविश्ववस्तुसिद्धिः। यदुक्तमस्मद्गुरुभिस्तन्त्रालोके—

'प्रमाणान्यपि वस्तूनां जीवितं यानि तन्वते।
तेषामपि परो जीवः स एव परमेश्वरः॥' (तं०१आ०५५श्लो०)

इति। यस्मान्निर्गतमपीदं जगद्यत्र स्थितं यत्प्रकाशेन प्रकाशमानं तथाभूतमपि यत्र स्थितं यत्प्रकाशैकरूपं यत्प्रकाश एव यस्य सिद्धयै न्यक्षेणेक्ष्माणं भवति न त्वन्यज्जगन्नाम किञ्चित्। अत्र यत्र स्थितमित्यावर्त्य द्विर्योज्यम्। एवं च स्वानुभवसिद्धमेवास्य तत्त्वस्य सृष्टिस्थितिसंहारमेलनावभासिनोऽतिदुर्घटकारिणः सर्वदा सर्वत्रानिरुद्धत्वम्। यथोक्तं श्रीमदुत्पलदेवाचार्यैः—

'परमेश्वरता जयत्यपूर्वा तव सर्वेश यदीशितव्यशून्या।
अपरापि तथैव ते ययेदं जगदाभाति यथा तथा न भाति॥'
(उ० स्तो० १६। ३०)

इति। अत्र हि भासमानमेव जगद्भासनैकशेषीभूतत्वाद्भासनातिरिक्तं न किंचिद्भातीत्यर्थः। किंच यत्र स्थितमित्युक्त्योपशमपदे। यस्माच्च निर्गतमिति प्रसरपदे यतोऽस्य न निरोधस्ततो निमीलनोन्मीलनसमाधिद्वयेऽपि योगिना स्वस्वभावसमावेशपरेणैव भवितव्यम्। यद्वक्ष्यते—

'यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम्।' [ १। ६ ]

इति तथा

'तस्माच्छब्दार्थचिन्तासु न सावस्था न या शिवः।' [ २। ४ ]

पदार्थस्वभावेषु सत्स्वपि नाद्वैतक्षतिर्भवति। अथवा व्यवहारे एकस्मिन् महासमुद्रे जायमानतरङ्गभेदानां परस्परवैलक्षण्येऽपि तत्कृतः समुद्रे भेदो न भवति, एवमेव प्रकृतेऽपि

पह्लुतस्वैश्वर्यसंविदः कार्यवर्गान्तःपातिनः प्राणिप्रबन्धस्य स्वरूपं स्वस्वभावः।
–इति युक्तम् उक्तम् 'आत्मैव शंकर' इति। तत् एतत् वृत्तिकृता––

'कथं पुनः स्वस्वभावस्यैव संसारिणः शिवत्वेन व्यपदेशः'

इति आक्षिप्य––

'यत्र स्थितम् इदं जगत्, यस्मात् च उत्पन्नम्'

इति विवृण्वता प्रतिसमाहितम्।

'तस्य संसार्यवस्थायाम्'

इति। वृत्तिरेवं बोद्धव्या,–संसारिणां तन्मायावभासितजात्याद्यभिमाना मायीयावस्था, तस्यामपि तस्य स्वस्वभावस्य तत्त्वतो निरोधो नास्ति इति ॥ २ ॥

इत्यपि च। कुत्रचिदनात्मवादिनि सौगतादौ प्रमातरि कुत्रचिच्च बाधकाभिमते प्रमाणे सति न तस्य निरोधः प्रतिषेधोऽस्ति, यतो यस्तस्य प्रतिषेधको यच्च तस्य प्रतिषेधकं प्रमाणं तद्यदि न सिद्धमभित्तिकमेतच्चित्रं सिद्धिश्चास्य प्रकाशते इति तत्सिद्धचैव भगवानादिसिद्धस्वप्रकाशमूर्तिरस्तीत्येतप्रतिषेधायोदितेनाप्यनक्षरमुक्तम्। भविष्यति चैतत्—

'न तु योऽन्तर्मुखो भावः।' [ १ । १६ ]

इत्यत्रान्तरे। एवं चानेन विश्वोत्तीर्णं विश्वमयं विश्वसर्गसंहारादिकारी शांकरं स्वस्वभावात्मकं तत्त्वमित्यभिदधता सर्वेषु पारमेश्वरेषु यदुपास्यं तदितः स्पन्दतत्त्वान्नाधिकं केवलमेतत्स्वातन्त्र्यवशेनैव तदुपासावैचित्र्यमाभास्यते। वस्तुतस्तु एतद्वीर्यसारमेवाशेषम्। यद्वक्ष्यति—

'तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः।' [ २ । १ ]

इत्येतदपि भङ्ग्या प्रतिपादितम्। एवं च न कश्चिदुक्तचोद्यावकाशः। एवमेतादृशेषु चिन्तारत्नप्रायेषु श्रीस्पन्दसूत्रेषु यदन्यैः सर्वैर्विवृतिकृद्भिर्व्याख्यायि यच्चास्माभिः किंचिद्व्याक्रियते तत्रान्तरममत्सरा अनवलिप्ताश्च स्वयमेव विचिन्वन्तु सचेतसो न तु तदस्माभिरुद्घाट्य प्रतिपदं प्रदर्श्यते ग्रन्थगौरवापत्तेः ॥ २ ॥

बोध्यम्। लोकेऽपि घटकार्यनिर्माणे कुम्भकारस्य चक्रादिसहकारिणामावश्यकता भवति तथा भगवतः शिवस्य इदं परिदृश्यमाननामरूपात्मकविशालविश्वनिर्माणे न सहकारिणां न वा क्रमाक्रमादीनाम् अपेक्षा भवति, न वा तत्तत्त्वं केनचिदपि आवृतं भवति ॥ २ ॥

ननु योऽयं स्वभावाख्य एवं प्रतिपादितः पदार्थः, स किं केवलात् आगमाज्ञामात्रात् ओम् इति अभ्युपगन्तव्यः, उत प्रगुणाभ्याम् उपपत्त्युपलब्धिभ्यां व्युत्पाद्याभ्यां प्रतिपत्तिगोचरतां नेतुं शक्यः ?–इति संशयच्छेदाय श्लोकान्तरेण उपपत्तिं यां प्रतिपादयिष्यति तदवतारणार्थम् इदं तावत् उच्यते,–सकलप्रकरणप्रतिपाद्यार्थतत्त्वलब्धप्रतिष्ठया परया प्रज्ञया स्वस्वभावस्य परामर्शावसरे रविकिरणस्पृष्टनीहारनिकरनिःसारनश्यत्स्वरूपया, संप्रति तु द्वैतमहामोहतिमिरात्मना विजृम्भमाणया मायाशक्त्या अविष्टानां सर्वप्रमातॄणां पारमार्थिककात् वेदकात् स्वभावात् प्रच्युत्येव वेद्य एव देहादौ वेदकभावेन अहमिति प्रत्ययः परमदुर्भेदस्य भेदग्रन्थेर्मूलम्। ततस्तेभ्यो देहादिभ्यः तस्य अहंप्रत्ययात्मनः स्वस्वभावस्य व्यतिरेचनाय समनन्तरप्रतिज्ञातस्य सर्वथा निरोधाभावस्य उपलब्धये स्वानुभवप्रमाणाम् उपपत्तिं प्रस्तावयन् आह––

ननु जागरादिदशास्वीदृशः स्वभावो नानुभूयते यदि चायमुक्तयुक्तिभिर्न केनचित् निरुध्यते तत् जागराद्यवस्थासु स्वयमेव निरोत्स्यते,–इति शङ्कात उक्तमप्यर्थमप्रतिपद्यमानं प्रतिबोधयन्नुपदिशति—

जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति।
निवर्तते निजान्नैव स्वभावादुपलब्धृतः ॥ ३ ॥

जाग्रदादिनापि भेदे प्रथमाने न तस्य स्वरूपम् आव्रियते, यस्माद् उपलब्धृरूपत्वं त्रिष्वपि पदेषु साधारणम्, न तस्य स्वरूपान्यथाभावः, यथा विषस्याङ्कुरादिषु च पञ्चसु स्कन्धेषु ॥ ३ ॥

अतः तस्य स्वभावस्य न क्वचित् निरोधः अस्ति, यतः असौ 'निजात्' आत्मीयात् अनुपाधेः 'स्वभावात्' स्वरूपात् 'न निवर्तते' नान्यथा भवति, न च्यवते इति संबन्धः। कीदृशात् स्वभावात् ? 'उपलब्धृतः' उपलम्भकात्

जागरापरपर्यायो जाग्रच्छब्दः शिष्टप्रयुक्तत्वात्। लोकप्रसिद्धे जाग्रत्स्वप्नसुषुप्तानां भेदे योगिप्रसिद्धेऽपि वा धारणाध्यानसमाधिरूपे प्रसर्पति अन्यान्यरूपे प्रवहति सति अर्थात् तत्तत्त्वं निजादनपायिनः सर्वस्यात्मभूता-

बाह्यान्तरावस्थासु यदि एक एव स्पन्दात्मकविमर्शता व्याप्नोति तर्हि जाग्रदाद्यवस्थासु पारस्परिकभेदः कथं भवतीति नाशङ्कनीयमाह-जाग्रदादीति। यती हि तासु अवस्थासु

ज्ञातुः अनुभवितुः इत्यर्थः। कदा च न निवर्तते ? 'जाग्रदादिभेदे प्रसर्पति अपि' जाग्रदादिना यो 'विभेदो' व्यतिरेकः, अवस्थानाम् अन्योन्यवैलक्षण्यं, तस्मिन् 'प्रसर्पति' विजृम्भमाणे। आदिग्रहणात् स्वप्न-सुषुप्तावस्थे गृह्येते; स्मृत्याद्यवस्थाः स्वप्नेनैव संगृहीताः, तुल्यरूपत्वात्; मदमूर्छाद्यवस्थाश्च सुषुप्तेन। तत्र जाग्रत् इति जागरावस्थैव शास्त्रेषु प्रसिद्धा, यस्यां श्रोत्रादिभिः इन्द्रियैः शब्दादीन् इन्द्रियार्थान् गृह्णन् प्रसृतशक्तिः पुरुषः परिस्पन्दते। स्वप्नः स्वापावस्था, यस्यां स्वव्यापारपरिश्रान्तः श्रोत्रादिविहारविरतावपि मनसैव असौ विषयान् परिगृह्णाति। सुषुप्तं गाढनिद्रारूपा सुखस्वापावस्था, मनोव्यापारस्यापि व्युपरमे सति यत्र व्यतिरिक्तवेद्यसंवेदनं तात्कालिकं नास्ति। स्मृत्यवस्था अनुभूतविषयासंप्रमोषात्मिका स्वप्नसदृशी, मनसैव विषयग्रहणसाम्यात्। मदः पानातिशयजः चित्तेन्द्रियवृत्तिप्रमोषरूपो विकारः। मूर्छाविषादविषादिभोजनादिजनितमोहात्मा। एवमादिवेद्य ग्रहणाभावसाम्यात्। सुषुप्ततुल्या अन्या अपि याः काश्चनापि अवस्था संभवन्ति, ता एतासु एव अन्तर्भवन्ति। एतन्निमित्तके विभेदे प्रवर्तमानेऽपि, निजात् उपलब्धुः स्वभावात् असौ न निवर्तते। यदि अवस्थात्मक एव अयम् उपलब्धा स्यात्, तत् अवस्थावत् सोऽपि विभिद्येत। यावता तासां विभेदे प्रसर्पति, अयं स्वभावात् अवस्थाव्यतिरिक्तात् न निवर्तते,–इति अपिशब्दस्य अर्थः। कथम् एतत् प्रतिपद्यामहे,–यत् अवस्थातापि सन् अवस्थासु भिन्न-

च्चानुभवितृरूपात्स्वभावान्नैव निवर्तते। यदि हि स्वयं निवर्तेत तज्जाग्रदाद्यपि तत्प्रकाशविनाकृतं न किंचित्प्रकाशते। उपलब्धृता चैतदीया जागरास्वप्नयोः सर्वस्य स्वसंवेदनसिद्धा, सौषुप्ते यद्यपि सा तथा न चेत्यते तथाप्यौत्तरकालिकास्मृत्यन्यथानुपपत्त्या सिद्धा उपलब्धृत एव च स्वाभावान्न निवर्तते, उपलभ्यं त्ववस्थादि तन्माहात्म्यान्निवर्ततां कामं कात्र क्षतिः। एवकारोऽप्यर्थे भिन्नक्रमस्तदभावेऽपि न निवर्तत इत्यर्थ। जागरादिविभेदस्य विशेषणद्वारेण हेतुस्दभिन्ने इति, तस्माच्छिवस्वभावादभेदेन प्रकाशमानत्वात्प्रकाशरूपे इत्यर्थः। यच्च यदेकात्मकं तत्कथं तन्निवृत्तावबतिष्ठते।

सत्यपि भेदे अनुभवितुः कथंचिदपि भेदो न भवति। यो हि जाग्रदाद्यावस्थायाम् अनुभविता स एव स्वप्ने सुषुप्तौ च। ज्ञानरूपस्य संविदात्मना अनुभवितुः अनावृतत्वात्। तासु तस्य साधारणरूपेण स्थितत्वात्। अत एव तस्य स्वरूपे किञ्चिदपि परिवर्तनं न जायते, यदि तासु अनुभविता भिन्नः स्यात्तदा अन्यावस्थापरिज्ञानं कथंकारं स्यात्।

रूपासु प्रसरन्तीष्वपि स एकस्मात् स्वभावात् न निवर्तते इति ? अत्र हेतु-गर्भं विशेषणम् आह,–कीदृशि तस्मिन् प्रसर्पति ? 'तदभिन्ने' अभिन्न एकरूपो निर्विशेषोपलब्धृत्वमात्रेण लक्षणेन युक्तः स्वस्वभावो व्यापकत्वेन स्वयम् अनुभूयमानो यत्र स तथा तस्मिन् । अवस्थाभेदेऽपि उपलब्धृलक्षणस्य अवस्थातुः अभेदः,–इति सर्वस्य अत्र स्वानुभवः प्रमाणम् । तथाहि,–योऽहम् अस्वाप्सं स जागर्मि इति एकानुसंधातृसूत्रनिबद्धत्वेन स्वयम् अनुभूयमाना जागरादयोऽवस्थाः प्रसर्पन्ति । एताभ्यश्च अन्यदवस्थान्तरम् आनन्त्येऽपि सांसारिणां जन्तूनां न संभवति । अतो यथा एकस्मिन् देहे अवस्थाव्यति-रिक्तरूप उपलब्धा व्यापक एकः, तथा सर्वदेहेष्वपि स एव एको व्यापकः सिद्धः; देहभेदेऽपि तस्य उपलब्धृमात्रव्यतिरिक्तलक्षणान्तराभावात् । प्रति-प्राणिपृथक्त्वेन अहमिति तु प्रत्ययो मायीयो, न तात्त्विकः । तद्व्युदासार्थ-मेव प्रकरणारम्भः । सोऽपि च उपलब्धृत्वमात्रम् एकं स्वलक्षणं न व्यभिचर-त्येव ।–इति स्वस्वभाव एव शंकर–इति सम्यक् उपपादितं स्वानुभवान-पह्नविनः प्रबुद्धान् प्रति । एताभिरेव अवस्थाभिः योगशास्त्रप्रसिद्धास्वपि जागराद्यवस्थासु तस्य अभेदः प्रतिपादितो वेदितव्यः । तास्वपि तस्य उपलब्धृत्वेन व्यापकतया अवस्थानात् । ताश्च संक्षेपतो लक्ष्यन्ते ।–तत्र ध्येये अर्थे चेतसा झगिति प्रवृत्तिमात्रं जागरावस्था, धारणा इति क्वचित्प्रसिद्धा ।

यद्वा तदिति कर्तृपदम् । अभिन्न इति तु केवलमभिन्नत्वं जागरादेः शिवापेक्ष-मेव । अर्थात्तत्त्वं जागरादिभेदेऽपि सति प्रसर्पति प्रसरति वैचित्र्यं गृह्णाति तन्नैव । स्वभावान्निवर्तत इति योज्यम् । किंचायं जाग्रदादिभेदः परिणामो विवर्तो वेति यत्सांख्यपाञ्चरात्रशाब्दिकादयो मन्यन्ते तद्व्युदासायाप्युक्तं तदभिन्न इति । अवस्थाप्रपञ्चोऽपि यदि चिन्मात्रात्परिणामतया मनागप्य-तिरिच्येत चिद्रूपं वा तत्परिणतौ मनागतिरिच्येत तन्न किंचिच्चकास्यादिति ?

उक्तञ्च पञ्चदशीकारेण—

स बोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवत् ।
एवं स्थानत्रयेऽप्येका संवित्तद्वद्दिनान्तरे ॥ ६ ॥

मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ।
नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥ ७ ॥

तत्रैव विसदृशप्रत्ययप्रवाहकैतानतानुसंधानं स्वप्नावस्था, ध्यानम् इति याम् आहुः। क्रमेण ऐकाग्र्यातिशयात् प्रत्ययान्तरासंकीर्णसूक्ष्मध्येयाभासमात्रविशेषता चित्तस्य सवेद्यसुषुप्तावस्था, यां वितर्कविचारानन्दास्मितानुरूपानुगमलक्षणस्य संप्रज्ञातस्य समाधेः आनन्दास्मितामात्रानुगतम् अवस्थाविशेषम् आचक्षते। यस्तु 'विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः' ( पा० १ सू० १७ पातञ्जले ) इति कृतलक्षणः असंप्रज्ञातः समाधिः, तत् अपवेद्यसुषुप्तम्। सर्वासु एतासु च अनुभवितृरूपस्य व्यापकस्य एकस्य स्वभावस्य सत्ता स्थितैव। यतः सालम्बेन तावत् समाधौ व्यतिरिक्तवेद्यसद्भावात् लौकिकावस्थावत् वेदकस्य उपलब्धुः सत्त्वं स्फुटम् एव। यत्र तु निरालम्बनत्वात् अभावरूपत्वं तत्र तत्कालमेव वेद्यासंवेदनमात्रं, न तु वेदकस्य वेदकत्वाभावः सुषुप्तादिवत्; ततो निःसृतस्य सा अवस्था स्मर्तव्यतया वेद्यत्वम् आपन्ना व्यापकस्य सद्भावम् अभिव्यञ्जयत्येव। ये पुनः वेद्यसंवेदनसामर्थ्याभावमात्रव्यामोहिता उपलब्धारमात्मानमेव असत्यं मन्यन्ते तान् पुरस्तात् प्रतिबोधयिष्यति। एतत् सर्वं वृत्तिकृता—

'... जाग्रदादिनापि भेदे प्रवर्तमाने न तस्य स्वरूपमाव्रियते'

इत्यादिना ग्रन्थेन सूचयित्वा विषशक्तिदृष्टान्तेन प्रमाणीकृतम् ॥ ३ ॥

तावन्न परिणामोऽस्ति। यथोक्तम्—

'परिणामोऽचेतनस्य चेतनस्य न युज्यते।'

इति श्रीकिरणे। न च भासमानोऽसावसत्यो ब्रह्मतत्त्वस्यापि तथात्वापत्तेः,- इत्यसत्यविक्तान्यरूपोपग्राहिता विवर्त इत्यपि न सङ्गतम्। अनेन चातिदुर्घटकारित्वमेव भगवतो ध्वनितम्। यस्माज्जागरादिविभेदं च प्रकाशयति तत्रैव च स्वाभेदमिति भेदात्मा तदभेदात्मनोभयात्मा च रूपेणापरापरापरापराशक्तित्रयस्वरूपेण स्फुरतीत्यनुत्तरषडर्धतत्त्वात्मतया भगवानेव स्फुरति। अश्चत जागरादिदशावस्थितोऽपि एवमिमं स्वस्वभावं परिशीलयन् यश्चिनुते स शंकर एवेत्युपदिष्टं भवति ॥ ३ ॥

एवञ्च एकस्य एव प्रमातुः जाग्रदाद्यवस्थानां स्वरूपतः भेदो भासते, किन्तु वेत्तुः चिद्रूपस्य उपलब्धृतायां कथमपि भिन्नता नास्ति। नहि तरङ्गैः समुद्रे भेदो भवतीत्युक्तमेव पूर्वम् ॥ ३ ॥

ननु जागरादिषु अवस्थाविशेषेषु स्वभावात् उपलब्धुः असौ न निवर्तते, 'स्वस्य' आत्मन उपलब्धुर्ज्ञानस्य 'भावात्' स्वानुभवरूपात् एकरूपतया अवस्थानात्,–इति यत् प्रतिपादितम् तत् कथम् ? यतः तासु अवस्थासु अनुभवितुः एवंविधाः प्रत्ययाः प्रादुर्भवन्ति, तत् यथा,–मनुष्योऽहं, ब्राह्मणोऽहं, देवदत्तोऽहं, युवाहं, वृद्धोऽहं, कृशोऽहं, स्थूलोऽहम्,–इत्यादयो देहालम्बनाः; सुखितोऽहं, दुःखितोऽहम्,–इत्यादयो बुद्ध्यालम्बनाः; क्षुधितोऽहं, तृषितोऽहम्,–इत्यादयः प्राणालम्बनाः। शून्यताप्रमातृप्रत्ययश्च 'नाहं किंचित् अवेदिषम्,–इति प्रत्यवमर्शप्रत्येयः सुषुप्ताद्यवस्थातः प्रतिबुद्धस्य शून्यालम्बनः प्रादुर्भवति। त एते देहादयः सर्व एव अनित्याः, तदालम्बनश्च अहंप्रत्ययोऽपि अनित्य एव।–इति कथमुक्तम् उपलब्धुः स्वभावात् असौ न निवर्तते ?–इत्यत आह—

अथ ये 'एकमेवेदं संविद्रूपं हर्षविषादाद्यनेकाकारविवर्तं पश्याम' इत्युक्त्या ज्ञानसन्तान एव तत्त्वामिति सौगता मन्यन्ते; ये चाहंप्रतीतिप्रत्येयः सदैव सुखाद्युपाधितिरस्कृत आत्मेति मीमांसकाः प्रतिपन्नास्तानेकेनैव श्लोकेनापवदति—

अहं सुखी च दुःखी च रक्तश्चेत्यादिसंविदः।
सुखाद्यवस्थानुस्यूते वर्तन्तेऽन्यत्र ताः स्फुटम्॥ ४॥

स चानुस्यूत एव सर्वास्ववस्थासु, यस्मात् 'य एव अहं सुखी स एव अहं दुःखी, रक्तो वा पश्चात् स्थित' इति अनुस्यूतत्वेन; अन्यत्र अवस्थाव्यतिरिक्ते। यदागमः

'..................स स्वभावः परः स्मृतः।' इति॥४॥

'अहं सुखी इत्यादयो याः संविदः ता अन्यत्र वर्तन्ते' ततः असौ स्वभावात् एकस्मात् न निवर्तते,–इति संबन्धः। अन्तरङ्गत्वात् मुख्या बुद्ध्यालम्बनाः संविदोऽत्र निर्दिष्टाः। आदिग्रहणात् तु देहाद्यालम्बनाः

य एवाहं सुखी स एव दुःखी सुखानुशायिना रागेण युक्तत्वाद्रक्तो दुःखानुशायिना द्वेषेण संबन्धाद्द्विष्टश्चेत्यादयः संविदो ज्ञानानि ता

जाग्रदाद्यवस्थासु एकस्य एव ज्ञातुः व्याप्नोतीत्युक्तम्, किन्तु अहं सुखी, अहं दुःखी इत्यादि अनुभवकाले अहंप्रतीतेः विषयाकारेण भासते। यस्यां स्थितौ कथं भवता उच्यते

संगृहीताः। ताश्च पूर्वं प्रतिपादिताः। तेन सर्वा एताः संविदः अन्यत्र यथाप्रतिपादिताभ्यः सुखादिभ्यः अवस्थाभ्यो व्यतिरिक्ते सुखाद्युपलब्धरि वर्तन्ते, सरितः सागरे इव तत्र विगलितान्योन्यभेदा ऐक्येन अवतिष्ठन्ते, तादात्म्यम् आपद्यन्ते इत्यर्थः। एतत् च 'स्फुटं' स्वानुभवसंवेद्यत्वात् सुप्रकटमेव। अतश्च एकैव संवित् उपलब्धृरूपा अहमिति स्फुरन्ती पारमार्थिकी, मायाशक्तिजनिततथाविधस्वभावपरामर्शाभावबलात् सुखाद्यनित्यवस्तुवेदकत्वेन 'अहं सुखी दुःखी च'–इत्यादिना बुद्धयाद्यवस्थासामानाधिकरण्यम् उपगता सती, संविद इति बहुवचनेन निर्दिष्टा। यदि पुनः सुखादिवेद्यवस्तुसंबन्धात् सुखादिवत् संविदोऽपि अहं प्रत्ययरूपाः परमार्थत एव बह्व्यः स्युः, तदा स्मृतिप्रत्यभिज्ञाद्यनुसंधानं न स्यात्; असति च तस्मिन् सर्वव्यवहारोच्छेदः प्रसक्तः; स च नेष्टः; ततः 'अन्यत्र' इति निर्दिष्टस्य अर्थस्य विशेषणम् आह,–एताः संविदः कीदृशि अन्यत्र वर्तन्ते ? 'सुखाद्यवस्थानुस्यूते' सर्वेषु सुखादिषु सुखदुःखमोहरूपेषु अवस्थाविशेषेषु, उत्पादविनाशधर्मकत्वात् अनित्येषु, वेद्यत्वसामान्यात् शब्दादिविषयसमानवृत्तिषु अहमिति उप-

अन्यत्रेति अवस्थातयात्मतत्त्वे वर्तन्ते तत्रैवान्तर्मुखे विश्राम्यन्ति स्फुटं स्वसाक्षिकं कृत्वा। अन्यथा क्षणिकज्ञानानां स्वात्ममात्रक्षीणत्वात्तत्संस्कारजन्मनामपि विकल्पानामनुभवागोचरे प्रवृत्त्यभावादनुसंधानमिदं न घटेत। चकारास्तुल्ययोगितापरा अनुसंधानं द्योतयन्ति। कीदृशेऽन्यत्र, सुखाद्यवस्थानुस्यूता उदयप्रलयिन्योऽनुस्यूता दृब्धा यस्मिंस्तस्मिन् सुखाद्यवस्थानुस्यूतेऽन्तःस्वसूत्रकल्पतया स्थिते। ता इत्यनेनानुसंधीयमानावस्थानां स्मर्यमाणतामभिदधत्क्षणिकज्ञानवादिमते ऽनुभवसंस्कारोत्पन्नत्वादर्थाकारारूषितत्वे ऽपि स्मृतेः काममनुभवसदृशत्वं भवतु, न त्वनुभवानुभूतातीतकालार्थव्यवस्थापकत्वं घटते, सर्वसंविदन्तर्मुखे तु प्रमातरि सति सर्वं युज्यत इति सूचितवान्,– इत्यलं सुकुमारहृदयोपदेश्यजनवैरस्यदायिनीभिराभिः कथाभिः। एतदर्थिभिः प्रत्यभिज्ञा परीक्ष्या। ग्रन्थकृतैव तु यत इह युक्तिरासूत्रिता ततोऽस्माभिः किंचिदुद्घाटितमिति सचेतोभिर्नास्मभ्यमसूययितव्यम्।

यत् सर्वत्र संविदात्मन एकरूपता एव विद्यतेति। परन्तु नास्य प्रश्नस्यावसरः–अहमिति। यतो हि अहं सुखी, अहं दुःखी, अहम् अनुरक्त इत्यादिरूपेण यो हि व्यवहारेऽनुभवो जायते स अन्तःकरणधर्मव्यतिरेकेण एवं शरीरेन्द्रियादिविकल्पज्ञानव्यतिरेकेण संवित्सत्तया सम्भवो भवति। सा च सर्वासु अवस्थासु निखिलेषु पदार्थेषु च सूत्रे मणिगणा इव अनुस्यूतरूपेण

लब्धात्मकेन एकेन रूपेण व्यापकतया स्थिते। यतः अहं सुखी दुःखी च इत्येवमादिषु प्रत्ययेषु उल्लसत्सु द्वौ अर्थौ स्फुरतः। एकः सुखाद्यात्मा वेद्यरूपः,–स वेद्यत्वादेव घटादिवत् अनित्यत्वेन नानात्वेन च प्रतिपद्यते; अहमिति अपरो वेदकरूपः,–स च पूर्वापरावस्थाव्यापकत्वेन समस्तप्रमातृप्रसिद्धः, सकलव्यवहारहेतोः अनुसंधानस्य कर्ता, नित्य उपलब्धृमात्ररूपत्वात् एक एव प्रकाशते। तत् एवम्,–यथा जाग्रदादिना हेतुना विभेदे प्रसर्पत्यपि अयम् अभिन्नस्वलक्षण एक एव, तथा जाग्रदाद्यवस्थान्तर्गतसुखित्वादिप्रत्ययसंतानेन हेतुना विभेदे प्रवर्तमानेऽपि अभिन्नस्वलक्षण एक एव; यतः इहापि योऽहं सुखी जातः, स इदानीं दुःखी रक्तो वा स्थित–इति एकानुसंधातृनिबद्धा एव अवस्थाः प्रतीयन्ते। तस्मात् अनन्तजन्तुसंतानवर्तिभिः अशेषैः अवस्थाविशेषैः ईषदपि अनुपजनितोलब्धृमात्रस्वभावान्यथाभावः, स्वयंसिद्धो, नित्यनिरावरणरूपत्वात् सर्वत्र अनिरुद्धः,तात्त्विकः स्वभाव एव शंकर इति। तत् एतत्—

'स च अनुस्यूत एव सर्वासु अवस्थासु' इत्यादिना व्याख्याय
'...................... स स्वभावः परः स्मृतः ॥

इति सिद्धान्तीकृतं वृत्तिकृता ॥ ४ ॥

मीमांसकपरिहाराय तु एतदित्थं व्याख्यातव्यम्। अहं सुखीत्यादिसंविदो यास्ता अन्यत्रेति पुर्यष्टकस्वरूपे प्रमातरि सुखाद्यवस्थाभिरनुस्यूते ओतप्रोतरूपे स्फुटं लोकप्रतीतिसाक्षिकं वर्तन्ते तिष्ठन्ति, न त्वस्मदभ्युपगतेऽस्मिंश्चिदानन्दघने शंकरात्मनि स्वस्वभावे,—इति न सर्वदा सुखाद्युपाधितिरस्कृतोऽयमात्मापि तु चिन्मयः। यदा तु निजाशुद्धया वक्ष्यमाणयायं स्वस्वरूपं गूहयित्वा तिष्ठति तदा पुर्यष्टकाद्यवस्थायां सुखित्वादिरूपतास्य तत्रापि न निरोधस्तैः सुखादिभिरस्येत्युक्तमेवेति न तत्तिरस्कृतोऽयं कदाचिदपि। अहं कृशोऽहं स्थूल इत्यादिप्रतीतिपरिहारेण अहं सुखी दुःखीत्यादि वदतोऽयमाशयः—सुखित्वादिप्रतीतिसंभिन्नां पुर्यष्टकभूमिमन्तर्मुखे पदे निमज्जयंस्तदनुषंगेण बाह्यस्यापि देहघटादेर्गलनात्प्रत्यभिजानात्येव स्वं शिवस्वभावत्वमिति सर्वथा पुर्यष्टकशमनायैव यत्न आस्थेय इति ॥ ४ ॥

तिष्ठति। अत एव अहं सुखी इत्यादिषु अनुभवितुः सत्ता न भिन्ना वर्तते। यद्यपि सर्वेषु वेद्यवस्तुषु तिष्ठन्नपि पुष्करपलाशवत् वेद्यदोषैः नैव लिप्यते। अयमेव भगवतः परमशिवस्य स्वतन्त्रस्वभावः अर्थात् यथा अग्नेः दाहकत्वस्वभावः, जलस्य शैत्यस्वभावः, बीजस्य अंकुरजननस्वभावस्तथैव अस्य संविदात्मनः जगदुत्पत्त्यादिस्वभावः ॥ ४ ॥

**एवं स्वस्वभावस्य शिवत्वेन व्यपदेशो युक्त इति उपपाद्य, इदानीं तस्य संग्रहेण लक्षणम् अनुवदन् परमार्थसत्तां प्रतिपादयितुम् आह—**

उक्तोपपत्तिसिद्धां समस्तवादानामनुपपन्नतामनुवदन्नुपपत्तिसिद्धं स्पन्दतत्त्वमेवास्तीति प्रतिजानाति युक्त्यनुभवागमज्ञो रहस्यगुरुप्रवरः—

**न दुःखं न सुखं यत्र न ग्राह्यं ग्राहकं न च ।**
**न चास्ति मूढभावोऽपि तदस्ति परमार्थतः ॥ ५ ॥**

तस्य चायं स्वभावो यत् सुख-दुःख-ग्राह्यग्राहक-मूढतादि-भावैरस्पृष्टः । स एव च परमार्थतोऽस्ति नित्यत्वात् । सुखादय पुनः संकल्पोत्था क्षणभङ्गुरा आत्मस्वरूपबाह्याः शब्दादिविषयतुल्या । न च, सुखादिस्वरूपो यदा नासौ तदा पाषाणप्रख्य एव ॥ ५ ॥

**'तत्' वक्ष्यमाणविशेषणं वस्तु स्वस्वभावशब्दवाच्यं 'परमार्थतः' तत्त्वतः अस्ति, तद्व्यतिरिक्तं सर्वम् असत्यसद्भावम् इत्यर्थः । किं तत् ? 'यत्र न दुखं, न सुखं, न च ग्राह्यं, न ग्राहको, न मूढभावोऽपि अस्ति । अनेन सुखादिरूपताप्रतिषेधेन वेद्यत्वम् अस्य प्रतिषिध्यते । द्विविधं हि वेद्यम्,– बाह्यम् आभ्यन्तरं च । तत्र आभ्यन्तरं सुखादि अन्तःकरणवेद्यत्वात् ; तत् यत्र नास्ति, प्रतिपादितविविक्तवेदकैकस्वभावत्वात् तस्य । बाह्यं तु शब्दादि**

इह यत्किंचिद्दुःखसुखाद्यान्तरं नीलपीतादिकं बाह्यं ग्राह्यं यच्चैतद्ग्राहकं पुर्यष्टकशरीरेन्द्रियादि तत्तावत्सौषुप्तवदसंचेत्यमानं स्फुटमेव नास्तीति वक्तुं शक्यम् । यदापि तु संचेत्यते तदा संचेत्यमानस्याप्यस्य चैतन्यमयत्वाच्चैतन्यमेवास्तीत्यायातम् । यदाहुः—
'प्रकाशात्मा प्रकाश्योऽर्थो नाप्रकाशश्च सिध्यति ।' ( ई०प्र० १ । ५ । ३ )
इति रहस्यतत्त्वविदोऽस्मत्परमेष्ठिनः श्रीमदुत्पलदेवपादाः श्रीमदीश्वरप्रत्यभिज्ञायाम् । इहापि वक्ष्यते—

'तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः' ( २ । ३ )

इत्थं स्वस्वरूपस्य शिवत्वप्रतिपादनं युक्तियुक्तं विविच्य सम्प्रति तस्य लक्षणं निरूपयन् परमार्थसत्ताम् उपदिदिक्षुराह-दुःखमिति । संवित्सत्तायां न सुख-दुःखाद्यद्वन्द्व-

वेद्यं, तत् ग्राह्यशब्देन निर्दिष्टं, श्रोत्रादिबाह्येन्द्रियगृहीतं हि तत् अन्तःकरणेन सुखाद्यात्मकं वेद्यते; तदपि यत्र नास्ति। न हि तस्य रूपं शब्दादिविषयात्मकत्वेन ग्राह्यताम् आपद्यते। ग्राहकोऽपि मायीयः प्रमाता अत्र विवक्षितः, न तु तात्त्विक उपलब्धृमात्रस्वरूपः, तस्य तस्य एवं नित्यसत्त्वेन प्रतिपाद्यमानत्वात्। एवं मायीयो देहाद्यहंकारमयो ग्राहकोऽपि यत्र नास्ति। ग्राहकमिति तु पाठे, ग्राहकम् इन्द्रियम् इति व्याचक्षते; तदपि यत्र नास्ति। एवं ग्राह्यग्रहणस्वरूपव्यतिरिक्तं ग्रहीतृमात्रस्वभावं यत् तत्त्वं तत् अस्ति इति।

ननु च एवं सति, मूढावस्थैव असौ इति प्रतिपादितं भवति, तस्यां हि सुखादिरूपताभावः। एतत् निराकर्तुम् आह,–'न चास्ति मूढभावोऽपि' इति,–मूढस्य भावो मूढत्वं वेद्यवेदनसामर्थ्याभावः; सोऽपि यत्र नास्ति न

इत्यतो दुःखसुखादि नीलादि तद्ग्राहकं च यत्र नास्ति तत्प्रकाशैकघनं तत्त्वमस्ति। नन्वेवं सर्वग्राह्यग्राहकोच्छेदे शून्यात्मैव तत्त्वमित्यायातं, नेत्याह न चास्ति मूढभावोऽपि इति। मूढभावो मूढत्वं शून्यरूपतापि यत्र नास्ति सोऽपि हि न प्रथते कथमस्ति, प्रथते चेत्तर्हि प्रथात्मकत्वान्नासौ कश्चित्प्रथैवास्ति, न च प्रथायाः कदाचिदभावो भवति तदभावे प्रथाभावस्याप्यसिद्धेः। भविष्यति चैतत्—

'न तु योऽन्तर्मुखो भावः'। (१।१६) इत्यत्र। अपि च मूढभाव ऐश्वर्यात्मकविमर्शशून्यप्रकाशमात्रतत्त्वो ब्रह्मरूपोऽपि यत्र नास्ति यच्छ्रुत्यन्तविदः प्रतिपन्नाः 'विज्ञानं ब्रह्म' इत, तस्यापि स्वातन्त्र्यात्मकस्पन्दशक्तिं विना जडत्वात्। यथोक्तं प्रत्यभिज्ञायाम्—

स्वभावमवभासस्य विमर्शं विदुरन्यथा।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः॥' (ई० प्र० १।५।११)

इति। भट्टनायकस्तोत्रेऽपि

'नपुंसकमिदं नाथ परं ब्रह्म फलेत्कियत्।
त्वत्पौरुषी नियोक्त्री चेन्न स्यात्त्वद्भक्तिसुन्दरी॥'

इति। एवं च 'यत्र स्थितम्' इत्यतः प्रभृति यत्तत्त्वं विचारितं तदेवास्ति, तच्चास्त्येव परमार्थतो युक्त्यनुभवागमसिद्धेन रूपेण, परमार्थत एव चाकल्पितेन पूर्णेन रूपेणास्ति न तु नीलादिवत्कल्पितेन। यथोक्तं महागुरुभिः

प्रसक्तिर्नवा ग्राह्य-ग्राहकतायाः संभवः। न च तत्र अज्ञानस्य आवरणम्। वस्तुतः तदेव तत्त्वं सद्रूपं यद्धि त्रिकालाबाधितं वर्तते। द्वन्द्वजातं हि प्राणिनाम् अन्तःकरणधर्मः।

विद्यते; यतः तस्यापि अवस्थान्तरे मूढोऽहमासम्–इति प्रत्यवमृश्यमानत्वात् वेद्यत्वं स्थितमेव, केवलं तत्कालमनुपलम्भः। वेद्यत्वसद्भावे च मूढावस्थायाः कथं वेदकैकस्वभाववस्तुरूपत्वं स्यात्? यद्येवं मूढभावोऽपि तत्र नास्ति, तत्प्रतिपत्तिगोचरसमस्तवेद्यवस्तुरूपताप्रतिषेधात् अभावमात्रं तत्,–इति प्रतिपादितं स्यात्। तत्प्रतिक्षेपार्थम् आह,–'तदस्ति परमार्थतः' इति;– यत् एवंविशिष्टतया व्याख्यातं, तत् वस्तु परमार्थतः अस्ति, सततम् अविलुप्तोपलब्धृमात्रलक्षणस्वभावत्वात्। यत् पुनः सुखादि, तत् कल्पनामात्रलब्धात्मकं क्षणभङ्गुरं सर्वदा वेद्यमेव, वेदकैकस्वभावात् आत्मनो दूरभिन्नम्। अतो यत् यत् वेद्यभूमिकायां वर्तते, तत् सर्वम् असत्, अनित्यत्वात्। यस्तु वेदकः, स एक एव परमार्थसन् इत्यर्थः। तत् इदं—

'तस्य चायं स्वभाव' इत्यादिना ग्रन्थेन वृत्तिकृता व्याख्यातम्॥५॥

'एवमात्मन्यसत्कल्पाः प्रकाशस्यैव सन्त्यमी।
जडाः प्रकाश एवास्ति स्वात्मनः स्वपरात्मभिः॥' (अजड प्र० १३)

इति। तत्रभवद्भर्तृहरिणापि—

'यदादौ च यदन्ते च यन्मध्ये तस्य सत्यता।
न यदाभासते तस्य सत्यत्वं तावदेव हि॥'

इति। सावधारणत्वात्सर्ववाक्यानामेवकारोऽत्र त्रियोज्यः। एवमनेन सूत्रेण सुखाद्याकारसंवित्संतानवादिनां सुखादिकलुषितप्रमातृतत्त्ववादिनां ग्राह्यग्राहकनानात्ववादिनां सर्वेषामभाववादिनां निष्परामर्शप्रकाशब्रह्मवादिनां च मतमनुपपन्नत्वादसत्त्वेनानूद्य पारमार्थिकं स्पन्दशक्तिरूपमेव तत्त्वमस्तीति प्रतिज्ञातम्। अथ च यस्मिन्नस्मिन् सोपदेशसावधानमहानुभावपरिशील्ये स्फुरत्तासारे स्पन्दतत्त्वे स्फुरति दुःखसुखग्राह्यग्राहकतदभावादिकमिदं सदपि न किंचिदेव सर्वस्यैतच्चमत्कारैकसारत्वात्तदेवैतदस्तीत्युपदिष्टम्। यन्महागुरवः

'दुःखान्यपि सुखायन्ते विषमप्यमृतायते।
मोक्षायते च संसारो यत्र मार्गः सशाङ्करः॥' (उ० स्तो०। २०। १२)

इति। शांकरो मार्गः शंकरात्मस्वभावप्राप्तिहेतुः पराशक्तिरूपः प्रसरः॥५॥

एतच्च तरङ्गवत् उत्तिष्ठति विनश्यति च। आत्मस्वरूपं सर्वतो भिन्नमपि तत्तदिन्द्रियग्रहणसामर्थ्यं प्रदाय अनुभविता भवति। अत एव न घटवद् अयं जडस्वभावः, अपितु ततो विलक्षणः॥ ५॥

**इदानीम् अस्य परमार्थसत आत्मन एव शिवस्य समस्तवस्तुसंपादनस्वतन्त्रशक्तित्वप्रतिपादनपूर्वम् उपादेयतमत्वम् उपदेष्टं युगलकमाह––**

एवमुपपत्तिपरिघटिततत्त्वप्रत्यभिज्ञानाय साभिज्ञानमुपायं निरूपयति

**यतः करणवर्गोऽयं विमूढोऽमूढवत्स्वयम् ।**
**सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृतीः ॥ ६ ॥**
**लभते तत्प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।**
**यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ॥ ७ ॥**

यतः करणवर्गस्य अन्तश्चक्रसहितस्य विमूढस्याप्यमूढवत् उत्पत्तिस्थितिनिरोधाः, सोऽन्येषां चैतन्यापादने समर्थः कथं निःस्वभावः । तस्मात् तत् तत्त्वं यत्नेन परीक्षितव्यं योगिना । यथास्य करणादिषु चैतन्यदाने स्वातन्त्र्यम्, तथा परपुरादिष्वपि सम्भाव्यते; स्वातन्त्र्यस्य स्वस्वभावभूतस्य सर्वत्राकृतिमस्याभ्यासात् यतो व्यक्तिः ॥ ६–७ ॥

**'तत् तत्त्वं' स्वस्वभावाख्यं वस्तु परमार्थसत्वेन अवस्थितं, प्रयत्नेन' प्रकृष्टेन यत्नेन सततम् अविलुप्तेन उद्योगेन, 'आदरात्' श्रद्धातिशयात्, 'परीक्ष्यं' सर्वासु अनुभवदशासु वक्ष्यमाणोपदेशानुसारेण क्रमेण, वेद्यवेदकलक्षणराशिद्वयविभजनपरतया, वेदकस्वरूपपरामर्शात् आत्मत्वेन स्फुटीकार्यम् । 'यतः तस्य इयम्' अधुनैव प्रस्तुतव्याख्याना 'स्वतन्त्रता' स्वेच्छामात्राधीनसकलकार्यकर्तृत्वरूपा 'सर्वत्र' सर्वस्मिन् देहे दशाविशेषे वा**

तन्निर्णीतं तत्त्वमादरात् श्रद्धया प्रयत्नेन च उद्यमो भैरवः' (१ । ५) इति शिवसूत्रप्रतिपादितेन सर्वभेदोपसंहारात्मना निजौजोवृत्तिस्फारणरूपेण परिपूर्णान्तर्मुखस्वरूपसेवनात्मना भैरवरूपेणोद्यमेन परीक्ष्यम् । यत इयमिति सर्वस्य स्वसंविदिता तस्य शंकरात्मनः स्वस्वभावस्याकृत्रिमा सहजा स्पन्दतत्त्वरूपा स्वतन्त्रता सर्वत्र जडाजडविषये स्फुरन्ती स्थितेति शेषः । किं तत्तत्त्वमित्याह यत इत्यादि लभत इत्यन्तम् । अयमिति लोकप्रसिद्धो गोल-

पूर्वं भगवतः परमशिवस्य नित्यत्वस्वरूपमुक्त्वा इदानीं श्लोकद्वयेन विश्वस्य अणुपरिमाण्वादि निखिलवेद्यवस्तुषु तदीयस्वरूपं पूर्णमस्ति, इत्याह—यत इति । पारमेश्वर्याः स्पन्दशक्तेः सम्बन्धमात्रेण आन्तरबाह्यकरणवर्गेषु चैतन्यं जायते । यतः करणवर्गेषु स्वतः

अवस्थितस्यापि 'अकृत्रिमा' सहजैव, न तु उपादानसहकार्यादिकारणान्तरापेक्षिणी,—यतः संसारिणामपि तत्स्वातन्त्र्यमहिम्नैव समस्तव्यवहारसंपत्तिः; मायाव्यामोहवशात् तु सत्यस्वभावपरामर्शाभावात् सर्वः संसारी परतन्त्र इव व्यवहरति सर्वक्रियासु व्यतिरिक्तकारणापेक्षसर्वार्थसिद्धिकत्वात्,— तस्मात् स्वाभाविकस्वातन्त्र्यप्राप्तये तत् तत्त्वं परीक्ष्यम्, न तु सुखदुःखमोहग्राह्यग्राहकरूपप्रतिषेधात् तत् अवस्तुभूतम् अवगन्तव्यम् इति उपदिष्टम्। इदानीम् 'इयम्' इति निर्दिष्टां स्वतन्त्रतां प्रतिपादयितुं यच्छब्दविशिष्टं विशेषणां व्याख्यायते।—किं तत् तत्त्वं परीक्ष्यं? 'यतो' यस्मात् 'अयं करणवर्गः' करणानां श्रोत्रादीनां बाह्यानां, मनःप्रभृतीनाम् आभ्यन्तराणाम् इन्द्रियाणां वर्गः त्रयोदशकरणसमूहः 'प्रवृत्तिस्थितिसंहृतीः लभते' 'प्रवृत्तिः' जिघृक्षितार्थोन्मुखतासमुन्मिषदवस्था, 'स्थितिः' गृहीतार्थविश्रा-

कादिरूपो न तु शास्त्रितस्तस्य नित्यपरोक्षत्वेनायमिति निर्देशाभावात्, करणवर्गस्त्रयोदशेन्द्रियाणि विशेषेण मूढो मायावशाज्जडाभासीभूतोऽणोर्मूढादप्यधिकं मूढत्वं प्राप्तोऽमूढवच्चेतनवत्स्वयं प्रवृत्तिस्थितिसंहृतीर्लभते विषयोन्मुखीभवति तत्र रज्यते ततश्च निवर्तत इत्यर्थः। कथं सहान्तरेण चक्रेण, इहान्तरं चक्रं करणेश्वर्यो नान्तःकरणानि तेषां वर्गशब्देन स्वीकारात्, न वक्ष्यमाणं पुर्यष्टकं तत्स्थस्यान्तःकरणत्रयस्य वर्गशब्देनैव गृहीतत्वात्, तन्मात्राणां च वासनामात्ररूपाणामुपदेश्यमयोगिनं प्रति साक्षात्प्रवृत्त्यादिकर्तृत्वेनासिद्धेः, योगिनस्तु साक्षात्कृततन्मात्रस्य स्वयमेव परतत्त्वपरिशीलनावहितस्योपदेश्यत्वाभावात्; तस्मादेतदेकीमयतमसत्। विमूढोऽमूढवदित्यनेन करणवर्ग एव संबन्ध्यो, नत्वान्तरमपि करणेश्वरीचक्रं तस्य चिच्चमत्काररूपत्वात्। एवमभिदधानस्यायमाशयः, यदयं शंकरात्मा स्वस्वभावोऽतिदुर्घटकारिणः स्वातन्त्र्याद्युगपदेव संवित्तिसारं च करणेश्वरीचक्रं जडाभासरूपं च करणवर्गमेकतयैव निर्भासयन् प्रवृत्तिस्थितिसंहृतीः कारयति येन भगवत्यः करणेश्वर्यो यथा तत्तद्भावसृष्ट्यादि विदधति तथा करणवर्गो

किमपि सामर्थ्यं नास्ति। तेषां श्रोत्रादिबाह्यानां मनःप्रभृति-आभ्यन्तरत्रयोदशकरणानाम् अचेतनस्वभावत्वात्। स्पन्दरूपा चितिशक्तिस्तत्र स्रोतोरूपेण प्रवाहिता सती चेतनत्वं ददाति। अत एव इदं कथमपि स्वीकर्तुं न शक्यते यत् अचेतनपदार्थेषु चैतन्यसमर्पणशक्तिस्तस्य न विद्यते। अचेतनेषु चैतन्यविधुरेषु चैतन्यप्रदानसामर्थ्यं मूलतः चिद्रूपस्य परमेश्वरस्य अस्ति स्वभावः। अनेन शरीरेन्द्रियबुद्धिप्राणादीनां चेतनत्वं समर्प्य स्वकीयकल्पनया तत्तत्कार्यकरणक्षमत्वं जायते। इत्थं च तद्भिन्नस्य अच्युततत्त्वस्य लोहचुम्बकवत्-

न्त्यवस्था, 'संहृतिः' कृतकृत्यत्वात् बाह्यार्थपरित्यागे स्वव्यापारोपरमः प्रत्यस्तमयावस्था, एताः 'लभते' प्राप्नोति। कीदृशः करणवर्गः ? 'विमूढः' प्रायशो जडतयैव प्रसिद्धः। कथं लभते ? 'अमूढवत्' चेतनवत्। एतत् उक्तं भवति प्राकृतं जडमपि एतत् बाह्याभ्यन्तरम् इन्द्रियचक्रं प्रवृत्त्यादि-चेतनव्यापारसमर्थं यत्संस्पर्शबलात् भवति, तत् तत्त्वम् आत्मत्वेन स्फुटीकृतं सत् इन्द्रियचैतन्यापादनस्वातन्त्र्यवत सर्वविषयस्वातन्त्र्यलाभाय कल्पते एव; अतः परीक्ष्यं, येन अभ्यासदशायामेव अभिव्यज्यमाने स्वातन्त्र्ये परशरीरावेशादिक्रीडा उपपद्यते। तत् इदम्--'न च सुखादिरूपो यदा नासौ' इत्यादिना--'तस्मात्तत्त्वं यत्नेन परीक्षितव्यम्' इत्यादिना च पृथक् व्याख्यातं वृत्तौ॥ ६-७॥

जडोऽपि तत्कारीव लक्ष्यते। यद्यपि रहस्यदृष्टौ न कश्चिज्जडः करणवर्गोऽस्ति अपितु विज्ञानदेहाः करणेश्वर्य एव विजृम्भन्ते तथापीह सुप्रसिद्धप्रतीत्यनु-सारेणोपदेश्यः क्रमेण रहस्यार्थोपदेशेऽनुप्रवेश्य इत्येवमुक्तम्। एवं च गोल-कादिरूपकरणवर्गप्रवृत्त्यादिक्रमेण तदधिष्ठातृरूपं निजमरीचिचक्रं चिन्वानेनैव तदुभयप्रचोदकं श्रीमच्छङ्करात्मकं स्वस्वरूपं परीक्षणीयं, यतस्तत्प्राप्तौ तदीयाकृत्रिमा स्वतन्त्रतास्य योगिनः स्यादित्यप्यनेनैवोक्तं भवति। तदेतदेव परीक्षणार्हं परमोपादेयत्वादेतदेव च परीक्षितुं शक्यमुक्तयुक्त्या सुखोपाय-त्वात्, अत एवादरेणाभिलषितविषयोपभोगानिरोधात्मना बहुमानेन। अत्र परीक्षणस्येहत्योपदेशानुसारेण प्राप्तकालता। यथोक्तं रहस्यगुरुभिः—

'निजनिजेषु पदेषु पतन्त्विमाः करणवृत्तय उल्लसिता मम।
क्षणमपीश मनागपि मैव भूत्त्वदविभेदरसक्षतिसाहसम्॥' (उ०स्तो०८।७)

इति। परीक्ष्यमित्यर्हे शक्ये प्राप्तकालतायां प्रैषादौ च कृत्यः। अथ च जडः करणवर्गो यद्बलादमूढवत्प्रवृत्त्यादि लभते इति सर्वस्यानुभवसाक्षिकम-भिदधदिन्द्रियादिचैतन्यवादिचार्वाकमतमप्यनेत व्युदस्तवान्॥ ६-७॥

इन्द्रियागोचरस्य करोति। शरीरादयस्तु तस्य साधनमात्राण्येव। यदि तेषु कार्यकरण-क्षमत्वं स्वत एव अस्तीति स्वीक्रियते, तदा तु मरणोत्तरमपि सा दृश्यते। अतः श्रद्धातत्परतासंयतेन्द्रियैः साधकपुरुषेण यथार्थत्वं परीक्ष्यैव स्वाभाविकस्वातन्त्र्यशक्ति-रर्जनीया। यथोक्तं गीताशास्त्रे भगवता श्रीकृष्णेन—

ततः पदं तत्परमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः।
तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी॥ १५-४॥

तस्मात् सर्वतोभावेन एकाग्रमनसा तस्य स्वस्वरूपस्य अनुसंधानं विधेयम्॥६--७॥

ननु किमिदम् उच्यते,–तत् किंचित् तत्त्वं परीक्ष्यं यद्वशात् इन्द्रियाणि चेतनीभवन्तीति, किल एवं व्यवहारो व्यवस्थितः,–सर्वः कश्चित् चेतनः प्रमाता धर्माधर्मसंबन्धात् इच्छाख्येन गुणेन संयुज्यमानो हेये उपादेये वा विषयभूते प्रयत्नवान् भूत्वा, तेनैव इच्छाख्येक गुणेन करणवर्गं जडमेव तत्तद्विषयहानोपादानादौ प्रेरयति; स च तत्प्रेरितो जड एव दात्रादिवत् स्वकार्यं करोति। तत् कथमुक्तम्;–यतः कारणभूतात् अमूढवत् प्रवृत्त्यादि लभते इति; व्याख्यातं च,–यत्संस्पर्शबलात् एव हेतोः प्रवृत्त्यादिचेतनव्यापारसंपादनसमर्थो भवति ?–इत्याशङ्क्य यथा एष करणवर्गः चेतनीभवति तथा संसारिपुरुषस्य व्यवहारप्रदर्शनेन स्फुटोकर्तुमाह––

अथ कथमुक्तं ततस्तत्त्वाच्चेतनतामिवासाद्येन्द्रियाणि स्वयं प्रवृत्त्यादि लभन्त इति, यावतायमेव ग्राहक इच्छया दात्रादीनीव करणानि प्रेरयति। यदप्युक्तं तत्तत्त्वं प्रयत्नेन परीक्ष्यम् इति तदपि कथं, यतोऽस्माकमिच्छा बहिरेवानुधावति न तु तत्त्वपरीक्षायां प्रवर्तितुमुत्सहत् इत्याशङ्कमाह—

न हीच्छानोदनस्यायं प्रेरकत्वेन वर्तते।
अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेत् ॥ ८ ॥

न च इच्छाप्रेषणेन करणानि प्रेषयति, अति तु स्वस्वरूपे स्थित्वा केवलं यादृशी तस्येच्छा प्रवर्तते तथाविधमेव स बाह्यान्तरं कार्यमुत्पादयति, तेन न करणविषयमेव सामर्थ्यम्, किं तु तस्य सर्वत्र ॥ ८ ॥

'नहि' न खलु 'इच्छानोदनस्य' इच्छैव नोदनं, नुद्यते अनेन इति प्रतोदादि करणं, तस्य 'प्रेरकत्वेन' इन्द्रियवर्गं प्रति चोदकत्वेन असौ पुरुषः संसारी प्रमाता 'वर्तते' अवतिष्ठते। यथा कश्चिद् देवदत्तादिः केनचित् करणभूतेन हस्तादिना जडं प्रतोदादि प्रेरयति, न एवम् 'अयम्' आन्तरः 'पुरुषः' इच्छया जडं करणवर्गं स्वविषये प्रवर्तयति; 'अपि तु आत्मबल-

अयं लौकिकः पुरुष इच्छैव नोदनं प्रतोदस्तस्य प्रेरकत्वेन करणप्रवर्तनार्थव्यापारणाय यस्मान्न प्रवर्तते, अपि तु आत्मनश्चिद्रूपस्य यद्बलं स्पन्दतत्त्वात्मकं तत्स्पर्शात्तत्कृतात्कियन्मात्रादावेशात्तत्समो भवेत्, अहन्तारसविप्रुडभिषेकादचेतनोऽपि चेतनतामासादयत्येव। ततस्तत्तत्त्वं न केवलं

ननु माहेश्वर्याः स्पन्दनाशक्तेः इन्द्रियादिकरणानां स्वस्वविषयोन्मुखकरणमेव एकमात्रव्यापारोऽस्ति चेत्तर्हि मोहबन्धनबद्धानां पशुप्रमातृणां स्थितिः काष्ठपुत्तलिकावत्

**स्पर्शात्' आत्मनः परस्य प्रमातुः सर्वकर्तुः ईश्वरस्यैव स्वभावस्यैवयत् बलं सामर्थ्यं कारणान्तरनैरपेक्ष्येण अखिलवस्तुसंपादनशक्तता, तत्स्पर्शात्। तत्संपर्कात् 'तत्समो भवेत्' तेन आत्मशब्दोक्तेन परेण कर्त्रा तुल्यः संपद्यते। इदमत्र तात्पर्यम्,—यत्रैव स्वस्वभावे स्थित्वा आत्मशब्दप्रतिपादितः परमेश्वरो जगदिदं प्रवृत्तिस्थितिसंहृतीः यथेष्टं लम्भयितुं स्वतन्त्रः, तत्रैव स्थित्वा पुरुषोऽपि अयं संसारी करणवर्गं स्वविषये प्रवृत्त्यादि लम्भयितुं स्वतन्त्रः, तेन तत्समो भवेत् इति उक्तम्। ततो यथा ईश्वरः सर्वव्यापिकाभ्यां ज्ञानक्रियाख्याभ्यां शक्तिभ्यां, विश्वं प्रवृत्त्यादि प्रापयन सर्वं जानाति च करोति च, तथा पुरुषः तद्बलस्पर्शादेव उपजातज्ञत्वकर्तृत्वसामर्थ्यो मायावशात् नियतविषयाभ्यां ज्ञानक्रियाशक्तिभ्यां अन्तर्बहीरूपकरणवर्गतया प्रसृताभ्यां स्वविषयं जानाति च करोति च,—इति तत्साम्यम् अस्य उक्तम्—**

**'न च इच्छाप्रेरणेन करणानि प्रेरयति' इत्यादि विवृतमेतत् वृत्तौ॥८॥**

करणानि यावत्तत्प्रेरकत्वेन शङ्कितं कल्पितमपि प्रमातारं चेतनीकृत्य स्वयं प्रवृत्त्यादिपात्रं करोति येनास्यायमभिमानोऽहं करणानि प्रेरयामीति। स्पन्दतत्त्वानुवेधं विनापि तु स एव न किंचिदिति करणानां ग्राहकस्य च स्वरश्मिचक्रप्रसरानुवेधेन चेतनीभावापादकं तत्त्वं परीक्ष्यमिति युक्तमेव। यदि पुनरिच्छाख्येन प्रतोदरूपेण करणान्तरेण करणानि प्रेरयेत् तदपीच्छाख्यं करणं प्रेर्यत्वात्करणान्तरं स्वप्रेरणायापेक्षेत तदप्यन्यदित्यनवस्था स्यात्। यत्तूक्तम् 'अस्माकमिच्छा न तत्र प्रवर्तितुमुत्सहते' इति तत्राप्याद्यं श्लोकार्धमभ्युपगमेन, परं तूत्तरतया योज्यम्। सत्यं, नायं पुरुषस्तत्त्वपरीक्षार्थमिच्छां प्रवर्तयितुं शक्नोति नेच्छया तत्त्वं विषयीकर्तुं क्षमस्तस्याविकल्प्यत्वादपि तु विषयाननुधावन्तीमिच्छां तदुपभोगपुरःसरं प्रशमय्य यदा त्वन्तर्मुखमात्मबलं स्पन्दतत्त्वं स्वकरणानां च चेतनावहं स्पृशति तदा तत्समो भवेत् तत्समावेशात्तद्वत्सर्वत्र स्वतन्त्रतामासादयत्येव, यस्मादेवं तस्मात्तत्त्वं परोक्ष्यमित्यर्थः। शक्तिभूमेः स्पर्शप्रधानत्वादात्मबलस्पर्शादित्युक्तम्॥ ८॥

भवेत्। यत उक्तशक्तिरूपांकुशेन आक्रान्ता एव जातेति चेत् उच्यते नेयं शंकासमीचीना—न हीति। पशुप्रमाता पारमेश्वरीच्छाशक्तेरंकुशरूपायाः न प्रेरकः, अपि तु प्रमातुः यादृशी इच्छा हृदि वर्तते तदनुरूपायाः सृष्टेः बाह्यान्तरकार्याणां रचनां कुर्वन्नास्ते। अत एव अधिकारिणां प्रमातॄणां स्वस्वविषयेषु इन्द्रियसंघेषु प्रवृत्तिमत्सु सत्स्वपि सह एव स्वस्वरूपात्मनः यदुद्गमस्थानं वर्तते तदपि आत्मसात् करोत्येव। अनया रीत्या स्वातन्त्र्यस्य परिपूर्णबोधरूपावस्थाऽपि तेषु समागच्छति। अनन्तरं सर्वप्रकारेण पशुभावं परित्यज्य शिवस्वरूपे समाहितो जायते॥ ८॥

ननु स्वव्यापारे करणवर्गं प्रवर्तयन् पुरुषः ईश्वरभूमिकासादनात् तद्वत् स्वातन्त्र्यम् आप्नोति,—इति तयोः ईश्वरपुरुषयोः अभेदः एव प्रतिपादितः स्यात्; कथं भेदनिबन्धनम् ईश्वरसाम्यं पुरुषस्य प्रतिपादितं तस्यां दशायाम् ?—इत्यत आह—

ननु चायं क्षेत्री परमेश्वरमयोऽपि किं न सदा पारिपूर्ण्येन स्फुरति, कस्मादन्तर्मुखात्मबलस्पर्शमपेक्षत इत्याशङ्क्याह—

निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः ।
यदा क्षोभः प्रलीयत तदा स्यात्परमं पदम् ॥ ९ ॥

स चास्य आत्मबलस्पर्शः सहजया अशुद्ध्या व्याप्तस्य कार्यमिच्छतोऽपि न भवति, किन्तु यदा क्षोभः 'अहमिति' प्रत्ययभावरूपोऽस्य प्रलीयेत, तदास्य भवति परमे पदे प्रतिष्ठानम् ॥ ९ ॥

सत्यम्, अस्ति अभेदः तस्याम् अवस्थायाम् अनयोः। किन्तु अयं पुरुषो 'निजया' सहजया देहाद्यात्मप्रतिपत्तिमूलरागादिरूपया 'अशुद्ध्या' मलेन हेतुना 'अभिलाषी' क्षणिकसुखलवलुब्धः, तयैव च तत्साधनभूतविषयावाप्तिहेतुषु 'कर्तव्येषु' क्रियासु 'असमर्थः' शक्तिदरिद्रो—यतः इच्छन् अपि अभिमतं न आप्नोति—; एवंविधस्य अस्य 'यदा' यस्मिन् काले 'क्षोभः' प्रतिनियतशरीराद्यालम्बनाहंप्रत्ययात्मा मायीय उपप्लवः 'प्रलीयते' कृत्रिमालम्बनोत्तीर्णस्वाभाविकाहंप्रत्ययप्रभाकरप्रकाशसंपर्कात् प्रालेयपटलवत् विगलेत् विनश्येत्; 'तदापरमं' निरुत्तरं 'पदं' स्थानं 'स्यात्' सद्भावेन

निजा स्वात्मीया स्वस्वातन्त्र्योल्लासिता येयं स्वरूपाविमर्शस्वभावा इच्छाशक्तिः संकुचिता सत्यपूर्णम्मन्यतारूपा अशुद्धिराणवं मलं, तन्मलोत्थितकञ्चुकपञ्चकाबिलत्वात्; ज्ञानशक्तिः क्रमेण भेदसर्वज्ञत्वकिञ्चिज्ज्ञत्वान्तःकरणबुद्धीन्द्रियतापत्तिपूर्वमत्यन्तं संकोचग्रहणेन भिन्नवेद्यप्रथारूपं मायीयं मलमशुद्धिरेव, क्रियाशक्तिः क्रमेण भेदसर्वकर्तृत्वकिंचित्कर्तृत्वकर्मेन्द्रियरूप-

जीवशिवयो न स्वरूपगतः कश्चन भेदो वर्तते । अस्यां दशायां परमेश्वरसमानधर्मत्वं पुरुषः प्राप्नोतीति निरूपणस्य प्रकृते कोऽभिप्रायः, वस्तुतस्तयोः परस्परमहद्वैलक्षण्यम् अनुभूयते अत आह—निजेति । यद्यपि इदं पारमार्थिकं सत्यमस्ति उभयोः प्रमात्रोरभेदस्तथापि व्यवहारदशायाम् औपाधिको भेदः स्वीक्रियते । तथाहि—योऽसौ पशुरूपप्रमाता वर्तते, तत्र अन्तःकरणस्वभावजनिताशुद्धिरूपस्य मलस्य वर्तमानत्वेन स्वयमेव असमर्थः सन्

प्रकाशेत—अभेदः आत्मपुरुषशब्दप्रतिपादितयोः परापरयोः संविदोः तस्यामेव दशायाम् उपलभ्यतया प्रथेत इत्यर्थः। तदेतत्—स्वस्वभावे प्रतिष्ठानम् इदम् ( इति ) अनेन श्लोकेन प्रतिपादितम्। उपपाद्यतां नाम दर्शनान्तरेषु तैस्तैः प्रकारैः अशुद्धिः अस्य पुंसः; इह तु एतावत्येव असौ,—यत् अचित्स्वरूपेषु अनित्येषु परतन्त्रेषु देहादिषु तद्विलक्षणार्थनिष्ठतया उपपन्नः अहं-प्रत्ययः प्रवर्तते; तावन्मात्रनिबन्धना हि सर्वाः संसारित्वप्रतिपत्तयः; तस्मिन्नेव विगलिते स्वस्वभावाभिव्यक्तिलक्षणा पराशुद्धिरिति यदुक्तम्—

'जाते देहप्रत्ययद्वीपभङ्गे प्राप्तैकध्ये निर्मले बोधसिन्धौ।
अव्यावर्त्यैवेन्द्रियग्राममन्तर्विश्वात्मा त्वं नित्यमेकोऽवभासि॥

तथा

'नात्माधीनत्वेऽपि विश्वं नियोक्तुं सर्वो हस्तादीनिवेष्टे यथेष्टम्।
बालो राजेवात्मशक्त्यप्रबोधात् त्वय्यन्तःस्थे सर्वशक्तिस्तु सर्वः॥

इति। तदेतत् तावत् स चास्य इत्यादिना वृत्तौ व्याख्यातम्॥ ६॥

संकोचग्रहणपूर्वमत्यन्तं परिमिततां प्राप्ता शुभाशुभानुष्ठानमयं कामं मलमप्य-शुद्धिः, तया समर्थस्य पूर्णज्ञत्वकर्तृत्वविकलस्य तत एव कर्तव्येषु लौकिक-शास्त्रीयानुष्ठानेष्वभिलाषिणोऽभीष्टानवाप्तेर्नित्यमभिलाषव्याकुलस्य तत एव क्षणमप्यलब्धस्वरूपविश्रान्तेः, यदा उक्तवक्ष्यमाणोपपत्त्यनुभवावष्टम्भतोऽ-भिलाषविवशग्राहकाभिमानात्मा क्षोभः प्रलीयेत अनात्मन्यात्माभिमान-निवृत्तिपुरःसरमात्मन्यनात्माभिमानोपशान्तिपर्यन्तेन प्रकर्षेण लीयेत तदा परमं स्पन्दतत्त्वात्मकं पदं स्यादस्य प्रत्यभिज्ञाविषयतां यायादित्यर्थः। न तु तदैव भवति तस्य नित्यत्वात्। उक्तं च विज्ञानभैरवे—

'मानसं चेतना शक्तिरात्मा चेति चतुष्टयम्।
यदा प्रिये परिक्षीणं तदा तद्भैरवं वपुः॥' ( श्लो० १३८ )

इति। निजाशुद्धिशब्देन मलं नाम द्रव्यं पृथग्भूतमस्तीति ये प्रतिपन्नास्ते दूष्यत्वेन कटाक्षिताः॥ ६॥

नानाविधवासनावशात् तत्तद्बहिर्विषयान् अभिलषति तथा स्वात्मानं दरिद्रतासमुद्रे निमज्ज्य संकीर्णताम् अनुभवति। अत एव स स्वस्य निरतिशयपरमानन्दस्वरूपात् प्रच्युतो जायते। तस्मात् पशुप्रमातरि मोहवशात् पारमार्थिकात्मप्रकाशस्य अभावस्तिष्ठति। यदा तु पूर्वजन्मजनितपुण्यपाकेन देहेन्द्रियादिविषयेषु मिथ्याध्यासं परित्यज्य सर्वोपद्रवाद् रहितो भवति तदा परमे पदे प्रतिष्ठितो जायते, न कदापि ततः प्रच्युतो भवति॥ ९॥

ननु प्रलीनदेहाद्यहंप्रत्ययलक्षणक्षोभो निवातनिश्चलजलधिवत् सुप्रशान्तस्थितिः आत्मैव परमपदशब्दप्रतिपादितः; तत् कथं तद्बलस्पर्शात् पुरुषः तद्विलक्षणं क्षोभात्मकमेव धर्मम् आसादयेत्, येन युक्त इन्द्रियवर्गं प्रवृत्त्यादि लम्भयन्, अहं करोमि, अहं जानामि, इति स्वविषयं प्रतिपद्यमानः क्षुभित एव भवति ?—इति अनात्मज्ञानां मतिविभ्रमभङ्गायाह—

ननु च ग्राहकाहंभावात्मनि क्षोभे क्षीणे निस्तरङ्गजलधिप्रख्यमस्पन्दमेव तत्त्वं प्रसक्तमित्याशङ्कां शमयति—

**तदास्याकृत्रिमो धर्मो ज्ञत्वकर्तृत्वलक्षणः ।**
**यतस्तदेप्सितं सर्वं जानाति च करोति च ॥ १० ॥**

यतः तस्मिन् प्रलीनक्षोभात्मके काले अकृत्रिमः सहजो ज्ञत्वकर्तृत्वभावरूपो धर्मो यस्मात्, तस्मिन् एव प्राप्तयोगात्मके काले यत् यद् ज्ञातुम् इच्छति तत् तत् जानाति च करोति च, नान्यथा संसार्यवस्थायाम् ॥ १० ॥

'तदा' तस्मिन् यथोक्तक्षोभपरिक्षयोपलक्षिते काले, आत्मनः 'अस्य अकृत्रिमः' सहजसिद्धः सततमव्यतिरिक्तो 'ज्ञत्वकर्तृत्वलक्षणो धर्मः' गुणोऽस्त्येवेति शेषः; 'यतो' यस्मात् अव्यभिचारिणो गुणात् कारणभूतात्

तदेत्युपदेश्यापेक्षया अकृत्रिमः सहजो धर्मः प्राङ्निर्दिष्टस्वतन्त्रतारूपः परमेश्वरस्वभावो ज्ञकर्तृत्वे सामरस्यावस्थितप्रकाशानन्दात्मनो ज्ञानक्रिये लक्षणमव्यभिचारि स्वरूपं यस्य तादृक् तदा क्षोभोपशमेऽस्य पुरुषस्य स्याद-

ननु यस्य पुरुषस्य देहादिषु अहंप्रत्ययस्य क्षोभस्य वायुरहितसागरवत् प्रकृष्टप्रशान्तस्थितिं गतस्य आत्मैव मोक्षशब्देन प्रोक्तम् । परन्तु अत्रेयं स्वभाविकी शंका प्रवर्तते यद् देहेन्द्रियादिषु अहंप्रतीतिलक्षणक्षोभशून्यसामर्थ्यबलेन पुरुषस्तद्विलक्षणं क्षोभस्वरूपं धर्मं कथं प्राप्स्यति येन संयुक्तः सन् प्रवृत्त्यादि संप्राप्य 'अहं करोमि' इत्यादिना क्षुब्धः

'सर्वम्' अखिलम् 'ईप्सितं' ज्ञेयतया कार्यतया अवाप्तुमिष्टं वस्तु, स पुरुषः 'तदा' तस्यां दशायां सत्यस्वभावसंबन्धलक्षणयोगात्मिकायां, न तु अन्यदा-देहाद्यालम्बनाहंप्रतीतिसारसंसारिपुरुषदशायां 'जानाति च करोति च'। किम् उक्तं भवति ?–ज्ञत्वमुपलब्धृत्वं नाम अस्यात्मनोऽव्यतिरिक्तो गुणः; स च इदन्तावसेयस्य वतुस्नो ज्ञेयतया कार्यतया च द्वैविध्यात् द्वित्वेन उपचर्यते। वस्तुतः एकैव ईश्वरस्य स्वभावप्रत्यवमर्शरूपा शक्तिः; सा संवेदनरूपत्वात् ज्ञानशब्देन उच्यते, तावन्मात्रसंरम्भरूपत्वात् क्रियाशब्देन च उद्घोष्यते। स च एवंविधो धर्मः अस्य वेद्यत्वप्रतीत्युप्लवासंस्पृष्टे वेदकैकलक्षणे स्वभावे स्थितस्य सवज्ञतया सर्वकर्तृतया च विजृम्भते। यत् पुनः तादृक्स्वभावप्रत्यवमर्शाभावात् वेद्य एव देहादौ वेदकप्रत्ययनिबन्धनं ज्ञत्वं कर्तृत्वं च, तत् कृत्रिमं परमितविषयं च। तस्मात् आत्मनो ज्ञत्वकर्तृत्वलक्षणाव्यतिरिक्तधर्मता स्वभाव एव, न तु क्षोभावस्था। तादृशं च आत्मबलं स्पृशन् संसारिपुरुषः करणवर्गप्रवर्तनादिना स्वविषये ज्ञत्वकर्तृत्वाभ्यां युज्यमानस्तत्समो भवेत्–इति यत् उक्तं तदेव उपपन्नम्। तदेतत्––'यतस्तस्मिन्प्रलीनक्षोभात्मके काले' इत्यादिना वृत्तिकृत् व्याचष्ट ॥ १० ॥

भिव्यज्यत इत्यर्थः। कुत एतदभिव्यज्यत इत्याह, यतस्तदा परमपदप्रवेशसमये सर्वमीप्सितमिति यद्यज्जिज्ञासितं चिकीर्षितं वास्य तत्प्रविविक्षायामभूत् तत्तज्जानाति च करोति च। चकारावत्र यौगपद्यमाहतुः न तु यथैके चकाराभ्यां ज्ञानक्रिययोरैकात्म्यं सूचयतीति, तद्धि ज्ञत्वकर्तृत्वलक्षण इत्यनेनैवैकधर्मविशेषणेन संबन्धिनिर्देशेन वास्तवस्वरूपाभिधायिनोक्तम् ॥ १० ॥

स्यादिति अज्ञानां भ्रमं निरसितुमाह—तदिति। यदा देहेन्द्रियबुद्धिप्राणादीनाम् अवलम्ब्य जायमानमायिकक्षोभः सर्वथा निवृत्तो भवति, तदा पुरुषे स्वाभाविकज्ञातृत्वकर्तृत्वरूपधर्मयोस्तत्क्षणमेव आविर्भूतौ भवतः। इमां स्थितिं संप्राप्य स इष्टं वस्तुः स्वातन्त्र्येण परानपेक्षेण जानाति संपादयति च। यथोक्तम् ईश्वरप्रत्यभिज्ञायाम्—

एवमात्मानमेतस्य सम्यग्ज्ञानक्रिये तथा।
जानन्यथेप्सितान् पश्यञ्जानाति च करोति च ॥ ४–१–१५ ॥

यस्य पुरुषस्य विषयप्रवणं चित्तं भवति स तु संसरणशीलसंसारस्थितावेव निमग्नो जायते न तस्य तत्त्वज्ञानं न वा कर्तृत्वशक्तिः ॥ १० ॥

**इत्थम् आत्मस्वरूपम् उपपत्त्या व्यवस्थाप्य तत्प्रतिपत्तिफलं प्रदर्शयितुम् आह—**

अथ यतः करणेति निजाशुद्धीति सूत्रप्रतिपादितोन्मेषक्रमसमाधानसाक्षात्कृतस्य स्पन्दतत्त्वस्य दृढावष्टम्भाद्व्युत्थानमपि समाध्येकरसं कुर्वतो भवोच्छेदो भवतीत्याह—

**तमधिष्ठातृभावेन स्वभावमवलोकयन् ।**
**स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः ॥ ११ ॥**

तदेवम्, यतः सर्वानुस्यूतः सर्वसामर्थ्ययुक्तश्च आत्मस्वभावः, तस्मात् तम् अधिष्ठातृभावेन सर्वव्यापकत्वेन स्वभावं पश्यन्, विस्मयाविष्ट इव यस्तिष्ठति, तस्य कुत्सिता सृतिः सरणं न भवति ॥ ११ ॥

**'तम्' इति सर्वनाम्ना श्लोकदशकप्रतिपादितमात्मतत्त्वं प्रत्यवमृश्यते। 'तम्' एवंलक्षणं 'स्वभावम्' आत्मानम् 'अधिष्ठातृभावेन' सर्वशरीरेषु सर्वावस्थासु सर्वदा सर्वत्र अनुभवितृमात्रेण सर्वम् आक्रम्य अवस्थितत्वात्, अनन्याधिष्ठेयः अहमेव एकः स्वतन्त्रः परमेश्वर अधिष्ठाता**

उक्तोपपत्त्युपलब्ध्यनुशीलनप्रत्यभिज्ञातं तं स्पन्दतत्त्वात्मकं स्वभावमात्मीयमधिष्ठातृभावेन व्युत्थानदशायामपि व्याप्नुवन्तमवलोकयंश्चिन्वानः—

'न व्रजेन्न विशेच्छक्तिर्मरुद्रूपा विकासिते ।
निर्विकल्पतया मध्ये तया भैरवरूपधृक् ॥' ( वि० भै० २६ )

इति, तथा

सर्वाः शक्तीश्चेतसा दर्शनाद्याः स्वे स्वे वेद्ये यौगपद्येन विष्वक् ।
क्षिप्त्वा मध्ये हाटकस्तम्भभूतस्तिष्ठन्विश्वाकार एकोऽवभासि ॥'

इति श्रीविज्ञानभैरवकक्ष्यास्तोत्रनिर्दिष्टसंप्रदाययुक्त्या निमीलनोन्मीलनसमाधिना युगपद्व्यापक्रमध्यभूम्यवष्टम्भादध्यासितैतदुभयविसर्गारणिविगलितसकलविकल्पोऽक्रमस्फारितकरणचक्रः—

'अन्तर्लक्ष्यो बहिर्दृष्टिर्निमेषोन्मेषवर्जितः ।
इयं सा भैरवी मुद्रा सर्वतन्त्रेषु गोपिता ॥'

पूर्वोक्तश्लोकेन सयुक्तियुक्त्या आत्मनः स्वरूपं व्यवस्थापितम्, अधुना तत्त्वज्ञानस्य फलं प्रदर्शनाय आह—तमेति । यः कोऽपि योगी यदा स्पन्दात्मकात्मस्वरूपं सर्वत्रवेद्यवस्तुषु अनुस्यूतं कर्तुमकर्तुं समर्थं परमसत्यस्वरूपेण अनुभवति तदा स सर्वस्मिन् स्थाने

**इत्येवंरूपतया 'अवलोकमन्' उक्तया उपपत्तिदृशा वक्ष्यमाणया च उपलब्ध्युपदेशदृशा पश्यन् प्रत्यभिजानन् 'स्मयमान इव' विस्मृतपरप्रमातृरूपात्मतत्त्वप्रत्यभिज्ञानात् मायीयप्रमातृस्वरूपम् असत्यमपि इत्थं प्रथमानं विमृशन् विस्मयमिव आपन्नो 'य आस्ते' निर्विप्लवां स्थितिम् अनुभवति, 'तस्य' एवंलक्षणस्य योगिनः 'इयं' सुप्रसिद्धा देहाद्यहंप्रतीतिमात्रमूला 'कुसृतिः' जन्मजरामरणादिद्वन्द्वयोगात् कुत्सिता गर्हिता सृतिः सरणं नानायोन्यन्तरभ्रमणं 'कुतः'?—प्रतिपादितक्षोभरूपाया अशुद्धेः हेतुभूताया अभावात् आसीनस्य गतिरिव नास्त्येव इत्यर्थः। वृत्तिकृता च—'एवं यतः सर्वानुस्यूत एव अयमात्मा' इत्यादिना व्याख्यातमेतत् ॥ ११ ॥**

इत्याम्नातभगवद्भैरवमुद्रानुप्रविष्टो मुकुरान्तर्निमज्जदुन्मज्जन्नानाप्रतिबिम्बकदम्बकल्पमनल्पं भावराशिं चिदाकाश एवोदितमपि तत्रैव विलीयमानं पश्यन् जन्मसहस्रापूर्वपरमानन्दघनलोकोत्तरस्वस्वरूपप्रत्यभिज्ञानात् झटिति त्रुटितसकलवृत्तिः स्मयमानो विस्मयमुद्रानुप्रविष्ट इव महाविकासासादनाच्च सहसैव समुदितसमुचिततात्त्विकस्वभाववो यो योगीन्द्र आस्ते तिष्ठति न त्ववष्टम्भाच्छिथिलीभवति, तस्येयमिति सकलजगत्कम्पकारिणी कुत्सिता जननमरणादिप्रबन्धरूपा सृतिः प्रवृत्तिः कुतो निजाशुद्धिलक्षणस्य तद्धेतोरभावान्नैव भवतीत्यर्थः। यथोक्तं श्रीपूर्वशास्त्रे—

'तत्त्वे निश्चलचित्तस्तु भुञ्जानो विषयानपि।
नैव संस्पृश्यते दोषैः पद्मपत्रमिवाम्भसा॥
विषापहारिमन्त्रादिसन्नद्धो भक्षयन्नपि।
विषं न मुह्यते तेन तद्वद्योगी महामतिः॥' (मा०वि० १८।१२०)

इति ॥ ११ ॥

स्वस्वरूपात्मक चेतनायाः अधिष्ठातृत्वं अनुभूयते अर्थात् पारमार्थिकीं सव्यापकतां याथातथ्येन हृदि अनुभवरूपेण प्रकाशते। यथोक्तम् ईश्वरप्रत्यभिज्ञायाम्—

सर्वो ममायं विभव इत्येवं परिजानतः।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता ॥ ४-१-१२ ॥

यस्यां स्थितौ योगिनः दृष्टि ज्ञानात्मिका भवति एवञ्च सांसारिकी भावभंगीः, समुद्रे समुत्थिता ऊर्मीः, नीलगगने श्याममेघमण्डलीः, चन्द्रमण्डलनिर्गतामधुरचन्द्रिका स्वात्मनः सकाशादेव बहिर्विकसिता अनुभवन् महदाश्चर्यं व्यनक्ति। तस्य कथं जन्ममरणरूपा कुत्सिका गतिर्भवति अर्थात् कदापि नैव संभवति। स समस्तभवपाशैर्विनिर्मुक्तः सन् अनामयं मोक्षाख्यं पदं प्राप्नोति ॥ ११ ॥

**इदानीं समस्तवेद्यधर्मविरहितस्वरूपस्यात्मतत्त्वस्योपादेयतया प्रतिपादनादभाव एव प्राप्यतयोपदिष्टो भवत्रि–इति मन्यमानान् प्रतिबोधयितुमाह—**

अथ ये श्रुत्यन्तविदक्षपादमाध्यमिकादयः क्षोभप्रलये विश्वोच्छेदरूपमभावात्मकमेव तत्त्वमवशिष्यत इत्युपादिक्षन् तान्प्रतिबोधयितुं तदुपगततत्त्वप्रातिपक्ष्येण लोकोत्तरतां प्रकरणशरीरस्य स्पन्दतत्त्वस्य निरूपयति—

**नाभावो भाव्यतामेति न च तत्रास्त्यमूढता ।**
**यतोऽभियोगसंस्पर्शात्तदासीदिति निश्चयः ॥ १२ ॥**

न तु अभावो भावनीयो, यथा अन्यैर्योगिभिः उपदिश्यते,

'अभावं भावयेत्तावद्यावत्तन्मयतां व्रजेत्,

इति । न चैतत् युक्तम्, यस्मात् नाभावे भावना युज्यते मूढावस्थैव सा यस्मात् उत्तरकालम् अभियोगसंस्पर्शात् अभिलापसंयोगात्—'सा शून्यावस्था अतीता मम' इति स्मर्यते, न च आत्मस्वभाव एषः, यस्मात् न त्वेवं चिद्रूपत्वं मूढावस्थावत् स्मर्यते, तस्य सर्वकालमनुभवितृत्वेनाननुभवो नित्योदितत्वात् ॥ १२ ॥

**'अभावो' वस्तुशून्यता 'भाव्यतां' भावनीयत्वं समाधावालम्बनभावं 'नैति' न गच्छति, अभावभावभावनयोः परस्परविरोधात्; भावो हि संविद्विषयतायोग्यः पदार्थो, ध्येयतया आलम्बनीभवितुमर्हति, न पुनः न**

'असदेव इदमग्र आसीत् ।' [ छा० ३ । १९ । १ ]

इत्याद्युक्त्या श्रुत्यन्तविदाद्यभिमतोऽभावो भाव्यतां नैति भावनाया भाव्यवस्तुविषयत्वादभावस्य न किंचित्त्वाद्भाव्यमानतायां वा किंचित्त्वे सत्यभावत्वाभावात्, किंच भावकस्यापि यत्राभावः स विश्वोच्छेदः कथं भावनीयः, भावकाभ्युपगमे तु न विश्वोच्छेदो भावकस्यावशिष्यमाणत्वादिति

'असदेव इदमग्र आसीदि'ति भगवती श्रुत्यनुसारेण अक्षपादमाध्यमिकप्रभृतयश्च ससारात्मकप्रक्षोभविनाशे सति विश्वोच्छेदरूपम् अभावात्मकमेव सारभूततत्त्वमस्तीति वदन्ति । एतेषां मतमुपहसन् तान् प्रतिबोधयितुं तत्स्वीकृततत्त्वखण्डनपूर्वकं लोकोत्तरस्पन्दतत्त्वं निरूपयति—नाभावेति । उक्ताभाववादीनां सिद्धान्तं न प्रमाणग्राह्यं न वा

किंचित्। यथा क्वचित् उपदिष्टम्—'अभावं भावयेत्तावद्यावत्तन्मयतां व्रजेत्॥' इति। भवतु वासौ ध्यातृ-ध्यान-ध्येयविकल्पोच्छेदरूपा समाध्यवस्था, यामभाव इति मन्यन्ते विस्मृतात्मनः। न च 'तत्र' तस्मिन्नवस्थाविशेषे 'अमूढता' मूढत्वाभावो विद्यते, 'यतोऽभियोगसंस्पर्शात्' व्युत्थानावसरे तादृग्दशान्तरानुसंधानविषयेणाभियोगेन तत्कालप्रत्युदितेनाभिलापेन संस्पर्शात् संपर्कात् 'तत्' दशान्तरम् 'आसीत्' अभूदतीतम् 'इति निश्चयः' अध्यवसायः स्यात्। किम् उक्तं भवति?–अभावसमाधिलब्धप्रतिष्ठो

न विश्वाभाव एव तत्त्वम्। अथ कल्पितोऽयं भावको विश्वोच्छेदं विकल्पकल्प्यमानं भावयन् भावनापरिनिष्पत्तौ भाव्यतादात्म्यादभावरूपः संपद्यत इति पक्षः। तत्रोच्यते, तत्राभावभावनायां नामूढता न च तत्रास्त्यमूढता अपि तु मोह एवास्ति—

'........................... यद्यदेवातिभाव्यते।
भावनापरिनिष्पत्तौ तत्स्फुटं कल्पधीफलम्'॥

युक्तियुक्तं भवितुमर्हति। यतो हि अभावात्मक वस्तु तत्त्वेस्य भावनाविषयत्वं कथं स्यात्? माध्यमिका: शून्यवादिन: सकलप्रपञ्चस्य शून्यविवर्तमात्रत्वं स्वीकुर्वन्तस्तदतिरिक्तस्य कस्यापि सत्त्वं नेहन्ते। शून्यमेव पारमार्थिकं वस्तुतत्त्वं शेषस्य तु संवृत्तिसत्यमस्ति। परन्तु निर्वचनानर्हम् अभावरूपं शून्यं ज्ञानक्रियात्मकानुभवितु: भावनाविषयत्वं स्यादिति स नैव दर्शयितुं शक्नोति। अभावात्मिकां दशां कोऽनुभवेत्। अभावे भावरूपस्य जगत: उत्पत्तौ को हेतुर्भवेत् नहि असत: सदुत्पत्तिः शक्या।

एवञ्च असद्रूपस्य अस्तित्वम्, सद्रूपस्य अभावत्वम्। गीताशास्त्रे च भगवता कथितम्—

नासतो विद्यते भावो नाभावो विद्यते सत:।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभि:॥ २-११॥

अभावसमाधौ अर्थात् नाहमस्मीति भावनादशायां मूढतारूपाया असंवेदनाया: प्रसक्तिर्भवेत्। सा तु कयाऽपि रीत्या प्रेक्षावद्भिरङ्गीकर्तुमशक्या:। स एव पदार्थ: भावनाविषयो भवति यो हि यस्य अविच्छन्नरूपेण सदा सर्वत्र अस्तित्वं तिष्ठति। अभावे तु सत्त्वमेव नास्ति। अत: कथंकारं भावनया स संगृहीत: स्यात्।

योगी ततो व्युत्थितः सन् यदि तामवस्थां नानुसंदध्यात्, तत् कथं लब्धप्रतिष्ठोऽस्मि—इति प्रत्ययोऽस्य स्यात् ? असति च तस्मिन् समाधिव्युत्थानयोः व्यतिरेकग्रहणम् । तस्मात् तदानीं तादृशीं दशाम् अन्वभवम्—इति अवश्यं स्मर्यते । तच्च अतीतत्वेन स्मर्यमाणत्वादेव अनित्यं सुखादिवत् आत्मनः स्वरूपं न भवति; तस्य चिद्रूपस्य अनुभवितृत्वेन सर्वदा वर्तमानत्वात्, स्वत्रन्तरेण स्मर्यमाणत्वं न संभवति । व्याख्यातम् एतत् वृत्तौ—'न स्वभावो भावनोयः' इत्यादिना ॥ १२ ॥

इति न्यायाद्विश्वोच्छेदात्मन्यभावे भाव्यमाने न कदाचित्परमार्थाप्तिर्भवति । अथोच्यते—

'सर्वालम्बनधर्मैश्च　सर्वतत्त्वैरशेषतः ।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः ॥'

इति नागार्जुनोक्तमीदृशं तच्छून्यमिति । सत्यं, यदि चिदानन्दघना स्वतन्त्रा पारमार्थिकी भित्तिभूता भूरभ्युपेयते यथा विज्ञानभैरवादो पारमेश्वरी—

'दिक्कालकलनातीता' । ( वि० भै० १४ )

चिद्रूपतत्त्वस्य स्वभावः ( स्वरूपं ) निरन्तरं स्फुरणशीलं भवति । अत एव मौढ्यदशावत् स्मरणस्य स्वयमेव विषयो न स्यात् । तदनुभविता स्वस्वरूपणैव जायते । नास्ति आभासशून्या ज्ञानक्रियात्मिका चिद्रूपता समाधिदशा, अपितु समाधिदशायां यः भावात्मिकां चिद्रूपतां भावयति तत्र एव चिद्रूपता स्फुरति । किन्तु सुषुप्तौ केवलं मौढ्यमेव प्रस्फुरति, इदमेव अनयोरन्तरम् । अत एव जाग्रतदशायां न किञ्चिदवेदिषमिति तत्रानुभूतं मौढ्यं स्मरणविषयत्वेन प्रकाशयति । शून्यवादी आत्मनः सत्त्वं स्वीकर्तुं न तत्परः । तन्मते आत्मा नास्ति तर्हि कथं निर्वाणस्य डिण्डिमघोषस्तेन क्रियते । अस्मन्मते तु शून्यशब्दात् अशून्यरूपं सततस्फुरणशीलसंवित्प्रकाशम् अभिप्रेतम् । विश्वोत्तीर्णावस्थायां मायाविषयत्वाभावात् परिणामित्वादिधर्मरहितः शिवस्वरूपात्मा तिष्ठति । तस्यां दशायां सकलप्रपञ्चस्य पृथग्रूपेण अस्तित्वं राहित्यात् अभावशब्देन तदुल्लेखः ।

एवञ्च स्वच्छन्दतन्त्रे विवेचितम्—

अशून्यं शून्यमित्युक्तं शून्यं चाभाव उच्यते ।
अभावः स समुद्दिष्टो यत्र भावाः क्षयं गताः ॥

इदृशस्य अभावस्य वयं शून्यरूपेण स्वीकुर्मः । एतादृशी शून्यात्मिका सत्ता परिपूर्णज्ञानक्रियारूपा सती भावाभावयोः सत्त्वं समर्पयति । अत्रमायं निष्कर्षः—आत्मसत्ता न असद्रूपा, न जडरूपा न वा शून्यरूपा वर्तते ॥ १२ ॥

तत् स्फुटीकर्तुम् आह—

अतस्तत्कृत्रिमं ज्ञेयं सौषुप्तपदवत्सदा ।
न त्वेवं स्मर्यमाणत्वं तत्त्वं प्रतिपद्यते ॥ १३ ॥

अभावभावनालब्धभूमिकस्यापि कृत्रिमा अनित्या सा अवस्था, यथा, सौषुप्ते पदे, यस्मात् चिद्रूपत्वं तु आत्मनः स्वरूपं नित्य-सन्निहितं तदेव गुरूपदेशेन नित्यमेवानुशीलनीयम् ॥ १३ ॥

'अत' आसीत् तत् इति भूतत्वेन अभियुज्यमानत्वात् 'तत्' अभाव-समाधिसंज्ञितं वस्तु 'कृत्रिमं ज्ञेयं' भावाभावदशायोगित्वात् कल्पनाकृतम् अनित्यं बोद्धव्यं 'सदा' न काचिदसौ कालकला विद्यते, यस्यां सा तादृशी समाध्यवस्था नित्यत्वेन अवतिष्ठते । कथं कृत्रिमं ज्ञेयं ?—'सौषप्तपदवत्' सुषुप्तमेव सौषप्तं सुखस्वापावस्था तदेव पदं संविदधिकरणं तेन तुल्यम् । किमुक्तं भवति ?—यथा लौकिकी सुषुप्तावस्था निबिडमोहात्मकत्वात् सतोऽपि वेद्यवेदकविभागस्य तत्कालम् अग्रहणे सति अभावरूपा इव सती

इत्यादिना पारमार्थिकीं भित्तिभूतां चिद्भूमिमवस्थाप्य शून्यभावनोक्ता अन्यथा न शून्यमिति शून्यैवेयमुक्तिः 'यद्यदेवातिभाव्यते' इति प्रतिपादि-तत्वात् । यत्तु—

'सावस्था काप्यविज्ञेया मादृशां शून्यतोच्यते ।
न पुनर्लोकरूढयेव नास्तिक्यार्थानुपातिनी' ॥

इत्यालोकमालायामुक्तं तत्तु सत्यं, त्वादृशामविज्ञेया अविज्ञेयत्वाद्वक्तुमशक्ये-त्युच्यतां शून्यतेति तु कुतः शून्यतापि च यावद्भाव्यते तावद्विकल्पोल्लिखित-त्वादसौ विवेज्ञैय । यदि च त्वादृशां सा ज्ञातुमशक्या तत् तत्पदसाक्षात्कारा-भिज्ञसद्गुरुसपर्या कार्या, न तु शून्यतेति स्वमनीषिकयैव व्यवहृत्यात्मा परश्चागाधे महामोहे निक्षेप्तव्य इत्यलम् । अथ कुतो ज्ञातं तत्र मूढतास्तीत्य-त्रानेनोत्तरमाह यत इति । अभियोगः समाधानोत्थितस्य कीदृगहमासमिति तदवस्थाभिमुखविमर्शात्माभिलापस्तत्संस्पर्शात् तद्वशाद्धेतोस्तदासीदिति यतो

अभावस्य भावनाविषयत्वं कथमपि न संभवतीति पूर्वोक्तं स्फुटीकुर्वन्नाह—अत इति । पशुप्रमातृणां सुषुप्तिदशा संमोहात्मिका विद्यते तमसा तत्र प्राधान्यात् । अत एव तत्र घट-पटादिवेद्यविषयाणां प्रत्यक्षं स्मरणं वा नैव जायते । यद्यपि तस्यामवस्थायां

**प्रबोधकालप्रत्युदितानुसंधानविषयताम् आपाद्यमाना अतीतत्वेन स्मर्यमाणत्वात् अनित्या, तद्वत् अभावसमाध्यवस्थापि अनित्या व्युत्थानसमये भूतत्वेन स्मर्यमाणत्वसाम्यात्। एतेन सर्वे एवंप्रायाः समाधयः सुषुप्तावस्थायामेव अन्तर्भवन्ति--इति प्रतिपादितम् 'न तु' पुनः 'तत् तत्त्वम्' इह उपादेयतमतया उपदिष्टं स्वस्वभावलक्षणं वस्तु 'एवम्' अनेन उक्तप्रकारेण**

निश्चयः 'गाढमूढोऽहमासम्' इति यतोऽस्ति प्रतिपत्तिः अतो मोहावस्थैव सा कल्पिता तथा स्मर्यमाणत्वात्, सा चानुभूयमानत्वादनुभवितुः प्रमातुरवस्थातुरूपस्य प्रत्युत सत्तामावेदयते न त्वभावमिति विश्वाभावावस्थायां चिद्रूपस्याखण्डितमेव रूपं तिष्ठतीति नामुष्याभावो जातुचिद्वक्तुं शक्यत इत्युक्तं भवति। ननु दृष्टं निश्चितं नीलादि स्मर्यते न च शून्यभूतस्य न्यग्भूतबुद्धिवृत्तेर्निश्चयोऽस्ति तत्कथमुक्तं तदासीदित्यौत्तरकालिकान्निश्चयान्मूढता सेति। उच्यते वेद्यस्यैषा गतिः, यस्मात्तदिदन्तासारमिदन्तया यावत्प्रमात्रा स्वात्मोपारोहेण न निश्चितं तावन्न स्मर्यते, वेदकस्तु कल्पितशून्याद्यवस्थासु संकुचितोऽप्यसांकेतिकाहन्तापरमार्थ एवेति न तस्य स्वात्मनि पृथक्तास्तीति तन्निश्चायको विकल्पः,—इत्यहविमृश्यमेव तदा स्वसंवेदनेनैव सिद्धं शून्यप्रमातृरूपं विश्वप्रतियोगित्वाच्च संकोचसारं सदुत्तरकालं स्मर्यत इति न काचिदनुपपत्तिर्यस्मादेवमतः तच्छून्यात्मक पदं कृत्रिमम्—

'तस्माद्भूतमभूतं वा यद्यदेवातिभाव्यते'।

इति तदुक्तयैव नीत्या अभूतभावनयैवोत्थापितं परमेश्वरेणैव ज्ञानगोपनायै मूढानामुपेयतया तथा भासितमित्यर्थः। ज्ञेयं ज्ञातव्यं ज्ञेयरूपं च सदा सुषुप्तवदिति दृष्टान्तः। अयं भावः—सदा सुषुप्तं मोहरूपमप्रयाससिद्धं सर्वस्यास्त्येव तत्किमनेन समाधियत्नोपार्जितेनान्येन शून्येन कृत्यं द्वयस्याप्यवस्तुत्वाविशेषादिति। प्रायश्चास्मिन् शून्ये दुरुत्तरे महामोहार्णव एव वेदान्तविदक्षपादसांख्यसौगतादिप्राया बहवोऽनुप्रविष्टाः। स्पन्दतत्त्वसमाविविक्षूणामपि च

प्राणिनां चेतनाशक्तिर्विधत्ते। तथापि स मौढ्येन संकुचिता सती पुर्यष्टक एव केन्द्रिता भवति। एवञ्च सुषुप्तिकालिकसंस्काराणां फलरूपेण स प्रमाता जाग्रत्कालिकावस्थायां तत्रानुभूतम् अज्ञानं सुखं वा स्मरति। मया किमपि न ज्ञातमिति, अहं सुखेन सुप्तम्। इत्थं स्मर्यमाणविषयेण तदुल्लेखाद् इयं सुषुप्तिदशा कृत्रिमा न स्वाभाविकी वर्तते। समाधिनिष्ठस्य योगिनः ग्राह्यग्राहकादिभेदस्य निर्मूलीभावात् समस्तमपि भावजातं तस्य स्वस्वरूपे

**'स्मर्यमाणत्वं प्रतिपद्यते' तस्य हि नित्योदितत्वात् सदा वर्तमानत्वमेव। तदेतत्--'अतोऽभावभावनया समाधिलब्धभूमिकस्यापि' इत्यादिना वृत्तौ विवृतम् ॥ १३ ॥**

शिथिलीभूतप्रयत्नानां शून्यमेतद्विघ्नभूतम्। यद्वक्ष्यति—

'तदा तस्मिन्महाव्योम्नि'। ( १ । २५ )

इत्यारभ्य—

'सौषुप्तपदवन्मूढः.........।' ( १ । २५ )

इति। अत एतदुच्छेदे ग्रन्थकारस्य महान् संरम्भो लक्ष्यते। तथाचेह हेयतयैव तन्निर्णीयापि पुनरपि निर्णेष्यते—

'कार्योन्मुखः प्रयत्नो यः...' ( १ । १५ )

इत्यत्र। ततोऽस्माभिरेतद्दूषणारम्भः कृति इति न नः कोपः कार्योऽत्रभवद्भिरुपदेशनीभालनदत्तकर्णैः। सौगतेषु दूषितेषु श्रुत्यन्तवादादयो दूषिता एव तुल्यन्यायत्वादिति नाभ्यधिकमुक्तम्। तदिदानीं प्रकृतमेव ब्रूमहे तत्तु स्पन्दाख्यं तत्त्वमेवमिति शून्यवन्न स्मर्यमाणत्वं प्रतिपद्यते तस्य सर्वदानुस्यूतोपलब्ध्रेकरूपस्य कदाचिदप्यनुपलभ्यत्वायोगात्। तथा चाहुः—

'विज्ञातारमेरे केन विजानीयात्'। (बृ० आ० उ० ४।५।१५)

इति। यद्यपि च समावेशदशा व्युत्थितेन प्राणादिसंस्कारवशात्स्मर्यते तथापि न तावदेव स्पन्दतत्त्वमपि तु सर्वानुस्यूतानवच्छिन्नप्रकाशानन्दसारपरप्रमातृरूपमेव तत्। यद्वक्ष्यति—

'तस्माच्छब्दार्थचिन्तासु न सावस्था न या शिवः'। (२।४)

इति। अतोऽस्यानवच्छिन्नचमत्काररूपस्य न जातुचित्स्मर्यमाणत्वं मूढत्वं वा। यस्तु तत्तत्त्वमितीह तच्छब्देनास्य निर्देशः कृतः स—

'स्वातन्त्र्यामुक्तमात्मानं.........'। (ई०प्र० १।५।१६)

इति श्रीप्रत्यभिज्ञाकारिकोक्तनीत्या कल्पितस्यैवापारमार्थिकस्वरूपस्य न तु तत्त्वतः पारमार्थिकस्य। न प्रतिपद्यते इत्यननेदमाह अस्य तत्त्वस्य स्मर्यमाणत्वेन प्रतीतिरेव नास्तीति ॥ १३ ॥

**एव प्रकाशते। उक्तञ्च शिवसूत्रविवरणे—'ग्राह्यग्राहकभेदासञ्चेतनरूपश्च सौषुप्तम्।' अतस्तस्य पशुरिव जाड्यस्थितिः कदापि नैव भवेत्। यतः सततं प्रकाशस्वरूपतामुपगतः स योगी केन हेतुना अभावं शून्यं वा अनुभूयेतेति ॥ १३ ॥**

**अथैवं नित्योदितत्वात् सदा प्रकाशमानमपि तत् तत्त्वम् अप्रत्यभिज्ञायमानत्वात् बन्धहेतुः; अतो लब्धोपदेशेन सर्वावस्थासु वेद्यवेदकरूपतत्त्वद्वयसंगृहीतविश्वप्रपञ्चविभजनपरतया वेदकांशम् अहमिति सर्ववेद्यस्वरूपोत्तीर्णमेव प्रत्यवमृशताम् आत्मीकार्यम्।--इति उपदेष्टुं तस्य तत्त्वस्य स्वमायावैभवोद्भासितं द्वैरूप्यं प्रतिपादयितुमाह--**

ननु यत्र स्थितमित्यादौ चिद्रूपस्यैव विश्वकार्यरूपताग्राहित्वमुक्तं तद्ध्यानोत्थापितं कृत्रिममभावात्मकं रूपं तेनैव गृहीतामिति कथमस्यानवच्छिन्नचमत्काररूपममूढत्वमित्याशङ्कायामाह—

**अवस्थायुगलं चात्र कार्यकर्तृत्वशब्दितम्।**
**कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम्॥ १४॥**

अवस्थायुगलम्, अवस्थाद्वयमेव कार्यकर्तृत्वसंज्ञं भोग्यभोक्तृभेदभिन्नम्, तत्र यो भोग्यरूपो भेदः स उत्पद्यते नश्यति च; भोक्तृभेदस्तु चिद्रूपः पुनर्न जायते न कदाचिद् विनश्यति तेन नित्यः॥ १४॥

**'अत्र' अस्मिन् इह प्रतिपादिते आत्माख्ये परस्मिन् तत्त्वे 'अवस्थायुगलं' द्वे अवस्थे संभवतः। अनेन विविधदर्शनप्रक्रियाप्रबन्धव्यवस्थापिततत्त्वादिभेदात् अपर्यन्तमपि हेयोपादेयरूपं वस्तु लक्षणद्वययोगात् द्वित्वेनैव संगृह्य प्रतिपादितम्; आनन्त्येऽपि विश्ववैचित्र्यस्य द्वे एव तत्त्वे इत्यर्थः। एक एव तु परमार्थ सन् परमेश्वर आत्मा निरुपम-निष्प्रतीघात-निरुपादाननिजैश्वर्यशक्तिबलाद् द्वित्वेन आत्मानम् अवभासयन् क्रीडति-इति प्रतिपादयितुम् अवस्थाशब्देन निर्देशः कृतः, एकमेव तत् तत्त्वं द्वित्वेन अवतिष्ठते इत्यर्थः। कीदृशम् अवस्थायुगलं? 'कार्यकर्तृत्वशब्दितं' कर्तृत्वेन भोक्तृत्वेन वेदकत्वेन चेतनभावेन अहम् इति एका अवस्था स्वतन्त्रता, द्वितीयातु**

अत्र स्पन्दतत्त्वे कार्यत्वं कर्तृत्वमिति च शब्दितं शब्दव्यवहारमात्रेण भेदितमवस्थायुगलमस्ति, वस्तुतो हि तदेकमेव स्वतन्त्रप्रकाशघनशंकररूपं तत्त्वं कर्तृसत्त्वाव्यतिरिक्तया प्रकाशात्मना क्रियया व्याप्तं तदभेदेन प्रकाश-

स्पन्दात्मनः—आत्मतत्त्वस्य द्वैविध्यं प्रदर्शयति—अवस्थेति। स्पन्दभित्तौ अवस्थाद्वयम्। तत्र एका अवस्था कर्तृत्वरूपा, द्वितीया तु कार्यत्वरूपा; अनयोः भोक्तृत्व-भोग्यत्व-

तद्विपरीता कार्यरूपा भोग्या वेद्या जडा परतन्त्रा ताभ्यां 'शब्दितं' कथितम्। शब्दितशब्देन अनयोः संज्ञामात्रभेदो, न वास्तवः–इति प्रतिपादितम्। ततः कार्यरूपा या इयम् अवस्था सा प्रकाशमानत्वमात्रलब्धात्मकत्वात् आत्मनः परमकारणात् कर्तृशब्देन व्यपदिष्टात् प्रकाशैकस्वभावात् न भिद्यते, यतः शक्तिचक्रात्मकस्य स्वविभवस्य प्रभवत्वेन एतत् तत्त्वं प्रागेव प्रतिपादितम्। तत्र तस्मिन् इत्थंभूते अवस्थायुगले 'कार्यता क्षयिणी' कार्यरूपावस्था क्षणभङ्गिनी, यत् यत् इदं मुकुलिततत्त्वपरामर्शतया कार्यरूपत्वेनैव अवसीयते, तत् सर्वम् उदयव्ययसंबन्धात् प्रतिक्षणविनश्वरम् 'कर्तृत्वं पुनरक्षयं' कर्तृरूपावस्था नित्या नित्योदितसर्वावस्थाव्यापकत्वोपलब्धृत्वमात्रधर्मकत्वात् अविनाशि। तदेवम् एकमेवकर्तारं ज्ञातारं सर्वाधिष्ठातारं सततम् आत्मत्वेन अनुसंदधानो यस्तिष्ठति तस्य बन्धानुपपत्तिः–इति पूर्वश्लोकेन संबन्धः। तदेतत्––'अवस्थाद्वयमेव' इत्यादिना वृत्तौ व्याख्यातम्॥ १४॥

मानं तत्त्वभुवनशरीरवदभावादिरूपत्वं स्वीकुर्वत्कार्यमित्युच्यते तदन्यस्य कस्यापि कारणत्वायोगात्। यथोक्तं श्रीप्रत्यभिज्ञायाम्—

'जडस्य तु न सा शक्तिः सत्ता यदसतः सतः।
कर्तृकर्मत्वतत्त्वैव कार्यकारणता ततः॥' (ई० प्र० २।४।२)

इति। तस्य चेदमेव कार्यत्वं यदयं विचित्रदेशकालाद्याभाससंयोजनवियोजनक्रमेणानन्तान् देहनीलाद्याभासांश्चिदात्मनः स्वरूपादनतिरिक्तानपि मुकुरप्रतिबिम्बवदतिरिक्तानिवाभासयति, यावच्च किंचिदाभासयति तत्सर्वमाभास्यमानत्वादेव बहिर्मुखेन रूपेण क्षयधर्मकं, क्षयश्चास्येदन्ताभासनिमञ्जनेनाहन्तारूपतयावस्थानम्, अत एव देहादेर्ग्राहकस्य यो वेद्यांशः स एव भगवता सृज्यते संह्रियते च न त्वहन्ताप्रकाशात्मकं कर्तृरूपं तस्य देहाद्या-

शब्दाभ्यां शास्त्रे व्यवहारो भवति। तत्र त्रिकालाबाधितस्य आत्मनः कर्तृत्वभोक्तृत्वरूपा स्थितिस्तु पारमार्थिकी नित्या तथा कार्यत्वरूपा, भोक्तृद्वारा स्वत एव अङ्गीकृतत्त्वेन, कृत्रिमा अनित्या अवस्था। कार्यत्वरूपा अवस्था प्रतिक्षणमुत्पत्तिविनाशशीला सकारणा च भवति। अत एव सा 'कृत्रिमा' शब्देन व्यपदिश्यते। कर्तृत्वरूपा अवस्था विशुद्धचिद्रूपाहंचमत्कारसाररूपा प्रस्फुरति। तत्र निखिलप्रमातृप्रमेयमण्डलम् अहंप्रत्यवमर्शस्वरूपे विश्राम्यति। तस्मात् इयमवस्था पारमार्थिकी सद्रूपा अनश्वरस्वभावा चास्ति॥ १४॥

ननु यत् उपलब्धृरूपं तत्त्वं तत् अक्षयमित्युक्तं; तच्च नोपपद्यत एव; अभावसमाध्यवस्थासु उपलभ्यस्वरूपाभावात्; कथं तस्याक्षयत्वम् ?– इत्याक्षेपे प्राक्प्रतिज्ञातं समाधानमाह––

कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते ।
तस्मिंल्लुप्ते विलुप्तोऽस्मीत्यबुधः प्रतिपद्यते ॥ १५ ॥

कार्यसंपादनसामर्थ्यं बाह्यकरणव्यापाररूपं केवलं विलुप्यते, स्थगितेन्द्रियस्य तस्मिन् विलुप्ते सामर्थ्ये 'स्वभावो मे विलुप्त'— इति अबुधो जानाति, न तु भावस्य विनाशोऽस्ति ॥ १५ ॥

'कार्ये' निर्मेये वेद्ये वा वस्तुनि 'उन्मुखः' तस्य तथासम्पादने प्रवणो 'यः प्रयत्नः' कर्तृत्वं ( त्वे ) सहज उत्साहः 'स केवलं' स एव परं कारणं व्यापारहेतुः, तस्यां दशायां कार्यस्य स्थूलरूपस्य अभावात् 'लुप्यते' अनभिव्यक्ततया आत्मन्येव न्यग्भूयेव अवतिष्ठते । 'तस्मिन्' प्रयत्ने तत्कालमेव 'लुप्ते' सति 'अबुधः' तत्त्वावबोधशून्यो 'विलुप्तोऽस्मि–इति प्रतिपद्यते' नाहमस्मीति भावविलक्षणतया वस्तु परिच्छिन्दत एवंविधः प्रत्यय उपपन्नः; परिच्छिनत्ति चेत् कर्तृत्वेन प्रथमतरं सन्नेव असौ सिद्धः कथं निषेधस्य विषयः स्यात् ? तत् इदम् आयातम्,–यथा कश्चित् देवदत्तो गृहाद्यवस्थितः

वेशेऽपि भगवदेकरूपत्वात्; अतस्तत्र तयोः कार्यकर्तृत्वयोर्मध्यात्कार्यता क्षयिणी कर्तृत्वं चित्स्वातन्त्र्यरूपं पुनरक्षयं जगदुदयापाययोरपि तस्य स्वभावादचलनात् । चलने तु जगदुदयापायावपि न कौचिच्चकास्यातामिति मूढाद्यवस्थायामप्यखण्डितचमत्कारसारममूढमेवैतत् । नन्वभावसमाधाननिष्पत्तौ सुषुप्तादौ चास्य कर्तृत्वं नोपलभामहे क्वचिदपि प्रवृत्त्यदर्शनात् । सत्यं, कार्योन्मुख इन्द्रियादिप्रेरणात्मकव्यापारप्रवणो यः प्रयत्नः संरम्भः

अभावं भावयिता योगी सर्वथा अप्रबुद्धोऽस्ति, विषयेऽस्मिन् मनागपि न संशयितव्यम्– कार्येति । यतो हि समाधिकाले स्वस्य कार्यत्वांशः विलुप्तावस्थायां बुद्धयते, अस्मात् कारणात् अहंभावमुपगतोऽस्मीति आत्मनं मन्यते । समाधिदशायां बाह्येन्द्रियाणां व्यापारो नैव भवति । अनेन हेतुना तस्य शब्दादिविषयैः सह पूर्णतया संबन्धविच्छेदो जायते । एवञ्च संबन्धविच्छेदेन इन्द्रियाणां विषयग्रहणसामर्थ्यरहितो भवति । अतोऽभाववादी योगी मदीयस्वभावस्य लोपो जातमिति मनुते । परन्तु ज्ञातृत्वांशस्य कस्यामपि

केनापि आहूतो—भो देवदत्त ?—इति, स आत्मानम् अपह्नोतुकामः प्रत्याह,—नाहमस्मीति; एवमुक्ते प्रत्युत स्थितोऽहमस्मि—इति प्रतिपादितं भवति, न त्वसंनिधानम्। तस्मात् अभावसमाध्यवस्थासु कार्याभावात् करणव्यापार-विरतिमात्रेणात्माभावप्रत्ययो भ्रान्तिरेवेति। व्याख्यातमेतत् वृत्तौ—'कार्यसंपादनसामर्थ्यम्' इत्यादिना ॥ १५ ॥

एनमेवार्थं विशेषयितुम् आह—

**न तु योऽन्तर्मुखो भावः सर्वज्ञत्वगुणास्पदम् ।**
**तस्य लोपः कदाचित्स्यादन्यस्यानुपलम्भनात् ॥ १६ ॥**

न तु यः अन्तर्मुखः अन्तश्चक्रारूढस्वभावः सर्वज्ञत्वादिगुणाश्रयः तस्य विनाशः कदाचित्, तस्मात् द्वितीयस्यान्यस्याभावात् तत्स्वरूपमेव व्योमवत् चिद्रूपतया सर्वत्र अनुभवति इति ॥ १६ ॥

'न तु' पुनः 'तस्य' परमार्थसतः परस्य तत्त्वस्य 'कदाचित्' कस्यांचिदपि समाध्याद्युपलक्षितायां कालकलायां 'लोपः' स्वरूपोच्छेदः 'स्यात्' उपपद्येत; 'अन्यस्य' तद्व्यतिरिक्तस्य वेद्यरूपस्य अनित्यस्य वस्तुनः 'अनुपलम्भनात्' अनुभवाभावात्, न हि वेद्यं नास्ति, वेदकोऽपि नास्ति—इति वक्तुं शक्यम्। कस्य तस्य लोपो न स्यात् ? 'यः अन्तर्मुखो' व्यतिरिक्त-

सोऽत्र कार्यक्षयमदे लुप्यते विच्छिद्यते, तस्मिँल्लुप्ते सति अबुधोऽभावसमाध्यपहारितात्मरूपो मूढो विलुप्तोऽस्मीति मन्यते। यः पुनरन्तर्मुखोऽहन्ताप्रकाशरूपः स्वभावोऽत एव सर्वज्ञत्वगुणस्यास्पदम् उपलक्षणं चैतत्सर्वकर्तृत्वादेरपि, तस्य लोपो न कदाचित्स्याद्भवतीति न कदाचिदपि सम्भावनीयोऽन्यस्य तल्लोपमुपलब्धुः कस्याप्यनुपलम्भात् यदि स कश्चिदुपलभ्यते स एवासावन्तर्मुखश्चिद्रूपो न चेदुपलभ्यते तर्हि सा लोपदशास्तीति कुतो निश्चयः। अथ चान्यः कश्चित्तल्लोपं नोपलभतेऽपि तु स एव प्रकाशात्मा

अवस्थायां लोपो न स्यात्। अविनाशीभावरूपस्य वस्तुनः लोपाभावो नैव सम्भवति, त्रिकालाबाधितस्य भावरूपस्य पदार्थस्य विनाशासम्भवात्; कर्तृत्वरूपावस्था पारमार्थिकीति तु पूर्वमेव निरूपितम् ॥ १५ ॥

श्लोकत्रयेण उपक्रान्तमर्थमुपहसन् प्रमेयजातस्य स्पन्दतत्त्वेन अभेदं प्रागेव विवेचितमनुवदन् तत्प्रत्यभिज्ञानां प्रत्यभिज्ञानरूपौ बन्धमोक्षौ लक्षयति—नेति। यो हि लोकोत्तर-

बाह्यवेद्याभावात् अन्तः स्वात्मन्येव मुखं ज्ञशक्तिर्यस्य स तादृशो 'भाव' आत्माख्यं तत्त्वं, यतः 'सर्वज्ञत्वगुणास्पदं' सकलवेद्यवर्गवेदकतारूपस्य गुणस्य धर्मस्यास्पदम् अनन्यसाधारणम् अधिकरणम्। इदमत्र तात्पर्यम्—आत्मनो ज्ञानक्रियाभेदेन द्विविधा या शक्तिः सा पुरुषावस्थायाम् अन्तःकरण-बहिष्करणव्यापारोपरमे सति, केवलस्वात्ममात्राभिमुखज्ञशक्तिमात्रत्वेनावशिष्यते; तेन 'अन्तर्मुखो भाव' इत्युक्तम्। मुखशब्देन च शक्तेः व्यवहारो दृष्टो यथा पारमेश्वरे—

'शैवीमुखमिहोच्यते ॥'

इत्यादौ। एवं च व्युत्थानावसरे तादृग्दशान्यथानुपपत्तिसद्भावः सत्ता स भावो बाह्यविषयग्रहणमात्रव्यामोहैः अभाव इति तैः योगिभिः प्रतिपद्यते; न तु सततम् अविलुप्तज्ञशक्तेः तस्य भावस्य आत्मविलक्षणवस्त्वनपलम्भात् कथंचित् लोप उपपद्यते; तदा हि असौ स्वभावमेव अमलगगनतलवत् सर्वतो

तत्कथं तस्याभावः। एवं चान्यस्यानुपलम्भनादित्यत्रान्यकर्तृकस्योपलम्भस्याभावादित्यर्थः। अथ च घटाभावो यथा घटविविक्तभूतलाद्युपलम्भनान्निश्चीयते तथैवात्माभावोऽप्यात्मविविक्तस्य कस्यचिदुपलम्भान्निश्चीयेत तदुपलम्भकसत्तावश्यंभाविनीति तदुपलम्भकस्वात्मनास्तिता न सिध्यति। यदि च कार्योन्मुखप्रयत्नलोपे स लुप्येत तदोत्तरकालमन्यस्य कस्याप्युपलम्भो न भवेत् अन्योपलम्भाभावः प्रसज्येतेत्यर्थः। अपि चान्यस्य बहिर्मुखस्य प्रयत्नस्य सौषुप्तादावनुपलम्भात् कथमन्तर्मुखस्य तत्त्वस्य वालिशैर्लोप आशाङ्कितो यतोऽन्यस्य लोपेऽन्यस्य किं वृत्तम्। अथ चान्यस्य कार्योन्मुखप्रयत्नस्यानुपलम्भादनुपलम्भप्रकाशनान्न कदाचित्प्रकाशात्मनोऽन्तर्मुखस्य

स्पन्दात्मको भावोऽन्तर्मुखस्वरूपेण अविरतं प्रस्फुरति तथा सर्वज्ञात्वादिप्रभूतगुणानाम् आश्रयस्थानं विद्यते, तस्य कदापि लोपो नैव भवति। अत एव कर्तृत्वसत्तातो भिन्नस्य कस्यचिदपि परमार्थरूपेण अस्तित्वं नास्ति। तस्मात् कर्तृत्वमन्तराक्रिया न सिद्धचति। यथा नहि चिदिक्रियाकर्तारमन्तरेण कदापि दृश्यते।

उक्तञ्च प्रत्यभिज्ञाकारेण—

सा स्फुरत्ता महासत्ता देशकालादिविशेषणी।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥ १-५-१४ ॥

व्यतिरिक्तं सर्वव्यापकं चित्मात्ररूपतया अनुभवति, केवलं मोहपरवशतया विस्मृतानुसंधायकस्वात्मरूपः तथा न प्रतिपद्यते। प्रबुद्धस्तु यथा प्रतिपद्यते तथा उपायं पुरस्तात् उपदेक्ष्यति। व्याख्यातमेतत्--

'न तु योऽन्तर्मुखोऽन्तश्चक्रारूढ'

इत्यादिना वृत्तौ ॥ १६ ॥

इति श्री राजानकरामकृतायां विवृत्याख्यायां स्पन्दकारिकाटीकायां व्यतिरेकोपपत्तिनिर्देशो नाम प्रथमो निःष्यन्दः ॥ १ ॥

तस्योपलब्धुर्लोपः, यतोऽसावन्तर्मुखोभावः सर्वज्ञत्वगुणस्यास्पदं तामप्यभावदशां वेत्त्येव अन्यया सैव न सिध्येदिति। अन्यस्येति कर्तरि कर्मणि च षष्ठी। अन्तर्मुखे कार्यत्वप्रतियोगितामिव कर्तृत्वस्य संभाव्यावस्थात्वमुक्तं वस्तुतस्तु उक्तयुक्त्या तस्यावस्थातृत्वमेव। अन्तर्मुख इति अन्तः पूर्णहन्तात्मकं मुखं प्रधानं यस्येति योज्यम् ॥ १६ ॥

तथा विमर्शिनीकारेणापि—'सत्ता च भवनकर्तृता सर्वाक्रियासु स्वातन्त्र्यम्। सा च खपुष्पादिकमपि व्याप्नोति इति महती।'

अत एव अहंप्रत्यवमर्शे चिद्वपुषे सततस्फुरणरूपेण अवभासमाना स्वतन्त्रकर्ता एव भावात्मिका सत्ता विद्यते, अयमेव पारमार्थिकं वस्तुः ॥ १६ ॥

# द्वितीयो निष्यन्दः

एवं यथाप्रतिज्ञातं देहादिव्यतिरिक्तमात्मत्त्वं स्वानुभवसिद्धयोपपत्त्या व्यवस्थाप्य इदानीं तदुपलब्ध्युपायोपदेशावसरे सुप्रबुद्धप्रबुद्धाप्रबुद्धभेदेन त्रिविधे लोकतन्त्रे, कस्तावत् प्रस्तुतोपदेशपात्रम् ?––इति विषयव्यवस्थापनाय आह––

एवमप्रबुद्धो बहिर्मुखव्यापारनिरोधे ग्राहकस्याप्यात्मनोऽनुपपन्नमप्यभावं निश्चिनुत इति प्रतिपाद्य सुप्रबुद्धाप्रबुद्धयोर्यादृगात्मोपलम्भस्तं निरूपयति—

तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्तेऽपरस्य तु ।। १७ ।।

तस्य चिद्रूपस्य सर्वगतस्य स्वस्वभावस्य उपलब्धिः त्रिषु जाग्रदादिषु पदेषु नित्यं सुप्रबुद्धस्य भवति, तदाद्यन्ते अपरस्य प्रबुद्धस्य स्वप्नसुषुप्तादौ, जाग्रत्तुर्यौ त्वागममात्रगम्यौ ।। १७ ।।

'तस्य' यथाप्रतिपादितस्य स्वात्मन एव परमेश्वरस्य 'उपलब्धिः' अनुभवो निर्विकल्पा प्रतिपत्तिः 'नित्यं' सर्वदा सर्वासु अनुभवदशासु 'सुप्रबुद्धस्य' सुष्टु प्रबुद्धस्य देहाद्यहंप्रत्ययदीर्घदुःस्वप्नमय्या मोहमहानिद्रया मनागपि अनावृतसंविदः सिद्धसाध्यस्य सम्यग्दर्शिनः 'स्यात्' उपपद्यते। कीदृशी ?

तस्य प्राकरणिकस्वभावस्य योपलब्धिः अनवच्छिन्नः प्रकाशः सा कथितयुक्त्यवष्टम्भात्सुष्ठु प्रबुद्धस्याप्रबुद्धतासंस्कारेणापि शून्यस्य सततं त्रिष्वपि जागरस्वप्नसौषुप्तपदेषु नित्यमिति आदौ मध्येऽनते चाव्यभिचारिणी अनपायिनी स्वाद्भवत्येव सदासौ शंकरात्मकस्वस्वभावतया स्फुरतीत्यर्थः । परस्याप्रबुद्धस्य पुनस्तासां दशानां स्वोचितसंविद्रूपाणां प्रत्येकमदाबुद्धभूषा-

पूर्वं प्रतिज्ञातस्य देहादिव्यतिरिक्तस्य आत्मतत्त्वस्य युक्त्या स्वानुभवसिद्धचा च उपपादितम्, इदानीं तत्प्राप्तावुपायोपदेशाववरं प्राप्य सुबुद्धप्रबुद्धाप्रबुद्धाविभेदेन त्रिविधे जने कस्तावत्प्रकृतोपदेशाधिकारी वर्तते—इत्याशङ्कचाह—तस्येति । सुप्रबुद्धः योगी तु सर्व-

'सततम्' अव्यवधानेन 'त्रिपदाव्यभिचारिणी' त्रिषु जागरस्वप्नसुषुप्तेषु पदेषु संवेदनभूमिकासु अव्यभिचारिणी अविसंवादिनी कयाचिदपि अवस्थया अनभिभूतत्वात् अव्यवहितसंनिधिः। एवम् एतस्य सुप्रबुद्धस्य स्वीकृतस्वात्मैश्वर्यलक्षणपरसिद्धेरिहोपदेशविषयत्वं नास्त्येव कृतकृत्यत्वात्। 'अपरस्य' तत्समनन्तरस्य द्वितीयस्य प्रबुद्धस्य परशक्तिपातप्रभातालोकविलप्यमानमायातमिस्रतया समुन्मिषद्विशदविवेकचक्षुषः क्षीयमाणमोहवशात् अविजृम्भमाणमोहोत्साहसंपदः 'तदाद्यन्ते' तेषां जागरादीनां त्रयाणां पदानाम् आदिभूतं यत् पदं जाग्रदवस्थात्मकं, तस्य अन्तभूतं यत्पदद्वयं स्वप्नसुषुप्ताख्यं, तत्र तस्य आत्मतत्त्वस्य उपलब्धिः स्यात्। वृत्तिकृदभिप्रायानुसारेण तदाद्यन्तपदस्य एवं विग्रहः कृतः यतः—'स्वप्नसुषप्तादौ' इति तेन एतत्पदं व्याख्यातम्। अत्र च आदिशब्देन स्वप्नसुषुप्तावस्थासंगृहीतस्मृतिमोहाद्यवस्थापरिग्रहः तस्याभिप्रेतः। एवं च व्याख्यानस्य अयमाशयः—इह द्विविध आत्मतत्त्वस्य उपलब्ध्युपदेशः उपक्रान्तो निर्बाह्यश्च; एकः सर्वव्यतिरिक्तचिन्मात्रस्वरूपविषयः; अपरो विश्वात्मकतच्छक्तिचक्रविषयः। उभयरूपोपि अयमुपदेशः अस्मिन् सुषुप्तस्वप्नरूपपदद्वयेऽपि प्रबुद्धस्य, प्रायशो

यामन्ते च विश्रान्त्यात्मकान्मुखत्वे न तु स्वोचितार्थावभासावस्थितिरूपे मध्यपदे। यदुक्तं श्रीशिवदृष्टौ—

'यावत्समग्रज्ञानाग्रज्ञातृस्पर्शदशास्वपि ।
स्थितैव लक्ष्यते सा तु तद्विश्रान्त्याथवा फले ॥' (शि० दृ० २।५)

इति। भट्टलोल्लटेनापि तदाद्यन्त इत्येवमेव व्याख्यायि स्ववृत्तौ। भट्टश्रीकल्लटवृत्त्यक्षराण्यपेक्ष्य वयमपि तद्वृत्त्यक्षरानुरोधेन सौत्रमर्थममिविमलमपि क्लिष्टकल्पनया व्याकर्तुमशिक्षिताः, यत एवासुप्रबुद्धस्य तदाद्यन्तेऽस्ति तदुपलब्धिः अत एवायमिहाधिकारी स्पन्दोपदेशैः सुप्रबुद्धोक्रियते। यद्वक्ष्यति—

'अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये।
जाग्रत् ·········· ॥' [१।२१] इत्यादि।
'सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः।' ( १।२५ ) इति।
तथा स्वप्नेऽपि········ ················( ३।२ ) इत्यादि।
'प्रबुद्धः सर्वदा तिष्ठेत्।' ··············( ३।१२ )।

व्यापकचिद्रूपस्वभावस्य परमतत्त्वपरमेश्वरस्य उपलब्धिम्—आत्मानुभूति—जाग्रत्स्वप्नसुषुप्त्याख्यत्रिषु अवस्थासु अखण्डैकरसतया अविरतं कुर्वन्नास्ते। तादृशं योगिनं तदुपलब्धिः नैव व्यभिचरति। अन्यस्य प्रबुद्धयोगिनस्तु उक्त त्रिषु अवस्थासु तादृशमात्मस्वभावस्य अनुभवो

नोपयुज्यते, पदत्रय इव सुप्रबुद्धस्य, तत्त्वोपलब्धेरप्रयत्नसिद्धत्वात्; यत एतत्पदद्वयवर्तिसंवित्प्रत्यवमर्शमात्रादेव यथाप्रतिपादितपरतत्त्वोपलब्धिः स्वयमेव तस्य उपपद्यते, तथा हि--यदा विगलितसकलेवेद्यविकल्पत्वात् निष्केवलां सुषुप्तावस्थां प्रबोधदशायाम् आत्मनः परामृशति, तदा सर्वोपरागरहितस्वरूपमात्रविश्रान्तनित्याविलुप्तचेतयितृमात्रस्वभावम् आत्मतत्त्वं स्वयमेव उपलभते। यदा च तत्तद्विभिन्नस्वकारणविरहेऽपि स्फुटतरावभासचेतनाचेतनविचित्रभावचक्रनिर्माणमयीं विनिद्रः सन् आत्मनः स्वप्नावस्थां परामृशति तदा तेनैव दृष्टान्तेन प्रबोधबलात् परमकारणस्य स्वभावस्यैव परमेश्वरस्य स्वेच्छामात्रव्यतिरिक्तकारणान्तरनिरपेक्षसर्वकर्तृतारूपं तत्त्वमुपलभते। अप्रबुद्धस्य पुनरेतत्प्रयत्नशतैरपि समर्प्यमाणं तुम्बकतोयद्रववत् नान्तः स्पर्शं करोति। तदेवम् अस्मिन् पदद्वये प्रबुद्धस्य उपलब्धिः स्यात्-इति प्रतिपाद्यते। परिशिष्टे जाग्रत्तुर्याख्ये पदद्वये सा अस्य नास्ति-इति अर्थात् उक्तं भवति। अतो जागरावस्थायां शब्दादिविषयग्रहणव्यग्रेन्द्रियव्यापारव्यवहितं, तुर्यावस्थायां च लोकोत्तरत्वात् अत्यन्तापरिचितं स्वयं दुर्लक्षं परं तत्त्वम् इति तदुपलब्धौ तत्र प्रबुद्धोऽपि उपदेशमपेक्षत एव। यत आह वृत्तिकारः--'जाग्रत्तुर्यौ त्वागममात्रगम्यौ' इति। 'तस्य चिद्रूपस्य सर्वगतस्य' इत्यादिना व्याख्यातवान् वृत्तिकृत् एतत्॥ १७॥

इत्यादि च। अत्र हि जागरादित्रिषु पदेषु आद्यन्तकोटिवन्मध्यमप्यर्थावसायात्मकं पदं तुर्याभोगमयं कर्तुं प्रबुद्धस्य सुप्रबुद्धतापादनायोपदेशः प्रवृत्तः, एतच्च निर्णेष्यामः। तथा च शिवसूत्रम्—

'जाग्रत्स्वप्नसुषुप्तभेदे तुर्याभोगसंभवः।' (शि० सू० १।७)

इति। तथा—

'त्रिषु चतुर्थं तैलवदासेच्यम्।' (शि० सू० ३।२०)

इति—

त्रितयभोक्ता वीरेशः।' (शि० सू० १।११)

इति॥ १७॥

जायते। परन्तु तुर्यावस्थायां तस्य दृढतया स्थितिर्नैव भवेत्। तुर्यावस्था स्थितिस्तु तस्य सद्गुरोरूपदेशक्रमेणैव प्राप्नोति। अतः सुप्रबुद्धयोगी नोपदेशमपेक्षते, तस्य स्वाभाविकी एव आत्मस्वरूपे प्रतिक्षणं स्थितिस्तु प्राप्ता विद्यते, तद्व्यतिरिक्तानां तु तत्त्वज्ञोपदेशस्य नितान्तमस्ति आवश्यकता॥ १७॥

एवमुपदेशविषयं व्यवस्थाप्य इदानीं पारमेश्वरस्य तत्त्वस्य सर्वव्यतिरिक्तत्वेन सार्वरूप्येण च द्विप्रकारस्य जागरादिषु चतुर्ष्वपि पदेषु प्रविभागप्रतिपादनायाह--

सुप्रबुद्धस्य त्रिषु पदेषु यादृश्युपलब्धिस्तां विभागेन दर्शयति—

**ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।**
**पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः ॥ १८ ॥**

ज्ञानज्ञेयभेदेन द्विरूपे जाग्रत्स्वप्नात्मके पदद्वये संवेदनम्, सुषुप्ततुर्यात्मके पदद्वये पुनश्चिद्रूपत्वेन केवलम् अनुभवः, न तु द्वितीयमन्यत्वेन उपलभ्यते ॥ १८ ॥

'विभुः' व्यापक ईश्वरश्चिन्मात्रमूर्तिरात्मा 'पदद्वये' जागरस्वप्नाभिधाने 'परमया' अत्यद्भुतरूपत्वात् सर्वातिशायिन्या 'शक्त्या' निजेन सामर्थ्येन 'युतः' सहितो 'भाति' चकास्ति प्रकाशते । कीदृश्या शक्त्या ? 'ज्ञानज्ञेयस्वरूपिण्या' ज्ञायतेऽनेन इति ज्ञानं, बाह्याभ्यन्तरं करणचक्रं ग्रहणात्मकं ज्ञप्तिमात्रं वा, ज्ञेयं ग्राह्यं शब्दादि सुखादि च विषयजातमनन्तविशेषं, तदेव रूपं विद्यते यस्याः सा तथा तया । किमुक्तं भवति ?-- परमेश्वर एव स्वमायावशात् नानाक्षेत्रज्ञरूपतयावभासमानः स्वामेव अव्यतिरिक्तां परां शक्तिं ज्ञानज्ञेयभावेन अवभासयन् जागरस्वप्नदशाव्यवहारमुद्भावयति; एतदेव च अस्याः शक्तेः पारम्यम्--यत् स्वस्य वैभवस्वरूपस्य प्रकाशमानतामतिरोदधती ज्ञानज्ञेयमयानन्तरूपतया स्फुरति । भिन्ने तु अभेदाप्रथनमात्रप्राणे मायातमसि विगलितज्ञानज्ञेयविभागविभ्रमम् एकमेव

सुप्रबुद्धस्य भूम्ना ज्ञानज्ञेयस्वरूपया मध्यमे पदे ज्ञानाग्रपर्यन्तयोस्तु स्वस्वरूपयैव स्पन्दतत्त्वात्मना पराशक्त्या युक्तो विभुः शंकरात्मा स्वभावो जागरास्वप्नरूपे पदद्वये भाति । तत्र हि विश्वमसौ सदाशिवेश्वरवत्स्वाङ्गवत्पश्यति, तदन्यत्र तु सुषुप्ते न तु यथान्ये सुषुप्ततुर्ययोरिति, 'त्रिपदा-

जाग्रदादितुर्यावस्थासु स्वात्मस्वरूपेण अनुभूतिः स्वाभाविकी जायेतेति संशयनिराकरणार्थमाह— ज्ञानेति । चिन्मात्रमूर्त्तिसर्वव्यापकविभुः परमात्मा जाग्रतत्स्वप्नावस्थयोः अघितघटनाघटीयस्या स्वमायाशक्त्या युक्तः सन् निरन्तरं बहिरन्तः प्रकाशते । सा च मायाशक्तिः ज्ञानज्ञेयस्वरूपभूता वर्तते । अनेन ज्ञायतेति व्युत्पत्तिमनुसृत्य बाह्याभ्यन्त-

परमार्थसत् चित्प्रकाशैकरूपं तादृक्स्वभावानुभवितृतामात्रधर्मलक्षणशक्तिकं तत्त्वमिष्यते, यत ग्राह 'तदन्यत्र तु चिन्मय' इति। तस्मात् उक्तरूपात् पदद्वयात् 'ग्रन्यत्र' ग्रपरत्र सुषुप्ततुर्याभिधाने पदद्वये 'चिन्मयो विभुर्भाति' चेतयत इति चित् उपलब्धृस्वभाव ग्रात्मा ईश्वरः तन्मात्रप्रकृतिः, तयोः पदयोर्व्यतिरिक्तवेदनीयाभावात् निष्कलस्वात्ममात्रविश्रान्तशक्तिरीश्वर एव प्रकाशत इत्यर्थः। ननु जागरस्वप्नयोर्ज्ञानज्ञेयमयत्वेन, सुषुप्ततुर्ययोश्चिन्मयत्वेनैव प्रकाशनाभेदात् पदद्वयमेव, तत्कथं पदचतुष्टयम् इति?—ग्रत्र उच्यते, जागरस्वप्नपदार्थानां स्थैर्यास्थैर्यप्रतिपत्तिविकल्पकृतोऽस्ति भेद इति तत्पदद्वयम्; यतः ईश्वरपरिकल्पितः सर्गो जागरावस्थायां दृढत्वेन प्रतिपद्यते, स्वप्ने तु ग्रदृढत्वेन क्षेत्रज्ञपरिकल्पित इत्यनयोः पदयोर्भेदकारणम्। सुषुप्तावस्थायां तु सदपि चिन्मात्ररूपं तत्त्वं मोहवशादहमित्युपलब्धृचमत्कारविरहात् ग्रसदिवाभाति; तस्यैव तु तत्त्वस्य परमार्थसत्तया ग्रात्मत्वेनोपलब्धिस्तुर्यपदे;—इत्ययं सुषुप्ततुर्ययोर्भेदः। तेन चत्वार्येव पदानि विश्व-तैजस-

व्यभिचारिणी' इति प्रक्रान्ते तुर्यस्याप्रस्तुतत्वात् तदुपलब्धेरेव च तुर्यरूपत्वात्, ग्रसौ विभुश्चिन्मय एवास्य भाति ग्रशेषवेद्योपशमादित्येतत्सुप्रबुद्धाभिप्रायमेव न तु वस्तुवृत्तानुसारेण 'तदन्यत्र तु चिन्मयः' इत्यस्यानुपपन्नत्वापत्तेः, लोके सौषुप्तस्य मोहमयत्वात् शिवापेक्षया तु जाग्रत्स्वप्नयोरपि चिन्मयत्वात् एवमपि च प्रकृतानुपयुक्तत्वात्। इतः प्रभृति प्रथमनिःष्यन्दान्तो ग्रन्थः

करणसमूहो ग्रहणात्मकः ज्ञप्तिमात्रस्वरूपो वा। अखिलब्रह्माण्डनिर्माता भगवान् परमशिव एव स्वीयमायया नैकविधक्षेत्रज्ञरूपैः भासमानास्वाभिन्नपरां शक्तिं ज्ञानज्ञेयभावेन आभासयन् जाग्रत्स्वप्नदशाव्यवहारं समुद्भासयति, इदमेव पारमेश्वर्याः शक्तेः परमत्वम्। अपरत्र सुषुप्तितुर्याद्यवस्थायाम् अयं विभुः चिन्मयत्वरूपेण भाति। तयोर स्वस्थयोः स्वातिरिक्तज्ञेयपदार्थाभावात् अत एव तत्र सर्वविधविभागशून्यस्वात्मस्वरूपे विश्रान्तशक्तिरीश्वर एव प्रकाशते। ननु जाग्रत्स्वप्नयोः ज्ञानज्ञेयरूपेण, सुषुप्तितुर्ययोः प्रकाशने भेदाभावात् पदद्वयमेव वक्तुमुचितं न पुनः पदचतुष्टयं चेत् उच्यते। सत्यमुक्तं भवता, किन्तु जाग्रत्स्वप्नपदार्थानां स्थिरत्वास्थिरत्वप्रतिपत्तिविकल्पप्रयुक्तेऽस्ति भेदव्यवहारः। अत एव तत्पृथग्रूपेण वर्तते अवस्थाद्वयम्। यतः परमेश्वरेण प्रकल्पिता सृष्टिजागरावस्था दृढतया ज्ञायते, स्वप्ने तु क्षेत्रज्ञपरिकल्पितसृष्टिः नैव दृढरूपा। तस्मात् जाग्रत्स्वप्नावस्थयोः भेदे हेतुरस्ति। एवञ्च सुषुप्तिदशायां चिन्मात्रस्वरूपे तत्त्वे विद्यमानेऽपि मोहवशात् अहंरूपेण उपलब्धुः चमत्काराभावात् स असद्वत् भाति, तुर्यपदे तु तत्त्वस्य परमार्थसत्तास्वरूपेण आत्मरूपतया

प्राज्ञ-तुर्यादिसंज्ञाभिः शास्त्रान्तरेष्वपि प्रसिद्धानि । 'ज्ञानज्ञेयभेदेन द्विरूपम्' इत्यादिना व्याख्यातमेतद्वृत्तौ ॥ १८ ॥

प्रबुद्धस्य सुप्रबुद्धतायै स्थितो यथा टीकाकारैर्न चेतितस्तथा परीक्ष्यतां स्वयमेव, कियत्प्रतिपदं लिखामः ॥ १८ ॥

इदानीमुक्तेन प्रकारेण प्रबुद्धस्यैव उपदेश्यत्वमुपक्रान्तं द्रढयितुम्, अप्रबुद्धानां च तत्प्रतिषेद्धुं श्लोकत्रयमाह—

यथेयं जागरादिमध्यदशापि प्रबुद्धं न प्रतिबध्नाति तथोपपादयति—

गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ १९ ॥

गुणस्पन्दस्य सत्त्वरजस्तमोरूपस्य ये निःष्यन्दाः प्रवाहाः, ते सामान्यस्पन्दमाश्रित्य प्रसृता अपि सततं ज्ञस्य विदितवेद्यस्य योगिनः स्युर्भवेयुः, भवन्त्यपरिपन्थिनः अनाच्छादका स्वभावस्य ॥ १९ ॥

'अतः' प्रस्तुतव्याख्यानश्लोकत्रयनिर्दिष्टात् हेतोः 'जाग्रदेव' प्रबुद्ध एव 'निजं भावम्' आत्मीयां पारमार्थिकीं सत्ताम् 'अचिरेण' अल्पीयसा कालेन 'अधिगच्छति' सम्यग् उपलब्ध्या स्वीकरोति । एवकारेणाप्रबुद्धं व्यवच्छिनत्ति । कीदृशः सन्नधिगच्छति ?—'स्पन्दतत्त्वविविक्तये सततमुद्युक्तः' स्पन्दस्य, परस्य शाक्तस्य तत्त्वस्य उपचरितसामान्यविशेषात्मकतया

गुणाः सत्त्वरजस्तमांसि येषां प्रकृतितत्त्वं विभवभूः ते मायातत्त्वावस्थिता इहाभिप्रेताः । यथोक्तं श्रीस्वच्छन्दे मायामसूरकविन्यासे—

'अधश्छादनमूर्ध्वं च रक्तं शुक्लं विचिन्तयेत् ।
मध्ये तमो विजानीयाद्गुणास्त्वेते व्यवस्थिताः ॥' [स्व० तं० २ । ६५]

इति । त आदयो येषां कलादीनां क्षित्यन्तानां स्पन्दानां विशेषप्रसराणां तेषां ये निःष्यन्दास्तनुकरणभुवनप्रसराः नीलसुखादिसंविदश्च तथा योग्यपेक्षया

उपलब्धिर्दृश्यते । अतः सुषुप्तितुर्ययोः भेदस्तु भवत्येव । तस्मात् अवस्थाचतुष्टयमुक्तं भिन्नशास्त्रेऽपि विश्वतैजसप्राज्ञतुर्यादिनामभिः चत्वारि पदानि स्वीकृतानि दृश्यन्ते । तेन नात्र किञ्चिदसामञ्जसम् ॥ १८ ॥

सम्प्रति पूर्वोक्तदिशा प्रबुद्ध एव उपदेशाधिकारीति दृढीकर्तुं तथा अप्रबुद्धानामुपदेशानर्हत्वसूचनाय श्लोकत्रयेणाह—गुणादीति । सत्त्वादिगुणानां साम्यावस्था अर्थात्

द्विप्रकारत्वेन व्याख्यास्यमानस्य, यत्तत्त्वं परमार्थः यथाक्रममुपादेयतया हेयतया च निश्चितं रूपं, तस्य विविक्तये विवेकाय पृथक्करणाय, एष उपादेयतमः परमकारणभूतस्य सत्यस्य आत्मस्वरूपस्य–अयमहमस्मि, अतः सर्वं प्रभवति, अत्रैव च प्रलीयते–इति प्रत्यवमर्शात्मको निजो धर्मः सामान्यस्पन्दः; तथैते अत्यन्तहेया विशेषस्पन्दा अनात्मभूतेषु देहादिषु आत्माभिमानमुद्भावयन्तः परस्परभिन्नमायीयप्रमातृविषयाः–सुखितोऽहं दुःखितोऽहम्–इत्यादयो गुणमयाः प्रत्ययप्रवाहाः संसारहेतवः;–इति विभागाय 'सततं' सर्वासु अवस्थासु अव्यवधानेन 'उद्युक्तः' उक्तवक्ष्यमाणोपपत्त्युपलब्ध्युपायप्रतिपत्त्यभिव्यज्यमानस्वबलबृंहणत्वात् अव्याहतोत्साहमध्यवसितः। एतेन प्रबुद्ध एव उपायपरिशीलनैकतानः सन् अचिरेण स्वरूपमुपलभते नान्यः,–इति प्रतिपादितम्। कुतो हेतोः स एवाधिगच्छति नान्यः? इत्याह–'गुणादिस्पन्दनिःष्यन्दा' इत्यादि यतो 'गुणादिस्पन्दनिःष्यन्दा ज्ञस्यापरिपन्थिनः स्युः' इति संबन्धः। स्पन्दानां क्षेत्रज्ञज्ञानादिशक्तीनां, निःष्यन्दा नानार्थोन्मुख्येन प्रसृताः प्रवाहा भिन्नाः प्रत्ययाः

बिन्दुनादादयस्ते सततं ज्ञस्य सुप्रबुद्धस्य कस्यचिदेवापश्चिमजन्मनोऽपरिपन्थिनः स्वस्वभावाच्छादका न भवन्तीति निश्चयः, यतस्ते सामान्यस्पन्दमुक्तरूपमाश्रित्य यत्र स्थितमित्यत्र निर्णीतदृशा लब्धात्मलाभास्तत एवोत्पन्नास्तन्मयाश्चेत्यर्थः। तथाहि—

'स्वाङ्गरूपेषु भावेषु पत्युर्ज्ञानं क्रिया च या।
मायातृतीये त एव पशोः सत्त्वं रजस्तमः॥' [ ई० प्र० ३।३।४]

इति श्रीप्रत्यभिज्ञोक्तदृशा चितिशक्तिरेव पारमेश्वरी ज्ञानक्रियामायाशक्तित्रितयतया श्रीसदाशिवादिपदे स्फुरित्वा संकोचप्रकर्षात्सत्त्वरजस्तमोरूपं क्रीडाशरीरं श्रयति, यतो निजचिच्छक्तिस्फारमयत्वात्तदधिष्ठितमेव सर्वदा सर्वं जानन्सुप्रबुद्धो गुणादिविशेषस्पन्दाननुच्छिन्दन्नपि स्पन्दतत्त्वावेशमय एव॥ १९॥

'अव्यक्तत्वम्' अस्मात् अव्यक्ततत्त्वात् निर्गतसमस्तप्राधानिकसर्गः विद्यते। सर्गरूपे प्रवाहिता-गुणस्पन्दाः सामान्यस्पन्दवत् भगवति परमशिवे समाश्रिताः सन्ति। अत एव सद्गुरोऽनुकम्पया यस्य योगिनस्तुर्यात्मिकशिवभूमिकायां प्रतिष्ठा जायते, तस्य समग्रवेद्यात्मकविशेषस्पन्दानाम् अनन्तधाराणां विद्यमानेऽपि सामान्यस्पन्दात्मकसत्यात्मकैकरूपताया अर्थात् अखण्डैकरसरूपतायाः प्रतिक्षणं स्फुरणं न व्यभिचरति, नैव तस्य कृते विशेषस्पन्दाः प्रतियोगिनो भवन्ति॥ १९॥

यथा त्वप्रबुद्धान्बध्नन्त्येते तत्प्रतिपादयति—

**अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।**
**पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥ २० ॥**

स्वल्पप्रबोधांस्तु स्वस्थितेः चिद्रूपायाः स्थगनं कृत्वा, ते गुणाः पातयन्ति दुरुत्तारे अस्मिन् विषमे संसारवर्त्मनि, यतस्तदात्मकमेव नित्यमात्मानं पश्यन्ति, न तु शुद्धबुद्धस्वरूपतया ॥ २० ॥

स्पन्दनिःष्यन्दाः, गुणा आदयः, प्रथमे प्रधानं येषां ते गुणादयः, सुखाद्यात्मकत्वेन सत्त्वादिमयाः गुणादयश्च ते स्पन्दनिःष्यन्दा,—अहं सुखी, दुःखी, मूढः—इत्यादयो ज्ञानभेदाः। किंरूपाः ? 'सामान्यस्पन्दसंश्रयात् लब्धात्मलाभाः' सामान्यस्य सर्वव्यापकस्यान्तर्लीनानन्तविशेषस्पन्दस्य परस्य शक्तिस्फुरितस्य 'संश्रयात्' सम्यक् अनन्यशरणतया श्रयणाद् भजनाद्धेतोः 'लब्धात्मलाभाः' लब्ध असादितः तेन तेन भिन्नेनाकारेण आत्मनः स्वस्वरूपस्य लाभ उदयो यैस्ते तथाविधा गुणादिस्पन्दनिःष्यन्दाः 'ज्ञस्य' परमेश्वरानुग्रहोदितहेयोपादेयप्रत्ययप्रमातृभावस्य, सामान्यस्पन्द एव परमेश्वरमुख्यशक्तित्वेन प्रतिष्ठितनिर्विकल्पप्रतिपत्तेः सुखाद्युपाध्युपरागजनितान्योन्यभिन्नरूपेभ्यो विशेषस्पन्देभ्यो व्यावृत्तस्वशक्त्यभिमानस्य उक्तवक्ष्यमाणयुक्त्यभ्यासनित्योद्योगेन विजिगीषमाणस्य 'अपरिपन्थिनः स्युः' स्वबलाविर्भावात् प्रतिहतस्वभावावरणसामर्थ्याः सन्तः अप्रतिद्वन्द्विनः संपद्येरन्, परतत्त्वोपलब्ध्युत्साहं निहन्तुं न प्रभवेयुरिति यावत्। इदमत्र तात्पर्यम्—ये केचन यस्य कस्यचिन्मायीयस्य प्रमातुः सुखाद्यात्मकत्वात् गुणमयाः स्पन्दनिःष्यन्दाः प्रत्ययसंधानाः प्रसरन्ति ते सर्वे एकमेव सामान्यस्पन्दमाश्रित्य तं तमात्मानं प्रतिलभन्ते;

अप्रबुद्धधियः प्रायः सर्वानप्रत्यभिज्ञातपारमेश्वरीशक्त्यात्मकनिजस्पन्दतत्त्वान्देहात्ममानिनो लौकिकान्प्राणाद्यात्माभिमानिनश्च मितयोगिनस्त्वेते पूर्वोक्ता गुणादिस्पन्दनिःष्यन्दाः स्वस्याः स्पन्दतत्त्वात्मनः स्थितेः स्थगनायोद्यता नित्यं तदुद्यमैकसाराः, दुःखेनोत्तार्यन्तेऽस्माद्दैशिकैर्जन्तुचक्रमिति दुरुत्तारे लङ्घयितुमशक्ये घोरे दुःखमये संसरणमार्गे पातयन्ति। यथोक्तं श्रीमालिनीविजये—

ये हि अप्रबुद्धः प्रमातारः सन्ति, तान् प्रति तु प्रतिक्षणं विशेषस्पन्दानामावरणं विद्यते। अप्रबुद्धानां प्रमातॄणाम् आन्तरे जगति स्थितां चिद्रूपतां गुणादिस्वरूपेषु प्रवहन्तो

प्रबुद्ध एव तु तदुदयाभिन्नप्रज्ञापात्रम्; अतस्तस्य नित्योद्योगिनः सतः एते प्रतियोगिनो भवितुं न प्रभवन्ति। ये त्वप्रबुद्धाः तैरेते दुर्निवारप्रसराः, इत्याह—'अप्रबुद्धधियस्तु' इत्यादि,—अप्रबुद्धा पारमेश्वरानुग्रहविरहाद्विगलितगाढाज्ञाननिद्रा धीः प्रज्ञा येषां ते तथा, तान् पुनरमी यथाव्याख्याता गुणादिस्पन्दनिःष्यन्दा 'घोरे' विभीषिकाशतसंकुलत्वाद्दारुणे, अत एव 'दुरुत्तारे' दुर्लङ्घ्ये 'संसारवर्त्मनि' जन्मादिप्रबन्धमार्गे 'पातयन्ति' तत्रानवरतं भ्रामयन्ति। कीदृशाः सन्तः?—'स्वस्थितिस्थगनोद्यताः' स्वस्मिन् परमात्मनि सामान्यस्पन्दमात्रकर्मके स्थितिर्निर्विकल्पप्रतिपत्तिप्रभवा सुस्थिरा प्रतिष्ठा तस्याः 'स्थगने' सद्य एव आच्छादने 'उद्यता' गृहीतोद्योगाः प्रतिपक्षभूतस्य प्रबोधस्याभावात् लब्धप्रसरत्वादेवमुपचरिताः। किम् उक्तं भवति?—यथा कांश्चिद् राजादीन् प्रमादित्वाद्यवस्थासत्त्वात् सदपि सैन्यादिस्वसामर्थ्यं सत्त्वेनाप्रतिपद्यमानान् अन्तरप्रेक्षिणो विपक्षाः स्वपदव्यपरोपणबद्धाभियोगा महति व्यसने पातयन्ति, आ स्वसामर्थ्यसद्भावप्रतिपत्तेः। एवमप्रबुद्धस्य सर्वकर्तृत्वादिलक्षणं निजं महिमानं सामान्यस्पन्दरूपं

'विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून्।
रुद्राण्न्याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः॥' [ मा० वि० ३। ३१। ]

इति। तथा हि पूर्वं प्रतिपादिता येयं स्पन्दतत्त्वात्मा पराशक्तिः सैव विश्वस्यान्तर्बहिश्च वमनात्संसारवामाचारत्वाच्च वामेश्वरीशक्तिः तदुत्थापितानि तु खेचरीगोचरीदिक्चरीभूचरीरूपाणि चत्वारि देवताचक्राणि सुप्रबुद्धस्य परभूमिसंचारीणि अप्रबुद्धानां तु अधराधरसरणिप्रेरकाणि। तथा हि या एव सुप्रबुद्धस्य खे बोधगगने चरन्त्यः खेचर्योऽकालकलितत्वाभेदसर्वकर्तृत्वसर्वज्ञत्वपूर्णत्वव्यापकत्वप्रथाहेतवस्ता एवाप्रबुद्धस्य शून्यप्रमातृपदचारिण्यः कञ्चुकरूपतया स्थिताः कालकलितत्वकिंचित्कर्तृताकिंचिज्ज्ञताभिष्वङ्गनियमहेतवः। गौर्वाक् तदुपलक्षितासु संजल्पमयीषु बुद्ध्यहंकारमनोभूमिषु चरन्त्यो गोचर्यः सुप्रबुद्धस्य स्वात्माभेदमयाध्यवसायाभिमानसंकल्पाञ्जनयन्ति मूढानां तु भेदैकसारान्। दिक्षु दशसु बाह्येन्द्रियभूमिषु चरन्त्यो दिक्चर्यः सुप्रबुद्धस्याद्वयप्रथासाराः अन्येषां द्वयप्रथाहेतवः। भूः रूपादिपञ्चकात्मकं मेयपदं तत्र चरन्त्यो भूचर्यस्तदाभोगमय्या आश्यानीभावतया तन्मयत्व-

विशेषस्पन्दा आवृत्य हठात् तान् परमार्थतः दूरीकुर्वन्ति, घोरसुखदुःखद्वन्द्वात्मकसंसारसागरे पातयन्ति च। यतो हि एते अप्रबुद्धजीवाः निरन्तरं स्वस्वरूपं तदगुणात्मकविशेषस्पन्देष्वेव

विद्यमानमपि अप्रतिबुद्ध्यमानस्य सर्वकार्यपरतन्त्रं देहादिसर्गमेवात्मत्वेनावगच्छत एते लब्धप्रसराः सुखितोऽहम् इत्यादयो गुणप्रधानाः प्रत्ययप्रवाहाः सत्ये स्वात्मनि स्थितिं व्यवधाय संसारमेवासादयन्ति, आ प्रबोधप्राप्तेः,—

मापन्नाः भूचर्यं सुप्रबुद्धस्य चित्प्रकाशशरीरतयात्मानं दर्शयन्त्य इतरेषां सर्वतोऽप्यवच्छिन्नतां प्रथयन्त्यः स्थिताः,—इत्येवं प्रमात्रन्तःकरणबहिष्करणप्रमेयरूपतयैव तानि चत्वारि चक्राणि गुणादिस्पन्दमयान्यप्रबुद्धबुद्धीँल्लौकिकांस्तथा बिन्दुनादादिप्रथामात्रसंतुष्टान् योगिनस्तत्तत्त्वप्रसररूपे संसारे पातयन्ति ॥ २० ॥

यत एवम्—

अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये ।
जाग्रदेव निजं भावमचिरेणाधिगच्छति ॥ २१ ॥

अतः सततं सर्वकालं यः करोत्युद्योगं स्पन्दतत्त्वस्य स्वरूपाभिव्यक्त्यर्थं, स जाग्रदवस्थायामेव निजमात्मीयं तुर्यभोगाख्यं स्वभावम् अचिरेणैव कालेन प्राप्नोति ॥ २१ ॥

इति प्रबुद्धा एवास्योपदेशस्य विषया नाप्रबुद्धाः । तेषां हि कथंचिद् गृहीतमप्युपदेशवचनं निश्चायकप्रतिपत्तिशिथिलप्रज्ञत्वान्नान्तर्विश्राम्यति । यथोक्तं केनापि—

'ज्ञेयत्वमप्युपगता हृदये न रोढुं
शक्ताः प्रमूढमनसामुपदेशवाचः ।
आर्द्रत्वमादधति किं नलिनीदलानां
श्लिष्टा निरन्तरतयापि नभोऽम्बुधाराः ॥

उक्तवक्ष्यमाणरूपस्य स्पन्दतत्त्वस्य विविक्तये विमर्शनाय सततमुद्युक्तः—
'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।' ( भ० गी० १२।२)
इति गीतोक्तदृशा सततमेवान्तर्मुखस्वरूपनिभालनप्रवणो यः स जाग्रदेव

पश्यन्ति । गुणत्रयजनितसुखदुःखमोहादिरूपोपाधिकालुष्यशून्यशुद्धसंविद्रूपशिवम् अनुभवितुम् असमर्थाः भवन्ति ॥ २० ॥

साधकपुरुषः स्पन्दतत्त्वस्य साक्षात्कारमविरतोत्साहबलेन अचिरेणैव समयेन प्राप्नोतीति—अत इति । यः शाक्तभूमिकायां समारूढो योगी अविरतकालं परमतत्त्व-

इति । तत्र 'जाग्रदवस्थायामेव' इति वृत्तिग्रन्थः, प्रकृतानुसारेण प्रबुद्धावस्थायाम्,--इति बोद्धव्यम् । यदि वा सततोद्युक्तपदेन प्रबुद्धस्वीकारे सति सततोद्युक्तः प्रबुद्धो वक्ष्यमाणोपदेशक्रमेण जाग्रदवस्थायां व्यवहारदशायामेव निजं भावमधिगच्छति,--इति व्याख्येयम् । व्याख्यातमेतत् श्लोकत्रयं वृत्तौ विभागेन 'अतः सततं सर्वकालं यः करोति' इत्यादिना । तथा 'गुणस्पन्दस्य सत्त्वरजस्तमोरूपस्य' इत्यादिना । तथा 'स्वल्पबोधांस्तु' इत्यादिना ग्रन्थेन ॥ १९ ॥ २० ॥ २१ ॥

जागरावस्थास्थित एव निजमात्मीयं शंकरात्मकं स्वस्वभावमचिरेणाधिगच्छति, तथा अस्य शंकरात्मा आन्तरः स्वभावः स्वयमेवोन्मज्जति येन प्रबुद्धो नित्योदितसमावेशासादनात्सुप्रबुद्धो जीवन्मुक्तो भवतीत्यर्थः ॥ २१ ॥

एवं प्रबुद्धस्यैव जागरतुर्यपदयोरुपदेश्यत्वे व्यवस्थापिते सर्वशरीरिसाधारणजाग्रद्वृत्त्यन्तरलीनामेव तावत्परतत्त्वोपलब्धिमुपदेष्टुमाह--

यथास्योद्युक्तस्य बलवदालम्बनवशोदितानायासतदन्यसकलवृत्तिक्षयमयीषु नियतासु यास्ववस्थासु स्पन्दनिधानमुन्मुद्रितमभिमुखीभूतमास्ते ता एताः प्रथममुद्योगस्य विषया इत्युपदेष्टुमाह—

अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन् ।
धावन्वा यत्पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥ २२ ॥

तस्य च स्पन्दतत्त्वस्य अतिक्रुद्धेः प्रहृष्टे धावमाने च किं करोमि, इत्येवं चिन्ताविष्टे यदा शक्तिप्रत्यस्तमयः, तदा स्पन्दतत्त्वस्य स्फुट एवोदयो गुरूपदेशात् अधिगन्तव्यः ॥ २२ ॥

स्वरूपस्य स्वभाव प्राप्त्यर्थं यतते, स तु जाग्रदवस्थामेव संवित्प्रकाशात्मस्वस्वभावस्य अपरोक्षानुभूतिरतिशीघ्रतया करोति । इदमत्र तात्पर्यं स्वीयस्पन्दतत्त्वाभिव्यक्तये निरन्तरं स्वात्मानुसंधातरूपयत्नस्य महती अपेक्षा दरीदृश्यते । अनेन सद्भावनायाः मनसि उत्पत्तिर्भवति । उक्तञ्च श्रीतन्त्रालोककारेण—

'विकल्पः संस्कृतः सूते विकल्पं स्वात्मसंस्कृतम् ।
स्वतुल्यं सोऽपि सोऽप्यन्यं सोऽप्यन्यं सदृशात्मकम् ॥'

अनेन इदमत्र सूचितं तत्त्वजिज्ञासुना साध्यसिद्धये दृढसङ्कल्पेन अविरतं प्रयत्नवता भाव्यम् ॥ २१ ॥

सामान्यविशेषभेदेन प्रतिष्ठिताप्रतिष्ठितरूपत्वात् स्पन्दस्य द्वैविध्ये स्थिते, उपादेयः 'प्रतिष्ठितः स्पन्दः' तत्र पदे उपलभ्यते इति संबन्धः। यः प्रतिष्ठितश्चलत्वव्यपदेशहेतुः सुखित्वाद्यनित्यविशेषस्पन्दाविषयशक्तिचक्र-परमात्मधर्मः, स 'तत्र' तस्मिन् अधुनैव निर्दिश्यमाने पदे उपलक्षणीयः। कस्मिन्? 'यत्पदम् अतिक्रुद्धो गच्छेत्' प्रत्यग्रक्षत-दारुणोपद्रव-द्विषद्दर्शना-दिना तीव्रतरकोपाविष्टः तज्जन्यविकारावस्थायाः प्रागेव झटिति जातमात्र-क्रोधो 'यत्पदं' यां भूमिकां 'गच्छेत्' मनसा आसादयेत्; तथा 'अतिप्रहृष्टो यत्पदं गच्छेत्' मृतप्रत्युत्थितप्राणसमप्रमदादिदर्शनादिना 'प्रहृष्टः' प्रकृष्टेन परमेणातिशयेन हृष्टः प्रमुदित आनन्दनिर्भरः, तथैव उत्पन्नमात्रहर्षो यत्पदं गच्छेत्; तथा 'किं करोमि इति मृशन्' यत् पदं गच्छेत्; क्रुद्धेन राज्ञा रिपुणा वा बलवताभियुक्तस्तत्प्रतीकाराय कर्तव्यानिश्चयमलभमानः केवलं 'किं करोमि' किमुपायमत्रावलम्बेय--इति प्रतिपत्तिमूढ एव 'मृशन्' विकल्पयन् निरालम्बनचित्तवृत्तिर्यां भूमिकामधितिष्ठेत् तत्र प्रतिष्ठित-स्पन्दोपलब्धिरित्यर्थः, एतेन प्रकारत्रयेण दुःख-सुख-मोहात्मविषयग्रहण-रूपान्तःकरणव्यापारमयजाग्रदवस्थाविषयेण एवंविधानि प्रकारान्तराणि संगृहीतानि वेदितव्यानि। तेन अतिक्रुद्धवत् अशङ्कितेष्टजनविनाशश्रवणा-दिना कारणेन अतिशोकाविष्टोऽपिशोकव्यञ्जकास्त्रुप्रलयादिविकृतेः प्रागेव समुन्मिषितमात्रशोको यत्पदं गच्छेत्; तथा अकस्मात् कुपितकृष्णोरगव्या-घ्रादिग्रासगोचरगमनादिना निमित्तेन अतिभीतः तथैव सद्यः समुद्भूतमा-त्रभयो यत्पदं गच्छेत्; तथात्यन्तजुगुप्सास्पदपदार्थदर्शनादिहेतुना जातमात्र-जुगुप्सो यत्पदं गच्छेत्, तत्रापि प्रतिष्ठितस्पन्दोपलब्धिः,--इत्युपदिष्टं

सर्वत्र तावदुपायमार्गे समस्तेतरवृत्तिप्रशमपूर्वमेकाग्रीभवन्ति योगिनः, एतास्वतिक्रोधाद्यवस्थासु स्वरसत एव समस्तापरवृत्तिक्षयमयीषु यदि स्पन्दतत्त्वविविक्तये सततमुद्युक्तो झटित्यन्तर्मुखीभवन्ति योगिनस्तत्समीहि-तमचिरेणैव लभन्ते। अयोगिनस्त्वत्र मूढा एवेति तात्पर्यम्। तथाहि समनन्त-रविहितदारुणोपघातशत्रुदर्शनान्मर्मस्पर्शितत्तद्वचनाकर्णनाद्वा प्रथममेवोन्मि-षत्संजिहीर्षादेवताबलादन्तर्मुखीभवद्रश्मिचक्रोऽतिक्रुद्धः, चिरप्रार्थितप्राणेशी-वदनेन्दुदर्शनादेव तत्क्षणमेवोन्मज्जत्पूर्णाभिलाषदेवतावशविकासितानुधाव-त्समस्तकरणचक्रः प्रहृष्टो वा, बलवदाततायिबलेन सर्वतो वलितत्वात्का-

पूर्वोक्तदिशा प्रबुद्ध एव जागरिततुर्ययोरुपदेशाधिकारीति व्यवस्थापितम्, इदानीं समस्तदेही साधारणजाग्रद्वृत्तिरान्तरलीनां परतत्त्वोपलब्धिमुपदिष्टुमाह—अतिक्रुद्ध इति।

भवति; क्रोध-शोक-भय-जुगुप्सभेदेन चतुर्विधस्य दुःखराशेः अतिक्रुद्धशब्देन उपलक्षितत्वात्। तथा प्रहृष्टवन्निजवीर्यबलसंपत्तिसंभावनादिहेतुना सुदुष्करमपि कार्यं निर्वर्तयितुं निर्विकल्पमेव उत्सहमानो झटिति यत्पदं गच्छेत्; तथैव अदृष्टपूर्वपरमरमणीयादिपदार्थदर्शनादिवा सपदि अतिविस्मयाविष्टो यत्पदं गच्छेत्; तथा कुहनादिना कारणेन उत्पन्नमात्रातिहासो यत्पदं गच्छेत्, तत्रापि प्रतिष्ठितस्पन्दोपलब्धिः,—इत्युपदिष्टं भवति; हर्षोत्साह-विस्मय-हासभेदेन चतूरूपसुखराशेरतिप्रहृष्टशब्देनोपलक्षितत्वात्। तथा किंकर्तव्यतामूढवत् दूरत्वादिना दृष्टार्थनिश्चयावधारणाभावात् संशयाविष्टो यत्पदं गच्छेत्, तत्रापि पूर्ववदुपलब्धिः,—इत्युपदिष्टं भवति; विस्मरणादि-दशासु तत्त्वाप्रतिपत्तिलक्षणस्य बहुविधस्य मोहराशेः किंकर्तव्यतामूढभावेन उपलक्षणात्। एवमन्तकरणव्यापाररूपजाग्रदवस्थाश्रयं परतत्त्वोपलब्ध्युपायमभिधाय, बुद्धीन्द्रियव्यापारूपजाग्रदवस्थाश्रयस्य अस्य 'यथा ह्यर्थोऽस्फुटो दृष्टः' ( ४ नि० ६ का० ) इत्यत्र प्रसङ्गाद्वक्ष्यमाणत्वात्; संप्रति कर्मेन्द्रियव्यापाररूपजाग्रदवस्थाश्रयं तं पदं प्रतिपादयितुमाह—'धावन्वा यत्पदं गच्छेत् तत्र' इति 'तत्र' तस्मिन्नपि पदे प्रतिष्ठितस्पन्दोपलब्धिः। तत्र हि इच्छाप्रयत्नज्ञानक्रियादिवृत्तीनां विभागाग्रहणाद् अद्वयेश्वररूपाभिव्यक्तिः। तथा हि—धावतः प्रतिपदं पदोज्जिहीर्षोद्धारप्रयत्नदेशावधारण-

न्दिशीकः किं करोमीति मृशन्विकल्पयन्संशयधाराधिरोहात्मनि पदेऽनुप्रविष्टः क्षीणसकलालम्बनविकसत्संशयसंविन्निरालम्बनीकृतवृत्तिप्रसरो वा, मत्तवारणाद्यनुबध्यमानो धावन् शरीरनिरपेक्षमेव स्वात्मप्रवणीकृतेतरवृत्तिप्रसरदुद्योगदेवीप्रेरणयातित्वरितपलायनक्रियाविष्टो वा; एवमन्यास्वप्येवंप्रायासु सिंहाजगराद्यवलोकनजनितमहात्रासाद्यवस्थासु यद्वृत्तिक्षयात्मकं पदं गच्छेदधितिष्ठेत् स्पन्दतत्त्वविविक्तये सततमुद्युक्तो यो योगिजनस्तस्य तत्र वृत्तिक्षयात्मके पदेऽवस्थाविशेषे स्पन्दः प्रतिष्ठितः स्पन्दतत्त्वमभिमुखीभूतमेव तिष्ठति। तस्मादेतद्वृत्तिक्षयपदं संचेत्य झटिति कूर्माङ्गसंकोचयुक्त्या क्रोध-संशयवृत्तीः प्रशमय्य महाविकासव्याप्तियुक्त्या वा प्रहर्षधावनवृत्तीर्विस्फार्या-

स्पन्दतत्त्वस्य द्वैविध्यं सामान्यविशेषभेदेनेति तु शास्त्रेऽस्मिन् विवेचितम्। तत्र सामान्यस्पन्दतत्त्वः प्रतिष्ठितः। विशेषस्तु अप्रतिष्ठितः। साधकपुरुषैः प्रतिष्ठितस्य स्पन्दतत्त्वस्य संप्राप्तिः कर्तव्या। स्वभावमाश्रितः सामान्यस्पन्दः मुख्यः वर्तते। अस्मिन्नैव मुख्ये स्पन्दतत्त्वे समग्रविशेषशक्तिसमूहात्मकपरमात्मधर्मस्तिष्ठति। अतिक्रुद्धः, अतिप्रसन्नः, किंकर्तव्यविमूढस्तथा धावन् अहं सुखी, अहं दुःखी—इत्याद्यनुभविता एतेषां ये ज्ञानभेदाः सन्ति, तेषां

पदविन्यासक्रियादिषु वृत्तिविशेषेषु सत्स्वेव अनवधार्यमाणविभागत्वात् अस्तित्स्वव संवित् अविभागपरस्वभावमात्रप्रतिष्ठिता भवति, तदा परवश एव पुमानैश्वरं रूपमाविशति । एतदपि वागादिकर्मेन्द्रियव्यापारोपलक्षणार्थं वेदितव्यम् । तेन धावद्वद् अतिचतुरवर्णस्वरोच्चारव्यग्रवाग्वृत्तिरपि यत्पदं गच्छेत्, तथा वीणावेणुवादनादित्वरिततरव्यापार्यमाणकराङ्गुलिकलापो यत्पदं गच्छेत्; तत्रापि प्रतिष्ठितस्पन्दोपलब्धिः,--इत्युपदिष्टं भवति; सर्वकर्मेन्द्रियव्यापाराणां धावत्पदेन उपलक्षणात् । 'यथा ह्यर्थोऽस्फुटो दृष्ट' इत्यादिश्लोके बुद्धीन्द्रियव्यापारगताम् एतामुपलब्धिं दर्शयिष्यति । यद्यपि च सर्वस्य प्राणभृतः सर्वासु अवस्थासु सर्वेन्द्रियवृत्तयो न अन्तरेण नित्योदितप्रतिष्ठितस्पन्दप्रकाशपरिस्फुरितसमापत्तिम् उन्मिषितुमेव प्रभवन्ति, तथापि मायाशक्त्युद्भावितभेदावभासबलात् नानात्वेन उल्लसद्भिः अनन्तैः ज्ञानक्रियाविशेषैः व्यवधीयमान इवासौ प्रतिष्ठितः स्पन्दः प्रबुद्धस्यापि उपलब्धिगोचरत्वं गमयितुमशक्य,--इति तदुपलब्धियोग्याः काश्चिदेव अतिक्रुद्धत्वादयो दशा उपायत्वेन संगृह्य उपदिष्टाः । एताश्च प्रबुद्धस्य प्रत्यवमृश्यमानाः सद्यः प्रतिष्ठितस्पन्दोपलब्ध्युपायतां भजन्ते, न तु अनुभूयमानाः; सा हि अवस्था दुःखादिमय्येव । ततो निष्कान्तस्तु प्रबुद्ध उपदेशबलाद् उपजातदृशात्मस्वरूपविवेचनक्षमप्रज्ञातिशयः स्पन्दस्त्वमनुभवति; यदनुशीलनैकाग्र्यात् क्रमेण सुप्रबुद्धपदवीमधिरूढः सर्वत्र अनुभविष्यति,--इति । विवृतमेतत्--'तस्य च स्पन्दतत्त्वस्य' इत्यादिना वृत्तौ ॥ २२ ॥

भिमुखीभूतनिजस्पन्दशक्तिविमर्शवता योगिना भाव्यम् । यथोक्तं श्रीविज्ञानभैरवे—

'कामक्रोधलोभमोहमदमात्सर्यगोचरे ।
बुद्धिं निस्तिमितां कृत्वा तत्तत्त्वमवशिष्यते ॥ (वि० भै० १०१)
आनन्दे महति प्राप्ते दृष्टे वा बान्धवे चिरात् ।
आनन्दमुद्गतं ध्यात्वा तल्लयस्तन्मना भवेत् ॥ (वि० भै० ७१)
क्षुताद्यन्ते भये शोके गह्वरे वा रणद्रुते ।
कुतूहले क्षुधाद्यन्ते ब्रह्मसत्ता समीपगा' ॥ ( वि० भै० ११८ )
इति ॥ २२ ॥

स्थितिस्तु सामान्यस्पन्दतत्त्वबलादेव । यत्पदगमनं स्यात् तत्र सर्वत्र स्पन्दतत्त्वस्यैव प्रतिष्ठा वर्तते, येषां विशेषस्पन्दतत्त्वद्वयात्मकाः स्युः, तेषु भगवतः परमशिवस्य सामान्यस्पन्दः प्रतिष्ठितो वर्तत इत्थमुपदेशम् । तस्मात् सर्वत्र पारमेश्वरं तत्त्वमस्ति इत्यनुसंधेयम् ॥ २२ ॥

अथ जाग्रद्वृत्त्यन्तर्लीनतुर्यदशागतस्वभावोपलब्धये श्लोकत्रयमुपायोपदेशमाह, तत्र युगलकं तावत्--

एवमेतास्ववस्थासूक्तयुक्त्या प्रथमं स्पन्दशक्तिं परिशील्य तदनु तामेवानुसंदधत्सर्वास्ववस्थासु तद्दाढर्यानुप्रवेशमयीं जीवन्मुक्ततामाहरेत् सततोद्युक्त इत्युपदिशति—

**यामवस्थां समालम्ब्य यदयं मम वक्ष्यति ।**
**तदवश्यं करिष्येऽहमिति संकल्प्य तिष्ठति ॥ २३ ॥**
**तामाश्रित्योर्ध्वमार्गेण चन्द्रसूर्यावुभावपि ।**
**सौषुम्नेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ॥ २४ ॥**
**तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे ।**
**सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥ २५ ॥**

यां स्पन्दस्वरूपरूपामवस्थामवलम्ब्य 'यत्किंचित् अयं मम वक्ष्यति, तत् अवश्यं करिष्यामि' इत्यध्यवसायेन स्पन्दतत्त्वमधिष्ठाय यो वर्तते ॥ २३ ॥

तस्य, तामवस्थामाश्रित्य पुरुषस्य, सोमसूर्यौ द्वावपि सौषुम्ने अध्वनि मध्यनाड्यभिधाने, अस्तमयं कुरुतः, ब्रह्माण्डगोचरं शरीरमार्गं परित्यज्य योगिनः ॥ २४ ॥

तस्मिन् महाव्योम्नि प्रत्यस्तमित-शशिभास्करे यस्य स्वस्वभावाभिव्यक्तिः न सम्यक् वृत्ता, स स्वप्नादिना मुह्यमानोऽप्रबुद्धो निरुद्धः स्यात्, प्रबुद्धः पुनरनावृत एव भवति ॥ २५ ॥

'तां' यच्छब्दोपलक्षितवाक्यनिर्दिष्टाम् अवस्थां दशाम् 'आश्रित्य' आसाद्य पुरुषस्य 'चन्द्रसूर्यौ' मनःप्राणौ द्वावपि युगपदेव 'अस्तमितः' प्रलीयेते ।

अयं शंकरात्मा स्वभावो यन्मम वक्ष्यति अभिव्यक्तं सत् यच्चिदानन्दघनमनुभूतपूर्वं स्वरूपं मां विमर्शयिष्यति तदवश्यमहं करिष्ये बहिर्मुखतां हित्वा

जाग्रद्वृत्तौ अन्तर्हिततुर्यावस्थायां विद्यमानस्य स्वभावस्य प्राप्तये उपायमुपदेशमाह—यामिति । स्वस्वरूपशंकरात्मकचितिशक्तिः मम यद्वक्ष्यति प्रत्यक्षरूपा सती यत्

किं कृत्वा? तादृग्दशाश्रयणसामर्थ्यादेव 'ब्रह्माण्डगोचरं हित्वा' यदन्तस्तद्बहिः—इति 'ब्रह्माण्डं' शरीरं स एव 'गोचरः' स्वप्रसराधिकरणं, तं 'हित्वा' त्यक्त्वा संवेद्यताभावादतिक्रम्येत्यर्थः। केन पथा अस्तमितः? 'ऊर्ध्वमार्गेण' सर्वातिरिक्तेन अलौकिकेन वर्त्मना। तथा च—चन्द्रशब्दप्रतिपादिता मनःप्रसररूपा ज्ञानशक्तिः इदं हेयमिदमुपादेयम्—इति द्विधा संसारगोचरैव, आलम्बनीयं निजं विषयमतीत्य तस्यां दशायां मध्यस्थतां प्राप्य स्वकारण एव अस्तमेति तथा सूर्यशब्दोदिता प्राणप्रसररूपा क्रियाशक्तिः नानानाडीसंचारलक्षणां कुसृतिमखिलां खिलीकृत्य सामान्यप्राणरूपतामापन्ना लोकातिरिक्तेन पथा स्वपद एव शाम्यति। ततः 'सौषुम्नेऽध्वन्यस्तमित' इत्याह—सुषुम्नाभिधा शरीरमध्यमध्यासिता या नाडी तदीये 'अध्वनि' परस्याः पारमेश्वर्याः शक्तेः प्रवहणमार्गे प्रशाम्यतः; ज्ञेयकार्योपरागपरित्यागात् परशक्तिरूपतामापद्येते,—इति यावत्। कां तां दशामाश्रित्य? इत्याह—'यामवस्थां समालम्ब्य' सम्यक्त्यक्तसमस्तवस्तुव्यापृतिस्तिमितसर्वशक्तितया अवलम्ब्य अवष्टभ्य कस्मिंश्चिदवसरे पुरुषस्तिष्ठति। किं कृत्वा? समालम्ब्येति, समालम्बनक्रियापूर्वभाविविक्रियान्तरनिष्ठं वाक्यमाह—'इति संकल्प्य' इति, इत्येवं संकल्पं कृत्वा। कथं? 'यदयं मम वक्ष्यति तदवश्यं करिष्येऽहम्' इति, यस्य आज्ञातिक्रमात् सद्य एव प्राणात्ययादिरनर्थः समापतति, सोऽत्र राजादिः 'अयम्' इति निर्दिष्टः, 'अयं यद्' वस्तु 'मम' कर्तव्यतया 'वक्ष्यति' जल्पिष्यति 'तदवश्यं' सर्वात्मना परिहृतसमस्तान्यकरणीयोऽहं 'करिष्ये' संपादयामि,—इति युगलकस्य वाक्यार्थसंगतिः। इदं तु तात्पर्यम्—केनचित्कारणेन अवश्यकरणीयवचसा प्रभविष्णुना कारयितव्यवस्तुविवक्षया आक्षिप्तस्य

तत्प्रवण एव भविष्यामि इति संकल्प्य निश्चित्य यामतिक्रोधाद्यवस्थास्वनुभूतचरीं चिदानन्दघनां स्पन्दात्मिकामवस्थामवलम्ब्य प्राप्यत्वे नाभिसंधाय तिष्ठति शमितविकल्पगतिमविकल्पामवस्थामविचलत्वेन भजते यो योगी तदीयां तामवस्थां समाश्रित्य चन्द्रसूर्यौ अपानः प्राणश्चोभावपि हृदयभूमौ मिलित्वा युगपदेव सौषुम्नेऽध्वनि ब्रह्मनाड्यामूर्ध्वमार्गेणोदानपथेनास्तमितः शाम्यतः, कथं ब्रह्माण्डलक्षणं गोचरं हित्वा ब्रह्मबिलाधिष्ठातृब्रह्माधिष्ठिमण्डं मुक्त्वा ऊर्ध्वकवाटान्तां देहव्याप्तिं त्यक्त्वा तदा चोल्लङ्घितदेहव्याप्तिकेऽत एव प्रकर्षेण लीनावुक्तरूपौ शशिभास्करौ यत्र तस्मिन्महाव्योम्नि निःशेष-

सच्चिदानन्दघनरूपं मां यथा प्रबोधयिष्यति तथैव अहं बाह्यविषयान् परित्यज्य तन्मय एव भविष्यामीति सुदृढतया निश्चित्य तां चितिमेवावलम्ब्य अलौकिक अनिर्वचनीयमात्रेण

पुंसः तद्वचनशुश्रूषामात्रनिविडावधानत्वात् समस्तवृत्तिप्रत्यस्तमये सति, संवित् तुरीयां दशाम् अवश्यमेवाविशति, तत्प्रत्यवमर्शाभ्यासात् परतत्त्वोपलब्धिः,--इति। अत्र ब्रह्माण्डगोचरशब्देन शरीराकाशस्य चन्द्रसूर्यशब्दाभ्यां मनःप्राणप्रसरयोश्च प्रतिपादनम्। प्रयोजनम् अनेन उपदेशेन प्रत्यभिज्ञापिततुरीयदशाप्रत्यवमर्शाभ्यासकाष्ठाधिरोहिः प्रबुद्धस्य निखिलबाह्याभ्यन्तराध्वातिक्रान्तपरमपदविश्रान्तिलाभः,--इति। व्याख्यातमेतत् पृथक् वृत्तिकृता--'यां स्पन्दरूपामवस्थाम्' इत्यादिना--'तस्य तामवस्थाम्' इत्यादिना च ग्रन्थेन ॥ २४ ॥

ननु एवंविधा दशा सर्वस्य कस्यचित्कथंचित् उपजायत एव, तत्किमुपदेशेन--इत्याह--

'तदा' तत्र तादृशदशाविशिष्टे काले सौषुम्नाध्वशब्दप्रतिपादिते 'महाव्योम्नि' परमाकाशे समस्तवेद्यव्यतिरिक्तस्वरूपत्वात् शब्दगुणात्मकभूताकाशस्वरूपवैलक्षण्याच्च महाव्योमशब्दप्रतिपादिते स्वस्वभाव एव, कीदृशे ? 'प्रलीनशशिभास्करे' प्रत्यस्तमितसमस्तज्ञानक्रियाप्रसरप्रपञ्चे, मूढः परमेशतिग्मरश्मिपरमशक्त्यंशुस्पर्शाभावाद् अनिद्राणपशुप्रत्ययनिद्रावसादः सौषुप्तपदवत्स्यात्' सुषुप्तावस्थायामिव भवेत्। यथा सुषुप्तावस्था प्रलीनाखिलवेद्यप्रपञ्चरूपापि अप्रबुद्धस्य तत्कालम् अनुभवसामर्थ्याभावात्

वेद्योपशमरूपे परमाकाशे प्राप्तेऽपि यः शिथिलप्रयत्नतया खेचर्याद्यात्मना गुणादिस्पन्दनिःष्यन्देन व्यामोहितत्पात् सौषुप्तपदवद्भवति, सौषुप्तेन च सुप्तमप्युपलक्षितं, तेन च स्वप्नसुषुप्तवत् यः शून्यादिभूमिमेवाधितिष्ठति स योगी सम्यगनभिव्यक्तस्वस्वभावो मूढ इत्युच्यते। यथोक्तं श्रीभट्टकल्लटेन—

'यां स्पन्दात्मिकामवस्थामवलम्ब्य।'

इति 'योगिनः'।

इति च

'यस्य स्वस्वभावाभिव्यक्तिर्न सम्यक् वृत्ता स स्वप्नादिना मुह्यमानोऽप्रबुद्धो निरुद्धः स्यात्।'

इति। यस्तु तत्रापि प्रयत्नपाटवादुद्यन्तृताबलात् क्षणमपि न शिथिलीभवति

चन्द्रसूर्यात्मकमनःप्राणादावपि हृदयभूमौ मिलित्वा तत्क्षणमेव सौषुम्नमार्गे यथा शाम्यस्तदा समग्रब्रह्माण्डरूपविषयं विहाय महाव्योम्नि अर्थात् परमाकाशे समस्तवेद्यरहिते प्राप्तेऽपि यः प्रयत्नं नैव कुरुते स योगी सम्यगनभिव्यक्तस्वस्वभवो मूढ एव भवति, यस्तु प्रयत्नशैथिल्यं

**मोहमय्येव, तथा एषा तुर्यदशापि मोहात्मिकैव। 'प्रबुद्धः' पुनरीश्वरशक्तिपातप्रभावात् प्रकर्षेण लोकातिरिक्तातिशयेन बुद्धः प्रत्युदितसम्यगज्ञानदृष्टिः तादृग्दशाप्रत्यवमर्शावसरानुभूततुर्याभोगः 'अनावृतो' देहाद्यवच्छिन्नाहंप्रत्ययरूपेण आवरणेन वियुक्तः 'स्यात्' संपद्येत। तदेतत्--'तस्मिन्महाव्योम्नि' इत्यादिना ग्रन्थेन व्याख्यातं वृत्तौ ॥ २५ ॥**

स तमसानभिभूतत्वात् चिदाकाशमयत्वेनैवावस्थितः प्रबुद्ध उच्यते, अत एव सततोद्योगवतैव योगिना भवितव्यम्;—इत्यादिष्टं गुरुभिः, इति शिवम् ॥ २३-२४-२५ ॥

इति श्री कल्लटाचार्यविरचितायां स्पन्दकारिकावृत्तौ प्रथमो निःष्यन्दः ॥१॥

इति श्रीमहामाहेश्वराचार्यक्षेमराजानकनिर्मिते स्पन्दनिर्णये
स्वरूपस्पन्दः प्रथमो निःष्यन्दः ॥ १ ॥

न करोति। अपितु सद्गुरूपदेशमार्गेण निरन्तरमुद्योगशीलो भवति स प्रबुद्धः सन् सर्वविश्व दृष्टावरणैरनावृत्तो जायते ॥ २३-२४-२५ ॥

•

# द्वितीयो निष्यन्दः

**एवं देहादिवेद्यवर्गव्यतिरिक्तत्वेन सर्वदशानुस्यूतोपलब्धृमात्रलक्षणैकस्वभावत्वेन च उपपादितस्य प्रतिपादितोपलब्ध्युपायस्य स्वात्मन एव शंकरस्य यत्सामर्थ्यं तदेव अवश्यकरणीयशास्त्रचोदितक्रियासाधनभूतानां**

एवं प्रथमनिःष्यन्देन स्वस्वरूपात्मकं युक्त्युपपन्नं साभिज्ञानं निमीलनसमाधिप्रत्यभिज्ञेयं स्पन्दतत्त्वं प्रतिपाद्य यथा सततं तत्स्वरूपसमासादनेन सुप्रबुद्धता प्राक्सूचिता भवति तथा इदानीं तस्यैव वैश्वात्म्यमुन्मीलनसमाधिप्रत्यभिज्ञेयं युक्तितोऽपि निर्णेतुं सर्वत्र चिदभेदप्रकाशकं सहजविद्योदयाख्यम् इमं द्वितीयं निःष्यन्दं 'तदाक्रम्य' इत्यादिना 'शिवसद्भावदायिनी' इत्यन्तेन श्लोकसप्तकेन निरूपयति। तत्र विश्वं शुद्धाशुद्धभेदेन द्विधा। तत्र शुद्धं मन्त्रादिरूपं तत एवोत्पन्नं तन्मयं तत्रैव विश्राम्यति,—इति श्लोकद्वयेनोक्तम्।

मन्त्राणां वीर्यम्—इति प्रबुद्धमेव उपलब्धतादृगात्मस्वभावं प्रति उपदेष्टुं युगलकमाह—

अशुद्धमपि तन्मयमेव,—इत्यपरेण श्लोकद्वयेनाभिहितम् । तत्संवेदनाधिरूढो जीवन्मुक्तः,—इति श्लोकेनोक्तम् । एतत्तत्त्वसमासादनेनैव साधकानां स्वेष्टसिद्धिः,—इति श्लोकद्वयेनाभिहितमिति संक्षेपः । अथ ग्रन्थो व्याख्यायते । यदुक्तम्—

'यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।' ( १।२)

इति, तत्र शुद्धं तावन्मन्त्रादिरूपं, तद्यथा तत एवोत्पन्नं तद्बलेनैव प्रकाशमानं तत्रैव विश्राम्यति तत्प्रथमनिःष्यन्दपरिघटितदृष्टान्तपुरःसरं निरूपयति—

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः ।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनाम् ॥ २६ ॥
तत्रैव संप्रलीयन्ते शान्तरूपा निरञ्जनाः ।
सहाराधकचित्तेन तेनैते शिवधर्मिणः ॥ २७ ॥

तत् बलं निरावरणचिद्रूपमधिष्ठाय, मन्त्राः सर्वज्ञत्वादिना बलेन श्लाघायुक्ताः प्रवर्तन्ते अनुग्रहादौ स्वाधिकारे । करणानि यथा देहिनाम्, नान्येन आकारादिविशेषेण ।। २६ ॥

तत्रैव स्वस्वभावव्योम्नि निवृत्ताधिकाराः प्रलीयन्ते शान्तरूपाः, मायाकालुष्यरहिताः, सह साधकचित्तेन; अनेन कारणेन शिवसंयोजनास्वभावेन, इति शिवात्मका उच्यन्ते ॥ २७ ॥

'तेन' प्रस्तुतव्याख्यानेन हेतुना 'एते' मन्त्रा आराध्यदेवतावाचका वर्णादिसंनिवेशाः, 'शिवधर्मिणः' शिवस्य परमेश्वरस्यानन्यसाधारणः सर्वज्ञत्वादिर्गुणो धर्मः स विद्यते येषां ते तथा, शिवादभिन्नस्वरूपा इत्यर्थः । केन

तत् स्पन्दतत्त्वात्मकं बलं प्राणरूपं वीर्यमाक्रम्य अभेदेन आश्रयतया अवष्टभ्य भगवन्तोऽनन्तव्योमव्याप्यादयो मन्त्राः सर्वज्ञबलेन सर्वत्रत्वादि-

संसारशुद्धाशुद्धभेदेन द्विविधः । शुद्धस्तु मन्त्रादिरूपः, अशुद्धश्च तदतिरिक्तः । विश्वाभिमानविरतः जीवन्मुक्तशब्देन शास्त्रेषु अभिधीयते । स्पन्दस्य यादृशं स्वाभाविकं

**हेतुना ?––यतः 'तत्' समनन्तरप्रतिपादितस्वरूपस्य शिवस्य संबन्धि 'बलं' सामर्थ्यं शक्तिम् 'आक्रम्य' उच्चिचारयिषावस्थायां तदभेदोपपत्त्या स्वीकृत्य 'सर्वज्ञबलशालिनः' सर्वज्ञस्य शिवस्य बलेन शक्त्या श्लाघमाना सन्तः 'अधिकाराय प्रवर्तन्ते' यथास्वं प्रतिनियतकार्यसंपादनसामर्थ्यं प्रसरन्ति। एते हि अनासादितपरमेश्वराभेददशा उत्पादविनाशधर्मकवर्णमात्रात्मकाः तृणमपि कुब्जयितुमशक्ताः; उक्तबलाक्रमणेन तु नियतेतिकर्तव्यतासहाया दीक्षादिवृश्चिकविषाकर्षणान्तपरापरस्वकार्यसंपादनाधिकाराप्रतिहतशक्तयो भवन्ति। यद्येवं सर्वमन्त्राणामुक्तबलाक्रमणलक्षणवीर्यसाम्यं, तत् कथमेषां भिन्नाधिकारित्वं, सर्वे सर्वार्थसाधनाधिकृताः कथं न भवेयुः ?––इत्यत्र परमेश्वरपरिकल्पितनियतिनियन्त्रितत्वमेव हेतुं प्रतिपादयितुमुपमानमाह–– कथमेते मन्त्रा नियताधिकाराय प्रवर्तन्ते साधकानां ?––'देहिनां करणानीव' यथा हि देहादिमात्रानित्यवस्तुव्यवस्थितात्माभिमानानां सर्वशरीरभृतां करणानि इन्द्रियाणि 'यतः करणवर्गोऽयम्' इत्यत्र प्रतिपादितयुक्त्या परमेश्वरादेव चेतनत्वापादनहेतुप्रवृत्त्यादिलाभसाम्ये सत्यपि करणानि तत्परिकल्पितनियतिशक्तिबलात् शब्दादिविषयप्रकाशनमात्रपर्यवसितसामर्थ्यानि यथास्वं पृथक्पृथगधिकाराय प्रवर्तन्ते न सर्वाणि सर्वस्मै; तथैवैते मन्त्राः**

सामर्थ्येन श्लाघमाना जृम्भमाणा अधिकाराय देहिनां प्रवर्तन्ते सृष्टिसंहारतिरोधानानुग्रहादि कुर्वन्तीत्यर्थः। सर्वज्ञशब्दो भावप्रधानः सर्वकर्तृत्वाद्युपलक्षयति। यथा देहिनां करणान्युपपादितदृशा तद्बलमाक्रम्य विषयप्रकाशादौ प्रवर्तन्ते इति दृष्टान्तः। तथा निरञ्जनाः कृतकृत्यत्वान्निवृत्ताधिकारमलाः शान्तविशिष्टवाचकात्मस्वरूपस्तत्रैव स्पन्दात्मके बले सम्यगभेदापत्त्या प्रकर्षेणापुनरावृत्त्या लीयन्ते अधिकारमलान्मुच्यन्ते आराधकचित्तेन उपासकलोकसंवेदनेन सह। यथोक्तम्—

'अनुगृह्याणुसंघातं याताः पदमनामयम्।' ( मा० वि० १। ४१ )

स्वरूपं विद्यते तत्साधकानामेव स्वाभीष्टसिद्धिः। मन्त्रादिरूपं यद्विश्वस्य विशुद्धं स्वरूपं वर्तते तत एव समस्तमुत्पन्नं तद्बलेनैव प्रकाशमानं तथा तत्रैव शान्तिमुपयान्ति, इदानीं एतत्सर्वं दृष्टान्तद्वारा निरूप्यते–तदेति। यत्र तच्छब्देन अलौकिकमनुत्तरं स्पन्दरूपं यत्प्राणात्मकं बलं अर्थात् वीर्यं अभेदात्मना आश्रयरूपेण आक्रम्य सर्वेऽपि मन्त्राः विद्यन्ते। तत्र सर्वज्ञत्व, सर्वकर्तृत्वादि सामर्थ्यद्वारेण शरीरधारिणां प्राणिनाम् अधिकारप्राप्तये प्रवर्तन्ते, एते सृष्टिस्थितिसंहारतिरोधानानुग्रहादिरूपकार्यं कुर्वन्तीति यथा देहधारिणां चक्षुरादि-

साधकानां स्वीकृतपरस्वभावाहंभावप्रतिपत्तीनां यथानियमिताधिकाराय प्रवर्तन्ते, तस्मात् करणवत् सर्वज्ञबलशालिनोऽपि मन्त्रा नियताधिकारा एव । ततश्च शिवधर्मिणो मन्त्रा यत्कृताधिकाराः सन्तो 'निरञ्जना' अञ्जनात् वाच्योपरागरूपात् मलात् वर्णादिरूपभावनात्मकाद्वा निष्क्रान्ताः; अत एव 'शान्तरूपाः' शान्तं शुद्धं संविन्मात्रावशेषत्वात् निर्विकारं रूपमात्मा येषां ते तादृशाः सन्तः 'तत्रैव' शिवे परमकारणे स्वस्वभावे 'संप्रलीयन्ते' तदैक्यमुपगच्छन्ति । केन साकम् ? 'आराधकचित्तेन सह' साधकमनसा साकं । यस्यां हि दशायामभिसंध्युपाधिविरहात् स्वाभाविकमात्रावशेषं यत् साधकचित्तं तेन साकम् । किमनेन तात्त्विकमन्त्रवीर्यं प्रतिपादितं भवति ? तदिदं भवति--मन्त्रचेतसोः उदयास्तमयदशयोः परमकारणात् शिवादभेदः,-इति मन्त्रात्मकतया साधकचित्तात्मकतया च शिवशक्तिरेव वर्णसंकल्पादिरूपधारिणी उदिता सती, संप्रति अनासादितस्वस्वभावबलस्पर्शप्रतिपत्तीनां साधकानां भेदविभ्रममुत्पादयन्ती नियतार्थसाधनाधिकाराय पर्यवस्यति ।

इति । यतश्च तत एवोदितास्तद्बलेन विसृष्टास्तत्रैव लीयन्ते तेनैते मन्त्रमन्त्रेश्वरादयः शिवस्य परमेश्वरस्य सम्बन्धी धर्मः स्वभावो विद्यते येषां ते तथा सामान्यस्पन्दसारा इत्यर्थः । ननु करणानां मन्त्राणां च तत उदयादौ तुल्ये किमिति करणानि न सर्वज्ञादिरूपाणि ? । उच्यते परमेश्वरो मायाशक्त्या शरीरकरणानि भेदमयानि निर्मिमीते, विद्याशक्त्या त्वाकाशीयविचित्रवाचकपरामर्शशरीरान्मन्त्रान् । वाचकस्य मायापदेऽपि—

'घटोऽयमित्यध्यवसा नामरूपातिरेकिणी ।
परेशशक्तिरात्मेव भासते न त्विदन्तया ॥' ( १।५।२० )

इति प्रत्यभिज्ञोक्तनीत्या प्रमातृभूम्यनतिक्रान्तेर्न शरीरपुर्यष्टकादिवद्बोधसंकोचकत्वमस्तीति युक्तमेवैषां सर्वज्ञत्वादि । एतच्च—

'भेदे त्वेकरसे भाते··· ·········।' ( । ३।१।८ )

करणानि तत्तद्विषयाकारेण मानसवृत्तिं प्राप्य विषयप्रकाशने समर्थानि भवन्ति तथा अज्ञानात्मकाञ्जनरहिताः विद्वांसः जनाः कृतार्थतां प्राप्य तादृशमन्त्रबलमुपेत्य स्पन्दरूपे बले सम्यग्रूपेण अभेदभूमिकामुपगताः नीयन्ते अर्थात् सर्वविधमलान् विमुच्यन्ते । आराधकमनसा उपासनात्मकसंवेदनेन साधं मुच्यतेति यावत् । यतो हि अस्मात् परमकारणात् एते उत्पन्नास्तत्सामर्थ्येनैव तत्र परमेश्वरे मन्त्रादयः विलीनाः भवन्ति । अस्यां स्थितौ मन्त्राः तदधिपतयः परमेश्वरस्य स्पन्दात्मकपरमशिवस्य स्वभावभूताः सन्ताः सामान्यस्पन्दस्य

यस्तु यथाप्रपतिादिते स्वस्वभावे एव सुदृढात्मप्रतिपत्तिः, तस्य उदयास्तमयज्ञस्य सर्वमन्त्राः सर्वार्थसाधनाधिकारिणो भवन्ति तत्तदितिकर्तव्यतासाहित्यनियमाद्यपेक्षां विना; आसतां वा मन्त्राः, यद्यद्वचनं येनाभिसंधिना उच्चारयति तत् तस्यामोघमन्त्रतामापद्यते,--इति स्वभावबलाक्रमणमेव सिद्धं स्वतो मन्त्राणां वीर्यं प्रत्यवमष्टव्यं योगिना,--इति तात्पर्यार्थः। उपलक्षणार्थं मन्तव्यं चैतत्। उक्तोपपत्त्या न केवलं मन्त्रा एव शिवधर्मिणो, यावन्न काचिन्क्रिया ज्ञानं कार्यं ज्ञेयं वा वस्तु संभवति, यत् परतत्त्वाभेदापत्तिलब्धात्मकं सत् शिवात्मकमेव न भवति,--इति समनन्तरमेव वक्ष्यति। व्याख्यातम् एतत् वृत्तौ-'यद्वलं निरावरणचिद्रूपम्' इत्यादिना ॥२६-२७॥

इति राजानकश्रीरामविरचितायां स्पन्दविवृतौ
व्यतिरिक्तस्वभावोपलब्धिर्नाम द्वितीयो
निःष्यन्दः ॥ २ ॥

इति श्रीप्रत्यभिज्ञाकारिकाटीकायां वितत्य दर्शितम्। एवं विद्यापदावस्थितसृष्ट्यादिकार्यनन्तभट्टारकाद्यपेक्षयैतद्व्याख्येयम्। तथा दीक्षादिप्रवृत्तानामाचार्यादीनां करणरूपाः सर्वे मन्त्रास्तत्स्पन्दतत्त्वरूपं बलमाक्रम्य अनुप्राणकत्वेन अवष्टभ्य आचार्यादीनामेव सम्बन्धिनाराधकचितेन सह मोक्षभोगसाधनाद्यधिकाराय प्रवर्तन्तते, तत्रैव शान्तवाचकशब्दात्मकशरीररूपा अत एव च निरञ्जनाः शुद्धाः सम्यक् प्रलीयन्ते विश्राम्यन्ति। अत्र व्याख्याने 'सहाराधकचित्तेन' इति पूर्वश्लोकेन योज्यम्। एवं च मन्त्राणामुदयप्रलयकोटिव्यापि प्रवृत्तावपि भित्तिभूतमिति अभिहितम्। एवं च दशाष्टादशादिभेदेन भिन्ने शैवे मन्त्राणां स्पन्दतत्त्वसारतैवेत्युक्तं भवति ॥ २६-२७ ॥

सारभूता एव। यद्यपि करणानि उभावपि लोकान्तरस्पन्दत्वात् उत्पन्नौ तथापि करणेषु पारमेश्वर्याः मायाशक्त्या अभेदरूपेण करणानि प्रादुर्भतानि, अत एव तत्र सर्वज्ञत्वसर्वकर्तृत्वशक्तिः नैव विद्यते। मन्त्रास्तु विद्याशक्त्या समुत्पन्नाः। अत एव तत्र सर्वज्ञत्वसर्वकर्तृत्वशक्तिः विद्यते। तस्मात् एतेषां शिवधर्मित्वं स्वभावत एव जायते। एते मन्त्राः आराधकस्य विधेयानां सांसारिकभोगवासनां दूरीकृत्य शान्तशुद्धचिद्रूपनिरञ्जनात्मकचिदाकाशे स्थितिं कुर्वन्ति। साधकः मन्त्राणां सामर्थ्येन मायीयसम्बद्धं नैव भजते। न केवलं साधक एव अनुत्तरपरमतत्त्वे विलीनो भवति, अपितु तेन सह मन्त्राऽपि तत्र प्रलीयन्ते। अस्यां स्थितौ त्रिकशास्त्रे मन्त्राणां भगवतः परमशिवस्वरूपादभिन्नतां स्वीकुर्वन्ति ॥२६-२७॥

## तृतीयो निष्यन्दः

इदानीं पक्षान्तरोपन्यासभङ्ग्या प्रकरणारम्भश्लोकापरार्धप्रतिज्ञातं स्वस्वभावस्यैव शिवस्य विश्वव्यक्तिमयशक्तिचक्रविभवनशीलत्वमवसर-प्राप्तम् उपपत्त्युपलब्धिभ्यां निर्वाहयितुं श्लोकत्रयमाह––

एवं मन्त्रमन्त्रेश्वरादिरूपा शुद्धाभिमता सृष्टिः शिवस्वभावेति प्रतिपाद्याधुना अशुद्धाभिमतापि सा मायादिरूपा शिवस्वरूपैव,–इति उपपादयन् श्रीमतशास्त्रादिरहस्यदृष्टिमपि उपक्षिपति –

**यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवात् ।**
**तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ।। २८।।**
**तेन शब्दार्थचिन्तासु न सावस्था न या शिवः ।**
**भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ।। २९ ।।**

सर्वात्मक एवायमात्मा सर्वानुभावोत्पत्तिद्वारेण अनुभूयमानस्यैव संवेदनात् बाह्यार्थमनुभूयमानमेव शरीरत्वेन गृह्णाति, न तु शिरःपाण्यादिलक्षितम् एकमेवास्य शरीरम्।। २८ ।।

तेन तथाविधेन सर्वात्मकेन स्वभावेन, शब्दार्थयोः चिन्तासु न सा अवस्था या शिवस्वभावं न व्यञ्जयति, अतो भोक्तैव हि भोग्यभावेन सर्वत्रावस्थितो, न त्वन्यत् भोग्यमस्ति ।। २९ ।।

'यस्य इति वा संवित्तिः स जीवन्मुक्त' इति संबन्धः, इत्येवम् इदानीमेव प्रतिपाद्यप्रकारेण 'यस्य वा' साधकोत्तमस्य 'संवित्तिः' सम्यक् ज्ञानं स

यतो जीवो ग्राहकः सर्वमयः शिपवद्विश्वरूपः, तेन हेतुना शब्देषु वाचकेषु, चिन्तासु विकल्पज्ञानादिरूपासु आदिमध्यान्तरूपा सावस्था नास्ति या शिवो

मन्त्रादिरूपा सृष्टिस्तु विशुद्धशिवस्वरूपा चेति पूर्वं प्रपञ्चितम् । सम्प्रति मायादिरूपा अशुद्धत्वेन स्वीकृता सृष्टिरपि स्पन्दतत्त्वात्मकशिवस्य एवेति उपपादयन् अन्यदृष्टिमुपक्षिपति–यस्मादिति । प्रमातृस्वभावो जीवः, यतः सर्वमयो भवति तस्मात् परमशिव-

'सततम्' अव्यवधानेन सर्वावस्थासु 'युक्तः' समाहितः, उक्तवक्ष्यमाणोपदेशदृशा स्वभावबलपरिशीलनाप्रमत्तैकाग्रमानसः 'स जीवन्' नियतदेहाधिकरणान् प्राणान् धारयन् एव 'मुक्तः' सर्वव्यापकसर्वात्मकसर्वेश्वरस्वतन्त्रस्वस्वभावाहंकारप्रतिपत्तिदार्ढ्येन जन्मादिविरोधात् निष्क्रान्तः परमेश्वर एव संवृत्त--इत्यत्र 'न संशयो' न भ्रान्तिः; स्वसंवेद्योपपत्त्युपलब्धिनिष्प्रकम्पत्वात् अस्य अर्थस्य। किं कुर्वन् जीवन्मुक्तः ?--'अखिलम्' अशेषमनन्तवस्तुव्यक्तिविचित्रं 'जगत्' विश्वं 'क्रीडात्वेन' स्वनिर्मितचराचरभावक्रीडनकोपरचितलीलामात्रतया 'पश्यन् विभावयन्। सर्वो हि जनः अनुन्मिषितस्वस्वभावनिभालनक्षमविमलविज्ञानदृष्टिरात्मनोऽन्योन्यतश्च विभिन्नम् इदमखिलं भावजातं कृतश्चिदन्यतः कारणात् उद्भुतम् अनिशं मन्यमानः, तद्भावजन्यहर्षशोकभयादिविकारान् अनुभवन्, भवाध्वनि पुनः पुनः जन्मादिबन्धनभाजनतां भजते। यस्तु प्रतिपाद्यप्रकारेण उत्पन्नपरसंविदभिव्यक्तिः, स यथा कश्चित् क्रीडापरः स्वपरिकल्पितैः भयक्रोधादिकारणभूतभावप्रतिच्छन्दकैः क्रीडन् तद्याथात्म्यवेदित्वात् भयादिविकारकालुष्यं मनागपि नापद्यते, तथैव भावनां स्वस्वभावशक्तिविजृम्भितमात्रतया याथात्म्यवेदी सन् मनागपि विकृतिं न आपद्यते। एवं सर्वं क्रीडात्वेनैव पश्यन् जीवन्नेव मुक्तः। कथं यस्य संवित्तिः ? इति,--तेनेत्यादिश्लोकेन प्रतिपादयति; 'तेन' वक्ष्यमाणेन हेतुना 'शब्दार्थचिन्तासु सा अवस्थैव नास्ति या न शिवः'--इति यस्य संवित्ति, स जीवन्मुक्तः, इति। शब्दोऽर्थप्रत्यायकः

न भवति सर्वमेव शिवस्वरूपमित्यर्थः। यतश्चैवमतो भोक्तैव चिदात्मा ग्राहको भोग्यभावेन देहनीलादिरूपेण सदा नित्यं सर्वत्र विचित्रतत्त्वभुवनादिपदे सम्यगनूनाधिकतया स्थितः, न तु भोग्यं नाम किञ्चिद्भोक्तुर्भिन्नमस्ति। जीव इत्युपक्रम्य शिव इत्युपसंहारेण जीवशिवयोर्वास्तवो न कोऽपि भेदः,—इदि देहाद्यवस्थासु न कासुचिदप्यपूर्णमन्यता मन्तव्या, अपि तु चिद्घनशिवस्वभावतैवेति भङ्ग्योपदिशति। यथोक्तम् 'शरीरमपि ये षट्त्रिंशत्तत्त्वमयं शिवरूपया पश्यन्ति अर्चयन्ति च ते सिद्ध्यन्ति घटादिकमपि तथाभिनिविश्य पश्यन्ति अर्चयन्ति च तेऽपीति नास्त्यत्र विवादः' इति श्रीप्रत्यभिज्ञाटीकायाम्। भट्टश्रीवामनेनाप्युक्तम्—

स्वरूप एव वाचकेषु शब्दसमूहेषु, वाच्येषु अर्थेषु, विकल्पज्ञानरूपासु चिन्तासु इदृशी काऽपि अवस्था आदिमध्यान्तरूपा नैव दृश्यते यया तस्य शिवस्वरूपत्वं नैव भवेत्। अत एव भोक्तैव चिदात्मा भोग्यत्वेन सर्वत्र विचित्रतत्तद्वस्तुषु अवस्थितः दृश्यते भोक्तुः भोग्यजातं

पदसमुदायः, अर्थो जात्यादिभेदात् बहुविधम् अभिधेयं वस्तुजातं, तयोः 'चिन्ता' तथा तथा विकल्पनाः अनन्तचिन्तनीयवस्तूपरागात् विचित्राणि ज्ञानानि, यन्मयो व्यवहारः एतासु शब्दार्थचिन्तासु 'सा अवस्था' दशा न काचित्, शब्दचिन्तारूपा अर्थचिन्तारूपा वा संभवति, या शिव साक्षात् न भवति। यत एवं तदा 'भोक्ता' अनुभवितैव ईश्वरः 'सदा' नित्यं 'सर्वत्र' सर्वासु अवस्थासु 'भोग्यभावेन' अनुभवनीयवस्त्वात्मना 'स्थितो' न पृथक् किंचित् भोग्यं नामास्ति, तत्त्वानवमर्शमात्रविजृम्भितम् एतत् भोक्तृभोग्यविभागरूपम्। केन हेतुना 'न सावस्था न या शिवः' ? इत्याह,––'यस्मात् जीवः' आत्मा 'सर्वमयो' विश्वरूपः परस्परव्यतिरिक्तप्रतिपत्तिः, जीवस्यापि यो व्यवहारः सोऽपि वेद्यवेदकाभेदपूर्वकतयैव उपपन्न––इत्यर्थः, कुत एतत् ? 'तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः सर्वभावसमुद्भवात् सर्वमयो जीवः' तस्य कस्यचित् संवेद्यस्य घटसुखादेः यत् 'संवेदनं' ज्ञानं, तस्य यत् 'रूपं' स्वभावः तेन हेतुना या 'तादात्म्यप्रतिपत्तिः' तदभेदसंवित्, ततो हेतोः निर्वर्तमानो यः 'सर्वभावसमुद्भवः' सर्वेषां भावानाम् उत्पत्तिः, तस्मात् सर्वमयो जीवः। किमुक्तं भवति––जीवस्यैव व्यवहारो विचार्यमाणोऽयं वस्तुयाथात्म्यमुपपादयति। तथाहि–अयं स्वविषयं संविदन्नेव समुद्भावयति

'आलम्ब्य संविदं यस्मात्संवेद्यं न स्वभावतः।
तस्मात्संविदितं सर्वमिति संविन्मयो भवेत्॥'

इति। कस्मात् जीवः सर्वमयः इत्यत्र हेतुः सर्वभावनां समुद्भवादुत्पत्तिहेतुत्वात् अपादानभावप्रधानश्च निर्देशः—

'प्रमातृमितिमानमेयमयभेदजातस्य ते
विहार इह हेतुतां समुपयाति यस्मात्त्वयि।
निवृत्तविवृ(हृ)तौ क्वचित्तदपयाति तेनाध्व(धु)ना
नयेन पुनरीक्ष्यते जगति जातुचित्केनचित्॥'

इति श्रीज्ञानगर्भस्तोत्रोक्तनीत्या संविद्येव प्रसृतायां जगतः सद्भावात्सर्वभाव-

न भिन्नमस्ति। तस्मात् उपक्रमोपसंहारयोः दर्शनेन जीवशिवयोः मनागपि नास्ति स्वाभाविको भेदः सर्वेऽपि भावपदार्था अस्मादेव प्रादुर्भूताः, यतः जीवादेव इदं नामरूपात्मकं विश्वम् उदयति। तस्मात् जीवस्य सर्वमयत्वं विश्वशक्तित्वञ्च मन्तव्यम्। सर्वस्य पदार्थस्य यत्संवेदनं प्रकाशो भवति तेन रूपेणापि स्वभावाभेदात् सर्वमयत्वं ज्ञायत एव।

सृजति, संवेद्यमानमेव हि वस्तु स्वरूपं लभते, न तु असंवेद्यमानं; संवेद्यमानता च तेन तेन रूपेण प्रकाशमानता; प्रकाशमानत्वं च प्रकाशादव्यतिरिक्तं, नान्यत् किंचित्। यदाह न्यायवादी—'चेतनाच्चापि वेद्यत्वादतद्रूपाप्रवेदनात्।' इति। एवं च यत् यत् अयं जीवः संवेत्ति तत्तदस्य शरीरमेव संपद्यते, न तु नियतशिरःपाण्याद्यवयवसंनिवेश एव, सोऽपि हि अस्य संवेद्यमानतावस्थायामेव शरीरीभवति, अन्यदा तु व्यतिरिक्तो विषय एव। तथा च—संवेद्यमानत्वसामान्यात् द्विविधं शरीरमस्याम्नातं तत्त्वविद्भिः, भूतात्मकं भावात्मकं च; तत्र मायाशक्तिवैभवविस्मारिततात्त्विकस्वभावतया वस्तुसंवेदनावसरे स्वरूपापरामर्शत्वमुकुलितसामर्थ्योऽयं जीवः अवच्छिन्नाहंकारास्पदतया शिरःपाण्यादिमच्छरीरत्वेन यत् परामृशति तत् अस्य सृष्टयादिमयत्वात् भूतात्मकम्—इत्युक्तम्। यत्तु व्यतिरिक्तं शब्दादिविषयत्वेन परामृशति तद्भावात्मकं। परमार्थे तु विचार्यमाणे द्वयमप्यस्य शरीरं संवेद्यमानत्वाविशेषात्। एवं संवेद्यमानतालक्षणभावसंसर्गावस्थायां जीवः संवेद्यवस्त्वव्यतिरेकात् सर्वमयो विश्वरूपः स्थितोऽपि सन् तथावस्तुसंवेदनतत्त्वपरामर्शानुन्मेषात् सर्वमिदम् आत्मव्यतिरिक्तकारणान्तरलब्धात्मकत्वेन आत्मनः परस्परतश्च पृथक्त्वेन व्यवच्छिन्दन्, आत्मानं च देहाद्यनित्यभावाहंभावेन अध्यवस्यन् जन्मादिबन्धभाक् संसारी जीव इति व्यपदिश्यते। यदा तु शिवदिवाकरशक्त्यंशुपातजनितप्रबोधोन्मिषितविशददृष्टिस्फुटतरप्रकाशमानदेहादिव्यतिरिक्तसत्यात्मस्वभावसुस्थिताहंप्रतिपत्तिः सन् यथावस्थितवस्तुसंवेदनपरामर्शशक्तिभिर्व्यक्तिभाक् भवति, तदा स एव

समुद्भवत्वं जीवस्य, यतश्च जीवादेव उदयति विश्वमतोऽयं सर्वमयो विश्वशक्तिरिति यावत्। निर्णीतं चैतद्वितीयसूत्रवृत्तौ। सर्वमयत्वे हेत्वन्तरमाह 'तत्संनेदन' इत्यर्धेन। तस्य सर्वस्य नीलसुखादेर्यत्संवेदनं प्रकाशस्तेन रूपेण स्वभावेन तादात्म्यप्रतिपत्तेः सर्वमयत्वस्योपलम्भात् एवमनेन श्लोकद्वयेन रहस्यचर्याः सर्वभेदपादपोन्मूलनोपपत्तिपरिघटिताश्च ज्ञानोपदेशकथाः, प्रथमचरमसूत्राभ्यां महार्थतत्त्वं, जाग्रदादिसूत्रेण षडर्धपरमार्थः, 'तदाक्रम्य' इत्यनेन सर्वोपासासारतेत्याद्युपक्षिप्तमिति स्पन्दतत्त्वेनैव विश्वोपदेशाः स्वीकृताः ॥ २८-२९ ॥

तस्यात् अन्यत्र स्वीकृतो भेदवृक्षोत्पादनद्वारा परमशिववत् जीवस्य सर्वमयत्वम् अनेन सूत्रेण स्फुटीकृतमस्ति ॥ २८-२९ ॥

संकल्पमात्रविलिखितविचित्रविश्वव्यक्तिमयशक्तिचक्रः शिवः संपद्यते। तेन उक्तम्–तत्तद्वस्तुसंवेदनस्वभावबलेन या तादात्म्यप्रतिपत्तिः संवेद्यमानवस्त्व-भेदसंवित्तितः सर्वभावसमुद्भवः, तस्मात् जीवः तावत् सर्वमयः; तेन च

अथैतत्प्रतिपत्तिसारतैव मोक्ष इत्यादिशति—

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।
स पश्यन्स ततं युक्तो जीवन्मुक्तो न संशयः ॥ ३० ॥

एवं स्वभावं यस्य चित्तं, यथा—'मन्मयमेव जगत् सर्वम् इति', स सर्वं क्रीडात्वेन पश्यन् नित्ययुक्तत्वात् जीवन्नेव ईश्वरवत् मुक्तो, नत्वस्य शरीरादि बन्धकत्वेन वर्तते ॥ ३० ॥

तस्य सर्वमयत्वप्रतिपत्तिलक्षणे हेतुना सा अवस्था नास्ति या शिवमयो न भवति, ततश्च भोक्तैव ईश्वरो भोग्यभावेन ईशितव्यवस्तुरूपतया सदा सर्वत्र संस्थितः। एवं यस्य वा संवित्तिः स जीवन्मुक्त–इति वाक्यसमन्वय-संकलनार्थमेतत् पुनरुक्तम्,–इत्यनेन श्लोकत्रयेण आत्मन एव विश्वरूपत्वेन स्थितिः प्रतिपादिता, विश्वप्रपञ्चस्य निमित्तान्तरानुपपत्तेः। यथोक्तं ब्रह्मविदा—

'कल्पयत्यात्मनात्मानमात्मा देवः स्वमायया।
स एव बुद्धयते भेदादिति वेदान्तनिश्चयः॥'

इति। तथा अन्येनापि स्तुतिद्वारेणोक्तम्—

'विविधैरुपाधिभिरवस्थितेर्बहिः स्फटिकादिवत्तव विचित्रतोच्यताम्।
यदि ते कदाचन कथंचन क्वचिद्भवितुं क्षमास्त्वदवभासतः पृथक्॥
परमाणुपाकपरिणामविभ्रमाद्युत वा विवर्त इति विश्वमिष्यताम्।
विबुधोत्तमैर्यदिह तद्विकल्पनास्तव शक्तिरेव न तथोपपादयेत्॥
तदिहापि च प्रतिनिमेषमुन्मिषन्निमिषद्विकल्पविविधांशुमण्डलः।
अथ चातिशुद्धवपुरद्भुतैकभूः स्फुरसि त्वमेव शिव चिन्मयो मणिः॥'

वाशब्दः प्रथमनिःष्यन्दोक्तनिमीलनसमाधिप्रकारं विकल्पयन् अस्याः समापत्तेर्दुर्लभतां ध्वनयति। तेनायमर्थः,—ईदृशी तावत्संवित्तिः दुर्लभा

शिवस्वरूपस्य स्वात्मना सह ऐक्यमेवेति परिज्ञातुः जीवस्य मुक्तिरिति दर्शयति— इतीति। यस्य योगिनः चेतसि भगवता परमशिवेन स्पन्दतत्त्वेन ऐक्यमपरोक्षरूपेण भासते

व्याख्यातमेतत् वृत्तौ पृथक् पृथक्—'सर्वात्मक एवायमात्मा' इत्यादिना 'तेन तथाविधेन' इत्यादिना 'एवं स्वभावे यस्य' इत्यादिना च ग्रन्थेन ॥ २८-२९-३० ॥

इति श्रीराजानकश्रीरामविरचितायां स्पन्दविवृतौ
विश्वस्य स्वस्वभावशक्तिमात्रत्वोपपत्तिर्नाम
तृतीयो निःष्यन्दः ॥ ३ ॥

यस्य कस्यचिदेवापश्चिमजन्मनो भवति सोऽखिलं जगत्क्रीडात्वेन पश्यन् निजसंविदुन्मेषनिमेषाभ्यां सृजन् संहरंश्च—

'मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।' (भ०गी० १२।२)

इति स्थित्या सततसमाविष्टो महायोगी जीवन्नेव प्राणादिमानपि विज्ञानाग्निनिर्दग्धाशेषबन्धनो देहपाते तु शिव एव जीवंश्च दृङ्मुक्त एव न तु कथञ्चिदपि बद्धः । 'न संशयः' इत्यनेन इदं ध्वनयति, दीक्षादिना गुरुप्रत्ययत एवेति ॥ ३० ॥

तथा एतत्परिदृश्यमानं समस्तं विश्वात्मकं वस्तुः मदीयस्यैव आत्मतत्त्वस्य विलास इति हृदि अनुभूय समग्रप्रमेयजातं क्रीडासाधनत्वेन व्यवहरतस्तस्य सत्यपि प्राणसम्बन्धे परमेश्वर इव जीवन्मुक्तस्वरूपे स्थितिर्भवति । शरीरादयो हि न तत्कृते प्रतिबन्धकाः भवन्ति । अस्यां स्थितौ तस्य जीवन्मुक्तत्वे अल्पीयस्यपि संशीतिर्न कार्या ॥ ३० ॥

## चतुर्थो निःष्यन्दः

इदानीमियमेव उपपत्तिः सुगृहीता सती, अभेदोपलब्ध्युपायः—इति प्रदर्शयितुं मन्त्रन्यासादिसमस्तविधिसंस्कारकत्वमस्याः प्रतिपादयितुमाह—

इयमेव महासमापत्तिः साधकाचार्यादीनामभीष्टप्राप्तिहेतुः,—इति श्लोकद्वयेनाह —

**अयमेवोदयस्तस्य ध्येयस्य ध्यायिचेतसि ।**
**तदात्मतासमापत्तिरिच्छतः साधकस्य या ॥ ३१ ॥**

**इयमेवामृतप्राप्तिरयमेवात्मनो ग्रहः ।**
**इयं निर्वाणदीक्षा च शिवसद्भावदायिनो ॥ ३२ ॥**

तत्संवेदनद्वारेण यः तदात्मग्रहो मन्त्रन्यासात्मकः स एवोदयः तस्य ध्येयस्य मन्त्रात्मनः साधकचेतसि, तादात्म्यं तत्स्वभावत्वप्राप्तिः मन्त्रदेवतया सह साधकस्य मन्त्रोच्चारणेच्छया संपादिता ॥ ३१ ॥

इयमेव सा मिथ्याज्ञानशून्यस्य साधकस्य निरावरणस्वस्वरूपसंवित्तिः अमृतत्वप्राप्तिः न तु रसास्वादरूपस्य धातुसारस्य स्थूलस्यास्वादनम् अमृतप्राप्तिरुक्ता, यैव मन्त्रोच्चारणमात्रेणैव मन्त्रस्वरूपावस्थितिप्राप्तिः सैवात्मनो ग्रहणमित्युक्ता । यस्मात् 'आत्मनो ग्रहणं कुर्याद्दीक्षाकाले गुरुर्धिया' इति । न पुनर्लोष्टादिवत् हस्तेन तस्यामूर्तस्य ग्रहणं भवति, अत एव चेयमेव सा निर्वाणदीक्षा शिवसद्भावदायिनी, परमशिवस्वरूपाभिव्यञ्जिका ॥ ३२ ॥

'तस्य' कस्यचिद् 'ध्येयस्य' तेन तेनाकारेण स्मर्तव्यस्य मन्त्रवाच्यस्य देवताविशेषस्य 'उदयः' तत्तदर्थक्रियासंपादिना अमोघशक्तिना तेन तेनो-

इह 'शिवो भूत्वा शिवं यजेत्' इति यदुद्घोष्यते तत्र ध्यायिनश्चेतसि संवेदने तस्येति 'न सावस्था न या शिवः' इति प्रतिपादितशिवस्वभावस्य

पास्येनाकारेण प्रथनम्; क्व अधिकरणे ?–'ध्यायिचेतसि' ध्यायिनः स्मर्तुः संबन्धिनि चेतसि संकल्पे; कोऽसावुदयः ?–इच्छतः' इच्छावस्थायां वर्तमानस्य मन्त्रमुच्चिचारयिषोः 'साधकस्य' अभियुक्तस्य, वस्तुसामर्थ्यसिद्धा या 'तदात्मतासमापत्तिः' तस्य ध्येयस्य य आत्मा स्वरूपं तस्य भावस्तदात्मता तया समापत्तिरेकीभावः। इदमत्र तात्पर्यम्–न्यासादिहेतोर्मन्त्रोच्चारणेच्छा-वस्थायां मन्त्ररुद्धान्यदेवताकारायां साधकचेतसः स्वयमप्रयत्नेन संपाद्यमानं यदभिन्नरूपत्वं, स एव परामर्शक्षमसंविदो ध्यातुर्मुख्य आराध्यदेवतायाः प्रत्यक्षदर्शनरूप उदयो, न तु व्यतिरेकविभाव्यमानाकारता,–इति अनयैव संविदा शिवरूपतापत्तेः।

'..................शिवो भूत्वा शिवं यजेत्।'

इत्यस्य विधेः चरितार्थत्वम्।

'अयमेव तत्संवेदनद्वारेण'

इत्यादिना व्याख्यातमेतत् वृतौ ॥ ३१ ॥

ध्येयस्य अन्यस्य वा कस्यचित तत्सिद्धिहेतोर्मन्त्रदेवताविशेषस्य अयमेवोदयः प्रकटीभावः या साधकस्य ध्यातुराचार्यादेः—

'तस्माच्छब्दार्था चिन्तासु न सावस्था न या शिवः।' ( २।४ )

इति प्रतिपादितरूपा तदात्मतासमापत्तिः शिवैक्यावेशो न तु पञ्चवक्त्रादेर्व्य-तिरिक्तस्याकारस्य दर्शनं, न तु निश्चयमात्रेण तदात्मतासमापत्तिः, अपि तु इच्छतोऽविकल्पविश्वाहन्तात्मकशिवैक्यरूपेच्छापरामर्शाधिरूढस्य। एतदुक्तं भवति अहमेव तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितो विश्वशरीरश्चिदानन्द-घनः शिव इति सङ्कल्पो यस्याविकल्पशेषीभूतत्वेन फलति, तस्य ध्येयमन्त्र-देवतादि किं न नाम अभिमुखीभवति सर्वस्यैतदद्वयप्रथालग्नत्वात्। यथोक्त-मस्मत्परमेष्ठिपादैः—

'साक्षाद्भवन्मये नाथ सर्वस्मिन्भुवनान्तरे।
किं न भक्तिमतां क्षेत्रं मन्त्रः क्वैषां न सिध्यति ॥' (उ० स्तो० १।४)

इति। इयमेय च समापत्तिः परमाद्वयरूपस्यामृतस्य प्राप्तिः, अन्यस्मिँस्त्वमृते कतिपयकालशरीरदाढर्च दायिनि प्राप्तेऽपि साधकैर्मरणमवश्यमवाप्यत

पूर्वोक्तप्रकारेण निरूपिता अनवच्छिन्ननिर्मलस्वतन्त्रस्वरूपमात्रैक अनुत्तरस्पन्द-तत्त्वरूपा संविदेव अमृतप्राप्तिः—अविनाशशीलशिवस्वरूपस्य आत्मन अपरोक्षज्ञानरूपोप-लब्धिः। नेयम् आयुर्वेदोक्त द्रव्यविशेषस्वरूपजडात्मकविनाशी वस्तुनः प्राप्तिः, अपितु

अस्या एव संविदो विध्यन्तरसंस्कारकत्वमाह—

'इयमेव'यथाप्रतिपादिता शरीरादिविनश्वरवस्त्वालम्बनाहंप्रत्यय-रूपस्य स्वप्रकाशव्यतिरिक्तवेद्यभावप्रतीतिमयस्य मिथ्याज्ञानस्य उच्छेदात् अनवच्छिन्नस्वच्छस्वच्छन्दस्वभावमात्रैकतत्त्वोपलब्धिरूपा संवित् सम्यग् ज्ञानम् 'अमृतप्राप्तिः' अमृतस्य अविनाशिनः शिवात्मकस्यात्मनः प्राप्तिरुप-लब्धिः किल अर्थानुगतामृतप्राप्तिर्भवति, न तु द्रव्यविशेषात्मकस्य जडस्या-नित्यस्य वस्तुनः कस्यचित् प्राप्तिरमृतप्राप्तिः, सा हि जीवस्य कालान्तर-स्थायिशरीरत्वकारणभावात् एतदुपचारेण एवमुच्यते । तथा 'अयमेवात्मनो ग्रहः' या एवंविधा मन्त्रोच्चारणेच्छाक्षणभाविनी संवित् सोऽयमेवात्मनो जीवस्य ग्रहो ग्रहणं, तेषु तेषु हि दीक्षादिषु विधिविशेषेषु आत्मनः शिष्य-संबन्धिनः स्वस्य वा ग्रहणं शास्त्रेषु उपदिश्यते । यथा उदाहृतं वृत्तौ— 'आत्मनो ग्रहणं कुर्याद्दीक्षाकाले गुरुर्धिया ।' इति । तेन तादृग्विधिसंपत्तये

एवेत्येवकाराशयः । एवं सर्वत्रानेनैवाशयेन श्रीस्वच्छन्दे स्थूलदृश्यामृत-प्राप्तिप्रकरणे—

'नैव चामृतयोगेन कालमृत्युजयो भवेत् ।'

इत्युक्त्योपसंहृत्य तात्त्विकस्तत्प्राप्तिप्रकारः—

'अथवा परतत्त्वस्थः सर्वकालैर्न बाध्यते ।।'(७।२२३)इत्यादिना

'............सर्वं शिवशक्तिमयं स्मरेत् ।' इति मध्येन ।

जीवन्नेव विमुक्तोऽसौ यस्येयं भावना सदा ।
यः शिवं भावयेन्नित्यं न कालः कलयेत्तु तम् ।
योगी स्वच्छन्दयोगेन स्वच्छन्दगतिचारिणा ।
स स्वच्छन्दपदे युक्तः स्वच्छन्दसमतां व्रजेत् ।
स्वच्छन्दश्चैव स्वच्छन्दः स्वच्छन्दो विचरेत्सदा । (७।२५८)

इत्यनेन सहजसन्दर्भेण सप्रशंसं पश्चादुपदिष्टः । अयमेवात्मनो ग्रहो ज्ञानं यदुच्यते 'आत्मा ज्ञातव्य' इति तत्रेदमेव सर्वज्ञसर्वकर्तृस्वतन्त्रशिवस्वरूपतया प्रत्यभिज्ञानमात्मनो ज्ञानं, न तु—

शिवसंविदात्मिका । 'आत्मज्ञानमपि इयमेव भवति' मन्त्रोच्चारणाभिलाषक्षणसंभाविनी संविदेव आत्मनः ज्ञानम् । इयमेव अनुत्तरस्पन्दात्मकशिवतत्त्वेन सार्धं तादात्म्यप्रदायिनी निर्वाणदीक्षा अस्ति । निर्वाणं नाम निर्वृतिः अर्थात् द्वैतज्ञानात्मकविक्षेपपरिक्षयेण आत्य-न्तिकी प्रशान्तिस्वरूपा संविदः स्वस्वभावव्यवस्थितिः । अस्यां संविद्रूपज्ञानावस्थायां

परिकल्पितरूपविशेषस्यात्मनो या परमकारणभूतस्वभावाभेदसमापत्तिरुपजायते, सा परामृश्यमाना आत्मग्रहणात्मकविधिसंपादिका भवति, न तु अन्यथा तस्यामूर्तस्य ग्रहणं संभवति, ग्रहीतुः परमात्मनः सर्वव्यापकसंविद्रूपात् तस्याभिन्नत्वात् । तथा 'इयमेव निर्वाणदीक्षा' निर्वाणं निर्वृतिर्द्वैतप्रत्ययलक्षणक्षोभपरिक्षयात् आत्यन्तिकी प्रशान्तिः संविदः स्वस्वभावव्यवस्थितिः, तदर्था दीक्षा स्वरूपसंबोधदानात्मको भेदमयबन्धक्षपणलक्षणश्च संस्कारविशेषः, सा चैवंरूपा निर्वाणदीक्षा इयमेव प्रतिपादिता संवित्, एतत्कारणत्वात् तस्याः । यत एषा संवित् 'शिवसद्भावदायिनी' शिवस्य स्वस्वभावस्यैव परमेश्वरस्य यः सद्भावः सत्ता, येन रूपेण अहमेवास्मि—इति प्रतिपत्तिरबाधिता सिद्ध्यवस्थायामुपपद्यते तस्य दायिनी प्रतिपादिका, स हि निरुत्तरः संस्कारः सुप्रबुद्धगुरोर्गोचरः परमशिवात्मकस्वरूपप्राप्तिमात्रो, न तु बाह्यसाधनसाध्यविधिविशेषात्नक इति । व्याख्यातमेतत्—'इयमेव सा मिथ्याज्ञानशून्यस्य' इत्यादिना वृत्तौ ॥ ३१-३२ ॥

'पुरुष एवेदं सर्वम् ।' ( श्वेत० उ० ३।१५ ) इति श्रुत्यन्तविदुक्तम् ।
'त आत्मोपासकाः सर्वे न गच्छन्ति परं पदम् ।' (स्व० । ४ । ३८८)
इत्याम्नायोक्तेः । तथा दीक्षावसरे योजनिकाद्यर्थमयमेव शिष्यात्मनोऽनुग्रहः, इमामेव समापत्तिं विद्वानाचार्यः शिष्यात्मानं शिवे योजयन्नाचार्यो भवतीत्यर्थः । इयं स्वप्रत्ययसिद्धा पुत्रकादेः शिवात्मनः सद्भावस्य पारमार्थिकस्वरूपस्य दायिनी निर्वाणदीक्षा । यथोक्तम्—

एवं यो वेद तत्त्वेन तस्य निर्वाणदायिनी ।
दीक्षा भवत्यसन्दिग्धा तिलाज्याहुतिवर्जिता ॥' (प० त्री० २५)

इति । हौत्री दीक्षापि दीक्षैव, तत्र मा भूत्कस्यचिदनाश्वास इत्याशयेनात्रैवकारो न कृतः श्रीमहागुरुप्रवरेणेति शिवम् ॥ ३१-३२ ॥

इति श्रीमहामाहेश्वराचार्यक्षेमराजानकनिर्मिते
स्पन्दनिर्णये सहजविद्योदयस्पन्दो
द्वितीयो निःष्यन्दः ॥ २ ॥

सत्यामपि समस्तभेदात्मकभयस्य संमोहात्मकबन्धस्य च तत्क्षणमेव विनाशो भवति । श्लोकोक्तस्य 'शिवसद्भावदायिनी, इत्यस्य अंशस्य अयमर्थः शिवस्य—स्वस्वभावस्य सर्वेश्वरस्य यः सद्भाव अस्तित्वं येन रूपेण विद्यते सोऽहमेव नान्यस्य, ईदृशस्य अज्ञानावस्थायाम् अज्ञातस्य स्वस्वरूपस्य इयमेव प्रदात्री ॥ ३१-३२ ॥

# तृतीयो निःष्यन्दः

**एवमुत्तमविधिसंस्कारकारणत्वमस्याः संविदः प्रतिपाद्य, इदानीं सिद्धयन्तरकारणत्वं संसारिव्यवहारनिदर्शनेन प्रतिपादयितुं श्लोकद्वयमाह—**

एवं निमीलमोन्मीलनसमाधिद्वयसमाधेय उभयविसर्गारणीभूतः सुप्रबुद्धताभिव्यक्तये स्पन्दतत्त्वसमावेशो निःष्यन्दद्वयेन निर्णीतः। अथेदानीमेतदवष्टम्भ्या (म्भा)भ्यासेन परापरविभूत्युदयो भवतीत्यभिधाय संक्षेपेण बन्धमोक्षस्वरूपं निरूप्य प्रथमोपक्रान्तं निगमयति—यथेच्छेत्यादिभिः चक्रेश्वरो भवेदित्यन्तैरेकोनविंशत्या श्लोकैरनेन विभूतिस्पन्दाख्येन तृतीयनिःष्यन्देन। तत्र श्लोकद्वयेन जाग्रत्सिद्धस्वातन्त्र्यदृष्टान्तपुरःसरं स्वप्नस्वातन्त्र्यम्। एकेन तद्विपर्ययमभिदधता सततोद्युक्ततैवाश्रयणीयेति तात्पर्येणोक्तम्। द्वितीयेनाभीष्टवस्तुज्ञानाविर्भावः। एकेन कर्तृशक्त्याविर्भूतिः क्षुधादिजयश्च। एकेन सर्वज्ञताप्राप्तिः। एकेन ग्लानिनाशश्चेत्यष्टके निरूपितम्। ततः स्पन्दात्मन उन्मेषस्यैकेन स्वरूपं लक्षितम्। एकेन परसमाधिविघ्नभूतानां सिद्धीनां हेयतोक्ता। एकेव द्वितीयनिःष्यन्दनिर्णीतविश्वात्मतास्वभावः समावेश उक्तः। ततः समाविष्टातालाभे युक्तिरुक्तैकेन। त्रयेण पशुपाशनिर्णय उक्तः। एकेन स्पन्दतत्त्वस्यैव बन्धमोक्षोभयपदाक्रांतिरुक्ता। द्वयेनोच्छेद्यत्वेन बन्धस्वरूपमनूदितम्। एकेन तदुच्छित्त्युपायमभिदधतादिसूत्रोक्तार्थो निगमित इति संक्षेपो निःष्यन्दस्य॥ अथ ग्रन्थो व्याख्यायते। यदुक्तं 'सुप्रबुद्धस्य सततं स्पन्दतत्त्वोपलब्धिः' इति। तत्र 'अतः सततमुद्युक्त' इत्यनेन जागरायां तत्परिशीलनेन शिक्षा प्रबुद्धस्य सुप्रबुद्धताप्राप्त्यर्थमुक्ता। यामवस्थामित्यादिना प्रतिपदोपायपरिशीलनपाटवेन योगिसुषुप्तावरणभङ्ग उक्तः।

इदानी लौकिकस्वप्नसुषुप्तविदलनेन सुप्रबुद्धतामेव साधयितुं स्वप्नोचितां विभूतिमस्य दर्शयितुमाह—

**यथेच्छाभ्यर्थितो धाता जाग्रतोऽर्थान् हृदि स्थितान्।**
**सोमसूर्योदयं कृत्वा संपादयति देहिनः॥ ३३॥**

यथास्यानभिव्यक्तस्वस्वरूपस्य योगिनो जाग्रदवस्थायां यथा यथा इच्छा भवति, तथैव तस्यानेकार्थसंनिधानेऽभिमतस्यैव कस्यचिदर्थस्य दर्शनं भवति नटमल्लप्रेक्षादिषु सोमसूर्योदयं कृत्वा चक्षुरादिष्ववधानेन॥ ३३॥

**तथा स्वप्नेऽप्यभीष्टार्थान्प्रणयस्यानतिक्रमात् ।**
**नित्यं स्फुटतरं मध्ये स्थितोऽवश्यं प्रकाशयेत् ।। ३४ ।।**

तथा स्वप्नेऽपि अभीष्टार्थानिव पश्यति, प्रणयस्यानतिक्रमात् इच्छाभ्यर्थनाया अनतिक्रमात्, यच्च तन्मध्ये हृदयं स्फुटतरम् अभिव्यक्तम् नित्यं तदेतत् 'स्वप्न-स्वातन्त्र्यम्' इत्युच्यते, अयमेव तमोवरणनिर्भेद इत्यर्थः ।। ३४ ।।

'यथा देहिनो' देहमात्रमेव आत्मत्वेन प्रतिपन्नस्य सर्वस्य संसारिणो 'जाग्रतो' यथास्वं विषयग्रहणव्यग्रेन्द्रियवृत्तिलक्षणां जागरावस्थाम् अनुभवतो 'हृदि स्थितान्' आशयनिविष्टान् द्रष्टुम् अभीष्टान् भावान् इच्छाभ्यर्थितः' इच्छया दिदृक्षारूपया अभ्यर्थितः, तदवस्थास्वभावबलात् तादात्म्यसमापत्त्या तदर्थसंपत्तेः याचित इव 'धाता' सर्वकर्ता परमेश्वरः परमात्मा 'संपादयति' यथाभिप्रायं प्रकाशयति । किं कृत्वा ?–'सोमसूर्ययोः' चक्षुषोः 'उदयम्' अभिप्रेतार्थावधारणमात्रावधानरूपस्वरूपप्रथनं विधाय,—इत्युपमानवाक्यम् । इदमत्र तात्पर्यम्–यो यः कश्चित् संसारी यमेवार्थं द्रष्टुमुत्पन्नेच्छो भवति, स तद्दिदृक्षावस्थायां झगित्यवश एव परमात्मानं धातारमभेदेन आविशति, सा अवस्था अस्य प्रार्थना–इत्युपचरिता, तत्पूर्वकतया अभीष्टार्थप्राप्तेः । स तया अभ्यर्थितो धाता तावन्मात्रार्थ-

धत्ते सर्वमात्मनीति धाता शंकरात्मा स्वभावः स यथा जाग्रतः जागरायामभिव्यक्तस्वस्वातन्त्र्यस्य देहिनो देहभूमिकायामेव प्रकटीभूतपिण्डस्थज्ञानस्य योगिनः सम्बन्धिन्येच्छयाभ्यर्थितोऽन्तर्मुखस्वरूपविमर्शबलेन प्रसादितो हृदि चेतसि स्थितानर्थानिति बिन्दुनादादिज्ञानपुरः (सर) क्षोभप्रतिभाचालनबोधस्तोभज्ञानसंचारादिप्रयोजनानि संपादयति । कथं सोमसूर्ययोर्ज्ञानक्रियाशक्त्योरुदयं कृत्वा, ज्ञानशक्त्या भास्यमानं हि तत्तत्क्रियाशक्त्योन्मील्यते । समावेशोन्मिषत्प्रतिभात्मकमूलावष्टम्भ-

सम्प्रति लोकप्रसिद्धस्वप्नसुषुप्त्युल्लेखनद्वारा तद्विघटनेन सुप्रबुद्धस्वरूपं साधयितुं स्वप्नतुल्यां विभूतिमस्य योगिनः प्रदर्शनार्थमाह—यथेति । यस्मिन् साधके पूरिपूर्णतया स्वस्वरूपस्य अपरोक्षरूपेण अभिव्यक्तिर्नैव जाता, तादृशस्य योगिपुरुषस्य जाग्रत्कालेऽपि स्वेच्छासामर्थ्यात् सत्स्वपि नैकविधपदार्थेषु सन्निहितेषु निश्चितरूपेण अभिलषितपदार्थः दृष्टिगोचरो भवत्येव । अस्यां स्थितौ धातृरूपा चितिशक्तिस्तस्य योगिनः सोमसूर्यात्मकनेत्र-

प्रथनाय अवधानात्मना चक्षुषोः स्वरूपव्यक्तिलक्षणमुदयं कृत्वा, संनिहितेष्वपि अन्येषु बहुषु दृश्येषु यद्दिदृक्षयैव अभ्यर्थितः तमेवार्थं प्रदर्शयति, नान्यत्। चक्षुषोरुदयं कृत्वा—इति उपलक्षणमात्रमेतत् मन्तव्यम्। तेन शुश्रूषाभ्यर्थितः श्रवणयोरुदयं कृत्वा श्रव्यान्तरसंनिधावपि शुश्रूषितमेव अर्थं श्रावयति धाता देहिनः,—इति सर्वेन्द्रियेष्वपि योज्यम्। चक्षुषोश्च सोमसूर्यशब्देन प्रतिपादनेन विश्वरूपात् धातुर्जीवस्य वास्तवाभेदप्रतिपादनप्रयोजनम्। उपलक्षणार्थं च वृत्तिकृतैव व्याख्यातम्—'चक्षुरादिष्ववधानेन' इत्यत्रादिग्रहणात् इत्थं सर्वजीवानां सर्वार्थप्रथनमिच्छापूर्वकं भवति, सा च इच्छावस्था संसारिणः परमकारणाभेदरूपा,—इति परमेश्वर एव स्वतन्त्रो यथेष्टमिदमखिलं प्रकाशयति—इति परमार्थं तदीयमायाशक्तिजनितदेहादिव्यवच्छेदाः संसारिणो न प्रपद्यन्ते। यस्तु प्रबुद्ध उक्तोपदेशाभ्यासप्रकर्षकषणपाषाणनिशितीकृतप्रज्ञाकृपाणीनिकृत्तकल्पकायाद्यहंकारकर्कशग्रन्थिरुदितनिरावरणसत्यात्मसंवित्स एव संस्मर्यमाणः तं प्रत्यभिज्ञातुमलम्,—इति सिद्धाव्यतिरेकसमाधियोगिनं प्रति इदमुपमेयवाक्येनोपदिश्यते। यथा वा तैरेव प्रतिपादितयुक्त्या इच्छाभ्यर्थितः सन् सर्वार्थान् प्रथयति; 'तथैव' तेन प्रकारेण 'नित्यं' सर्वदा सर्वासु ज्ञातृज्ञेयसंबन्धदशासु 'प्रणयस्य' इच्छावस्थायां तादात्म्यप्रतिपत्तिरूपायाः प्रार्थनायाः 'अनतिक्रमात्' अनुल्लङ्घनात् प्रत्यवमर्शाबहितत्वेन

युक्तिस्फारितज्ञानक्रियाव्याप्तिसारसव्येतरमरीचिविस्फारणक्रमेण तत्तद्वेधसंक्रमणादि संपादयति योगिशरीरानुप्रविष्टः परमेश्वरः। यथा चैवं तथा—

अनागतायां निद्रायां विनष्टे बाह्यगोचरे।
सावस्था मनसा गम्या परा देवी प्रकाशते ॥ (वि० भै० ७५)।
पीनां च दुर्बलां शक्तिं ध्यात्वा द्वादशगोचरे।
प्रविश्य हृदये ध्यायन् स्वप्नस्वातन्त्र्यमाप्नुयात् ॥ (वि० भै० ५५)

इति संप्रदायस्थित्या वमनग्राससक्तदुभयविसर्गारणिचितिशक्तिपरानर्शमुखेन नित्यं प्रणयमनतिक्रामतो भगवत्प्रार्थनापरस्य योगनिद्रारूढस्य स्फुटतरमनाच्छादितरूपतया मध्ये सौषुम्नधामनि स्थितो धाता स्वप्नेऽप्यभीष्टानेवाण-

द्वये अनतिसाधारणतीव्रावधानात्मिकां शक्तिं प्रदाय जाग्रत्काल एव तान् पदार्थान् साक्षात्कारयति यान् पदार्थानवलोकयितुं स वाञ्छति ॥ ३३ ॥

यथा योगी जाग्रत्कालेऽपि स्वकीयामभिरुचिमनुसृत्य इच्छाभ्यर्थितः धातृप्रसादेन नानाविधेषु पदार्थसंघेषु समीपे वर्तमानेऽपि स्वाभिलषितमेव पदार्थं पश्यति। यतो हि

अनुपेक्षणात् 'स्वप्नेऽपि' स्वव्यापारोपरतचक्षुरादौ मनोमात्रग्राह्यस्वसृष्टि-विषयायां स्वापावस्थायां यावद् 'अभीष्टान्' साधकाभिमतानेव 'अर्थान्' स्फुटतरम्' अतिप्रकटं कृत्वा 'मध्ये स्थितो' हृदये सदासीनो'ऽवश्यं' नियमेन असौ धाता 'प्रकाशयेत्' प्रथयेत्–इति तथेत्यादेरुपमेयवाक्यस्यार्थः। तात्पर्यं पुनरिदं–यः सर्वदा सर्वानुभवेषु, धातुः सर्वेश्वरस्य स्वस्वभावस्य तल्लीनत्वलक्षणं प्रणयं स्वसामर्थ्यसिद्धं प्रतिक्षणप्रत्यवमर्शाविहितत्वात् नातिक्रामति, तस्यासौ धाता जागरवत् स्वप्नेऽपि अभिमतानेवार्थान् प्रकाशयति, न तस्य स्वप्नपदार्थाः स्वातन्त्र्येण प्रवर्तमानाः सर्वकर्तृत्वलक्षणस्वशक्तिप्रतिबन्धमुद्भावयन्ति असंसारित्वात्; किंतु स्वतन्त्रः स्वशक्त्या यथेष्टं तान् सृजति। यथाह भर्तृहरिः।

'प्रविभज्यात्मनात्मानं सृष्ट्वा भावान् पृथग्विधान्।
सर्वेश्वरः सर्वशक्तिः स्वप्ने भोक्ता प्रपद्यते॥'

इति। अत एव स्वप्नस्वातन्त्र्यमेतत्–इत्युक्तम्। तस्य स्वप्नजागरयोर्विशेषो नास्ति,—इति तमोवरणनिर्भेदः स एवोक्तः। देहाद्यहन्ताजनितोऽनवच्छिन्नस्वमाहात्म्यनिरोधः तमः, तेन वरणं स्थगनं स्वभावतिरोधानं, तस्य निर्भेदोऽनन्तनिजवैभवाभिव्यक्तिवशात् विनाशः, स हि तस्यामवस्थायामाविर्भवति। व्याख्यातमेतत् वृत्तौ पृथक् पृथक्—'यथा अस्य अनभिव्यक्तस्वस्वरूपस्य' इत्यादिना। तथा 'स्वप्नेऽप्यभीष्टार्थानिव पश्यति' इत्यादिना ग्रन्थेन॥ ३३-३४॥

वशात्तशाम्भवसमावेशादीनन्यानपि समावेशाभ्यासरसोन्मृष्टमतिमुकुरस्य जिज्ञासितानर्थान्नवश्यं प्रकटीकरोति, नास्य योगिनः स्वप्नसुषुप्तयोर्व्यामोहो भवतीत्यर्थः। स्वप्नेन सौषुप्तमप्युपलक्षितम्। अत्राभीष्टार्थप्रकाशे अवृत्त्या अयमेव हेतुः, प्रणयस्य प्रार्थनाया अन्तर्मुखस्वरूपपरिशीलनोपासासंपाद्यस्य मायाकालुष्यौपशमलक्षणस्य प्रसादस्य भगवताननतिक्रमात्। परमेश्वरो हि चिदात्मा यद्यन्तर्मुखोचितसेवाक्रमेणार्थ्यते तत्तत्संपादयत एव, जाग्रतः इति परतत्त्वे जागरूकस्य जागरावस्थास्थस्य चेति श्लेषोक्त्या व्याख्येयम्॥३४॥

प्रणयस्य प्रार्थनाविशेषस्य मायाकालुष्यविनाशलक्षणस्य प्रसादस्य भगवताननतिक्रमात्। स्वप्नपदं सौषुप्तस्य उपलक्षणमस्ति। अयं निष्कर्षः—स्वप्ने यं वस्तुविशेषमयं योगी इच्छति तमेव तं प्रति स्फुटतया प्रकाशयति। यतो हि चिदात्मा परमेश्वरः योगिनः हृदि सर्वदा अवस्थितस्तस्य अभिलाषं जानात्येव॥ ३४॥

अथ एवंविधसमाधिव्युत्थानमात्रात् संसारिसमानतां योगिनः प्रतिपादयन्, नित्ययुक्ततां द्रढयितुमाह--

यदि पुनरेवं सावधानो (न) भवति तदा नास्य योगितेत्याह—

**अन्यथा तु स्वतन्त्रा स्यात्सृष्टिस्तद्धर्मकत्वतः ।**
**सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये ॥ ३५ ॥**

अन्यथा तु स्वरूपस्थित्यभावे स्वतन्त्रा स्यात् स्वप्ने आलबिडालदर्शनरूपा सृष्टिः, यस्मात् तत्तत्त्वं सृष्टिस्वभावं प्रसवधर्मत्वात्; यथा सततं सर्वस्य लोकस्य जाग्रद्वृत्तौ स्वप्नावस्थायां च संबन्धासंबन्धविकल्पाः ॥ ३५ ॥

'अन्यथा तु' उक्तात्प्रकारात् अन्येन प्रकारेण, सर्वकर्तुः स्वतन्त्रस्य परमेश्वरस्य एकस्य ममेवेदं जगत्कार्यम्–इति प्रतिपत्त्यभावरूपेण वर्तमानस्य योगिनो 'जाग्रत्स्वप्नपदद्वये' जागरस्वापदशयोः 'तद्धर्मकत्वतः' सर्गगुणात्मकत्वात् 'सृष्टिः' नानाभावनिर्मितिः 'सततम्' आत्मतत्त्वसंविदुदयात् 'स्वतन्त्रा स्यात्' वास्तवेन स्वतन्त्रस्वात्ममात्रकर्तृत्वेन अपरामृश्यमाना सती, विचित्रविभ्रमदानस्वच्छन्दा दुर्निवारतादृकसामर्थ्यप्रसरा भवेत् । कस्येव ?–'लौकिकस्येव' संसारिणो लोकस्य यथा । इदमत्र तात्पर्यम्–जागरास्वप्नलक्षणं पदद्वयं सर्गस्वभावं, तत्र हि ज्ञानज्ञेयभावेन पारमेश्वर्याः शक्तेः स्थितिः प्रतिपादिता, तादृशि अस्मिन् द्वयात्मके पदद्वये यो योगी यथोक्तसंवित्तिसमाधानापरित्यागात् अप्युत्थितः स्यात् तस्य सर्वथा स्वतन्त्रे सर्वकर्तरि स्वात्मनि सुव्यवस्थितस्य सृष्टिस्वभावं तत्पदद्वयं शक्तिप्रतिबन्धाय

यद्युक्तयुक्त्या नित्यं नाराध्यते धाता तदा स्वस्वरूपस्थित्यभावे सततं प्रत्यहं लौकिकस्येव चास्य योगिनोऽपि जागरायां स्वप्ने च साधारणासाधरणार्थप्रकाशनतन्निश्रयनादिस्वभावा पारमेश्वरी सृष्टिः स्वतन्त्रा

यदि पूर्वोक्तदिशा पुरुष अवधानयुक्तो न भवति तर्हि तस्य योगित्वमपि नैव स्यादिति निरूपयति–अन्यथेति । पूर्वश्लोके या उक्तिर्प्रदर्शिता तदनुसारं धातुः परमेशितुः सावधानतया अविरतं समाराधनं पुरुषो न करोति, तदा तस्य स्वस्वरूपेऽवस्थानमपि नैव भवति । अस्यां दशायां प्रत्यहं लौकिकप्रमातृवत् यस्य पुरुषस्य स्वप्नजागरयोः साधारणा-

**न प्रभवति; यस्तु अतोऽन्यथा स्यात् स लोकवन्निजयैव भावसृष्टचा परवशीक्रियते–इति नित्ययुक्तेन योगिना भाव्यमित्यर्थः। तदेतत् 'अन्यथा स्वरूपस्थित्यभावे'––इत्यादिना व्याख्यातमेतद्वृत्तौ ॥ ३५ ॥**

स्यात्, लौकिकवद्योगिनमपि संसारावट एवासौ पातयेदित्यर्थः। यथोक्तम्—

'प्रवृत्तिर्भूतानामैश्वरी।'

इति। 'तद्धर्मकत्वतः' इति स्वप्नजागरादिपदप्रकाशने भगवत्सृष्टेः स्वातन्त्र्यस्वभावादित्यर्थः ॥ ३५ ॥

**इदानीमतीतानागतव्यवहितविप्रकृष्टादिवस्तुविज्ञानमनयैव संविदा सुलभम्,–इति युगलकेनाह––**

एवं स्वप्नसौषुप्तनिर्दलनोपायं स्वप्रबुद्धतायै संसाध्य स्पन्दतत्त्वसमावेशोपायं सुप्रबुद्धस्य दृष्टान्तयुक्तिपूर्वकं निरूपयति जिज्ञासितार्थज्ञप्तिरपीत्थं भवतीत्यादिशति—

**यथा ह्यर्थोऽस्फुटो दृष्टः सावधानेऽपि चेतसि।**
**भूयः स्फुटतरो भाति स्वबलोद्योगभावितः ॥ ३६ ॥**
**एवं यत्परमार्थेन यत्र येन यथा स्थितम्।**
**तत्तथा बलमाक्रम्य न चिरात्संप्रवर्तते ॥ ३७ ॥**

यथा किल दूरस्थितः कश्चिदर्थः पुरुषेण पूर्वं सावधानेनापि न लक्ष्यते स एव स्फुटतरो भवति, प्रयत्नविशेषेण निरूप्यमाणस्तत्रैव स्थितस्य ॥ ३६ ॥

तथा तेनैव प्रयत्नविशेषेण यद् वस्तु येन रूपेण यदा यस्मिन् काले, यत्र देशे, यथा येनाकारेण संस्थितं, तद् वस्तु तथा स्वबलं स्वस्वरूपमाश्रितस्याचिरेणैव कालेन प्रतिभाति निरावरणस्वरूपत्वात् तेनातीतानागतं ज्ञानं परिमितविषयं न किञ्चिदाश्चर्यम् ॥ ३७ ॥

साधारणपदार्थप्रकाशयतन्निश्चयादिस्वभावा स्पन्दशक्तिः निर्मिता सृष्टिस्तु स्वतन्त्रैव स्यात्। एवञ्च पाञ्चुलपादहालिकवत् तादृशं योगिनमपि संसारवर्त्मनि निश्चियेन पतनं भवेत्। स्वप्नजागरादि दशास्थ वस्तुप्रकाशने भगवतः सृष्टेः स्वभावतः स्वातन्त्र्यमस्ति। एतत्सूचनायैव सूत्रे 'तद्धर्मकत्वतः।' इति पदं वर्तते ॥ ३५ ॥

'यथा हि' कस्यचित् 'सावधाने' तदर्थदिदृक्षानिविडप्रयत्नेऽपि 'चेतसि' सति, झगिति दृष्टमात्रो'ऽर्थः अस्फुटः' अप्रकटो 'भाति' प्रथते, 'भूयो'ऽनन्तरं स्वबलोद्योगभावितः' स्वस्यात्मनः सर्वज्ञस्य बलं सामर्थ्यं ज्ञत्वादिलक्षणा शक्तिः तया, 'उद्योगः' उद्यमो निविडतरावधानतया दर्शनोत्साहः, तेन 'भावितो' लक्षितः सन् 'स्फुटतरो भाति' प्रत्यभिज्ञायमाननिरवशेषविशेषः सोऽयम् इति प्रथते,—इत्युपमानवाक्यम् । अस्येदं तात्पर्यं—यस्य कस्यचित् द्रष्टुमभीष्टोऽर्थो झगिति विस्फारितमात्रचक्षुषो न सम्यक् दृश्यतामापद्यते, पुनः क्षणान्तरे तद्देशगतस्यैव तथैव न्यक्षनिक्षिप्ताक्षस्य स्फुटतरः प्रकाशते, तत्र को हेतुः ?—न हि तेन द्रष्टृव्यतिरिक्तं विशेषदर्शनसाधनं किंचिदाह्रियते, तेन तात्त्विकस्वभावानुप्रवेश एव तस्य संजायते, यद्बलस्पर्शात् तस्य सोऽर्थो याथात्म्येन प्रथते—; ततः स्वबलोद्योगमात्रं सर्वार्थप्रकाशनसाधनं सर्वदेहिनां, नान्यत्किंचित् । एवं विधार्थप्रकाशनं सर्वप्राणिसाधारणमपि प्रबुद्धस्य योगिन एव प्रत्यवमृश्यमानं सत् तथा प्रकाशत, नान्यस्य मायातिमिरतिरस्कृत-सम्यग्दर्शनस्य,—इति योगी एव अनेन उपदेशेन स्मार्यते 'एवम्'—इत्याद्युप-मेयवाक्योक्तेन । यथा हि अस्फुटदृष्टोऽर्थः स्वबलमेवाक्रम्य स्फुटतरं प्रकाशते, 'एवम्' अनेनैव उपमानवाक्योक्तेन प्रकारेण 'बलं' स्वस्वभावसामर्थ्यम् 'आक्रम्य' दिदृक्षाक्षणे 'तत्' अभेदेन अधिष्ठाय, वर्तमानस्य योगिनः 'तथा' तेनैव तत्तदवस्थाकारदेशकालाद्यविसंवादिना प्रकारेण 'संप्रवर्तते' सम्यग-भिव्यक्तिमेति सम्यक् ज्ञेयतया अभिमुखीभवति । किं तद्वस्तु ?—'परमार्थेन'

हि शब्दः किलशब्दार्थे । सावधानेऽपि चेतसि दूरत्वादिदोषैर्यथा किलार्थोऽस्फुटो दृष्टो भूयोऽध्यक्षनिरीक्षणात्मना स्वबलोद्योगेन भावितो भृशमालोकितो न केवलं स्फुटो यावत्स्फुटतरोऽपि भाति, तथा यत्स्पन्द-तत्त्वात्मकं बलं येनानन्दघनतात्मना परमार्थेन यत्रेति शंकरात्मनि स्वस्व-भावे यथेति अभेदव्याप्त्या स्थितं तत्कर्तृ यथेति स्वबलोद्योगेन अन्तर्मुखत-देकात्मतापरिशीलनप्रयत्नेन संभावितं शीघ्रमेव स्फुटतरत्वेन प्रवर्तते अभिव्यज्यते । कथमाक्रम्याराधकस्य कल्पितदेहादिप्रमातृभूमिं स्वात्मन्येव

यदा योगी शाक्तबलम् अनुभवति तदा तस्मिन् योगिनि सर्वज्ञत्वस्य पूर्णतया विकासो भवति । अनेन विकासे अतीतानागतादि वस्तूनां प्रत्यक्षं कुरुते, अमुं विषयं श्लोकद्वयेन दर्शयति—यथेति । यथा कस्यचिद् व्यक्तिविशेषस्य दूरदेशस्थवस्तुनः सत्यामपि चित्तैकाग्रतायां सहसा स्पष्टरूपेण प्रतीतिर्न जायते, किन्तु अन्तर्मुखतदैकात्मतापरिशीलन-

तत्त्वतो 'यत्' वस्तु गवादि 'यथा' येन अवस्थात्मना प्रकारेण 'येन' यादृशेन विशिष्टसास्नादिमता आकारेण 'यत्र' यस्मिन् व्यवहितविप्रकृष्टादौ देशे, भूतादौ वा काले 'स्थितं' तत्तथा संप्रवर्तत'–इति। अयमत्र भावार्थः– अस्फुटेऽर्थे दृष्टे तस्य स्फुटतरावभासाय सर्वज्ञस्वस्वभावाभेदो यः सर्वस्य कस्यचित् अप्रयत्नेन उत्पद्यते, प्रबुद्धः तत्परामर्शाभ्यासात् देशकालादिव्यवहितानपि यथाभिमतानर्थान् तत्त्वतो जानाति–इत्यबाधितायां युक्तौ स्थितायां सर्वज्ञत्वादिगुणाभिव्यक्तौ अयमेव हेतुः। अत एवोक्तम्––

'परिमितविषयमतीतानागतज्ञानं न
किंचिदाश्चर्यं निरावरणस्वस्वभावत्वात्'

इति। तस्यां हि दशायां देशकालाद्यनिरुद्धं स्वस्वभावबलमभिव्यज्यते। 'अस्फुटोऽर्थो दृष्टः' इत्युपलक्षणार्थमेतन्मन्तव्यम्, तेन श्रुतादिष्वेवमेव योज्यम्। एतेन च दृश्यादेरर्थस्य स्फुटतरदर्शनाद्यर्थं प्रयत्नविशेषावस्थायां संपाद्यमानेन प्रतिष्ठितस्पन्दानुप्रवेशेन सर्वबुद्ध्यक्षव्यापारात्मकजाग्रदवस्थाश्रयः परतत्त्वोपलब्ध्युपायः प्रसङ्गात् प्रतिपादितो वेदितव्यः व्याख्यातमेतद्वृत्तिकृता श्लोकद्वयं पृथक् पृथक्––

'यथा किल दूरस्थित'

इत्यादिना,

'तथा तेनैव प्रयत्नविशेषण'

इत्यादिना ग्रन्थेन ॥ ३६-३७ ॥

निमग्नां कृत्वा, अथ च स्पन्दात्मकं बलमाक्रम्य स्थितस्य कलितदेहबुद्धिप्रमातृभूमिमसकृदुत्तेजयतः साधकस्य योगिनो यज्जिज्ञासितं निधानादि यत्र देशादौ येन हेमादिना परमार्थेन यथा सन्निवेशेन स्थितं तथा तदचिरादेव प्रकाशते ॥ ३६-३७ ॥

प्रमाद्यात्मकस्वबलोद्योगेन तस्य तद्वस्तुनः स्फुटतररूपेण प्रतिभानं भवति। अनयैव नीत्या लोकोत्तरस्पन्दात्मनि स्वरूपे स्थितिमुपगतो योगी अल्पीयस्यैव समये सर्वान् पदार्थान्, यस्मिन् काले, यस्मिन् प्रदेशे, यादृश-यादृशाकारप्रकाररूपैः विद्यमानां प्रत्यक्षतया पश्यति ॥ ३६-३७ ॥

अथैतयैव युक्त्या क्षुत्तृष्णादिजयं प्रतिपादयितुमाह--

कर्तृशक्त्यादिरप्यमुत एव बलात्प्रादुर्भवतीत्याह—

**दुर्बलोऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।**
**आच्छादयेद्बुभुक्षां च तथा योऽतिबुभुक्षितः ।। ३८ ।।**

क्षीणधातुरपि तद्बलमुत्साहलक्षणमाक्रम्य यत: कार्ये प्रवर्तते, यथा च कश्चिद् अशक्तोऽपि व्यायामाभ्यासेन महतीं शक्ति प्राप्नोति उद्योगबलेन, तथानेन स्वभावानुशीलनेन बुभुक्षामपि आच्छादयति योऽतिबुभुक्षित: स्यात्, यत: सर्वत्रैवात्मस्यरूपस्य कार्यकारणसंपादन-सामर्थ्यमविलम्बम् ।। ३८ ।।

'यतो' यस्माद्धेतोर्बलं सर्वकर्तृत्वस्वातन्त्र्यलक्षणं सामर्थ्यमात्मीयमाक्रम्य, पूर्वोक्तया युक्त्या तत्राव्यतिरेकेण स्थित्वा 'दुर्बलोऽपि' अपचितदेह धातुत्वात् असमर्थोऽपि सन्, कश्चित् 'कार्ये' भारोद्वहनादिव्यापारे 'प्रवर्तते' क्रियाप्रधानो भवति,--एतत् दृष्टान्तवाक्यम् । अस्येदं तात्पर्यम्--यः परिकृशकायत्वात् अशक्त एव संध्यादिव्यापारमारभमाणः, अभ्यासबलात् विषयान्तरे बलवत्तरेणाप्यशक्यं व्यायामादिकर्म कर्तुं प्रभवति, तस्य तथा सामर्थ्योत्पत्तौ प्राक्प्रतिपादितयुक्त्या स्वस्वभावबलाक्रमणमेकं वर्जयित्वा नान्यत्किंचिन्निमित्तम् । तत्तु यथेष्टसर्वकर्तृत्वलक्षणं बलमात्मतत्त्वस्य, मायीयः कर्ता मायाप्रतिबद्धशक्तित्वात् नियतकारणान्तरापेक्षनियतकार्य-सम्पादनसामर्थ्यं मन्यते । सोऽपीदमहं कर्तुं शक्नोमि--इत्यविकलोत्साह-दशायां तदेव बलमवलम्बमानः तत्कार्यसंपादनक्षमो भवति,--इति युक्ति-

यथा क्षीणधातुर्ऋषिप्रायः सोऽपि स्पन्दात्मकं बलमाक्रम्य स्पन्द-समावेशबलेन प्राणप्रमातृभूमिमसकृदुत्तेज्य कार्येऽवश्यकर्तव्ये कर्मणि प्रवर्तते, अशक्यमपि वस्तु तद्बलाक्रमणेनैव करोतीत्यर्थः । यथा योऽप्यतिबुभुक्षितः

तत्तद्व्यक्तिविशेषेषु कर्तृत्वशक्त्यादिकमपि अनुत्तरस्पन्दशक्तेः बलादेव प्रादुर्भवतीति निर्वक्ति—दुर्बलेति । यथा कश्चित् क्षीणधातुर्दुर्बलपुरुषविशेषैः औषधद्वाराशक्तिसम्पन्नः सन् सुपुष्टो भवति अथवा अत्यन्तशारीरिकक्षीणधातुऋषिप्रायः लोकोत्तरस्पन्दात्मकं परमशिव-तत्त्वस्वरूपं बलमाश्रित्य स्वस्मिन् स्पन्दतत्त्वसमावेशेन प्राणप्रमातृत्वादिभूमिकां पौनःपुन्येनः

योगिन एव प्रतिपत्तिगोचरी भवति--इति, तामेतां दृष्टान्तीकृत्य तं प्रत्येव इदं दार्ष्टान्तिकवाक्येन उपदिश्यते,--यथा दुर्बलोऽपि बलवत्संपाद्यकार्यसंपादनसमर्थः स्वस्वभावबलाक्रमणादेव भवति, 'तथा' तेनैव प्रकारेण सर्वकार्यसंपादनस्वतन्त्रं स्वबलमाक्रम्य तत् स्वशक्तितया अधिष्ठाय 'योऽतिबुभुक्षितः' अत्यर्थं भोजनेच्छाविष्टः, स तां बुभुक्षाम् 'आच्छादयेत्' स्थगयेत् न्यक्कुर्यात्, नित्यतृप्ताकृतकस्वरूपसामर्थ्यप्रथनात् अन्नाद्यभ्यवहारकारणमेव क्षुन्निवृत्त्यादिकार्यम्,--इति नियतिशक्तिप्रतिबन्धविदलने सति अत्यन्तं तां तिरोभावयेत्, नित्यतृप्तः एव स्यादित्यर्थः ।

'दुबलः क्षीणधातुरपि'

इत्यादिना व्याख्यातमेतद्वृत्तौ ॥ ३८ ॥

सोऽपि तद्बलाक्रान्त्या क्षुत्पिपासादि शमयति। नहि चिद्घनां भूमिमनुप्रविष्टस्य द्वन्द्वाभिभवः कश्चित्प्राणादिभुव एव तदाश्रयत्वात्तस्याश्चेह चिद्भूमौ निमग्नत्वात् ॥ ३८ ॥

एवं पृथक् सर्वज्ञत्वसर्वकर्तृत्वादिगुणव्यक्त्युपपायोपपत्तीः प्रतिपाद्य पुनरेकोपपत्तिनिदर्शनेन ताः प्रतिपादयितुमाह--

यत एवमुक्तसूत्रोपपत्तिक्रमानुसारेणेदृक्सिद्धिसमुदायोऽस्माद्भवतीत्यतः—

**अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः ।**

**तथा स्वात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यति ॥ ३९ ॥**

अनेनात्मस्वभावेन अधिष्ठिते व्याप्ते शरीरे सर्वज्ञतादयो यस्मात्, तत्र स्वल्पयूकाभक्षणमपि क्षिप्रमेव जानाति, तथा स्वात्मन्यवहितस्य सर्वत्र सर्वज्ञता भविष्यति ॥ ३९ ॥

उद्दीसां कृत्वा आवश्यके कर्तव्ये प्रवर्तते अर्थात् अशक्यमपि वस्तुविशेषमपि तद्बलवशात् संपादयति तथैव अत्यन्तक्षुधार्तबुभूक्षितः व्यक्तिविशेषोऽपि तद्बलमाश्रित्य क्षुत्पिपासादिप्राणधर्मादीन् दूरीकरोति । इदृशं स्पन्दतत्त्वं सर्वत्र व्यासं समस्तभावापदार्थेषु तत्कृते अभीष्टशक्ति समर्पयति ॥ ३८ ॥

'अनेन' आत्मना चेतयित्रा 'अधिष्ठिते' अहमिति प्रतिपत्त्या अध्यासिते 'देहे' शरीरे 'सर्वज्ञतादयः' शरीराश्रयाणि सर्वाणि ज्ञेयानि कार्याणि च, तेषु ज्ञता ज्ञातृत्वमादिर्येषां तान्येव कर्तृत्वादयो धर्माः 'यथा' सर्वस्य स्थिताइति दृष्टान्तवाक्यम् । अस्येदं तात्पर्यम्–यद्यदयमात्मा अहमिति-प्रतिपत्त्या अधितिष्ठति तत्तदस्य शरीरम्, तदाश्रयं च सर्वमयं स्थूलं सूक्ष्मं वा ज्ञेयं कार्यं च जानाति च करोति च--इत्यनेन निदर्शनेन 'तथैव' तेनैव प्रकारेण अहंतया देहाधिष्ठानवत् 'स्वात्मनि' स्वस्वभावे 'न दुःखं न सुखं यत्र' इत्यादिनोक्तलक्षणे देहादिव्यतिरिक्तविशुद्धाद्वयचिन्मात्रवपुषि 'अधिष्ठानात्' अहंतया अध्यासनात्, एवं शरीराश्रमसमस्तज्ञेयकार्यवस्तु ज्ञातृत्वादिवत् 'सर्वत्र' सकलेष्वपि भुवनेषु, योगिनः सर्वज्ञतादयो भविष्यन्ति अवश्यमभिव्यक्ति यास्यन्ति; परस्परव्यतिरिक्त-देहमात्राहंभावलक्षण-प्रतिबन्धभङ्गाद् अद्वयचिन्मात्रस्वात्मप्रतिष्ठिताहंकारस्य योगिनो निर्विघ्नाः सर्वज्ञतादयः सर्वत्र अभिव्यज्यन्त एव इत्यर्थः ।

'अनेन आत्मस्वभावेन'

इत्यादिना व्याख्यातमेतत् वृत्तौ ॥ ३९ ॥

अनेन स्वस्वभावात्मना स्पन्दतत्त्वेनाधिष्ठिते व्याप्ते देहे सति यथा तदवस्थोचितार्थानुभवकरणादिरूपाः सर्वज्ञतासर्वकर्तृतादयो धर्मा आविर्भवन्ति देहिनः, तथा यद्ययं कूर्माङ्गसंकोचवत्सर्वोपसंहारेण महाविकासयुक्त्या वा स्वस्मिन्ननपायिन्यात्मनि चिद्रूपे अधिष्ठानं करोति उक्ताभिज्ञानप्रत्यभिज्ञाते तत्रैव समावेशस्थितिं बध्नाति तदा सर्वत्रेति शिवादौ क्षित्यन्ते एवमिति शंकरतदुचितसर्वज्ञतासर्वकर्तृत्वादिरूपो भविष्यति ॥ ३९ ॥

चेतनेन आत्मना अधिष्ठिते शरीरेऽहमिति संविद्रूपज्ञानप्रकाशेन शरीराश्रयाणि समस्तानि ज्ञेयानि एवं तत्तद्विविधकार्याणि जायन्ते । तान् विषयान् प्रति अहमभिमानिनो जीवस्य कर्तृत्वज्ञातृत्वादयो धर्मविशेषाः यथा स्थिताः । इदमत्र तात्पर्यमस्ति यस्य पुरुषविशेषस्य अहमिति बुद्धया शरीरमेवाधिष्ठितं वर्तते, तत्तद्व्यक्तिविशेषस्य स्थूलं सूक्ष्मं ज्ञेयं कार्यं च, अपरोक्षं भवति तन्निर्माणाय यत्नमपि करोति । एतत् दृष्टान्तद्वारा यथा जीवः देहनिमित्तानि कार्याणि ज्ञेयानि च जानाति रचयति च तथैव यत्र स्वस्वभावे दुःखादीनां गन्धोऽपि नास्ति तादृशे सर्वोपाधिविनिर्मुक्तचित्स्वभावे अहंरूपेण परिज्ञानं भवति । तस्य पुरुषस्य सर्वत्र ज्ञातृत्वं कर्तृत्वञ्च भवति । इदं संसारितो वैलक्षण्यं स्वस्वरूपज्ञातुः वर्तते । अयं योगी देहाभिमानलक्षणप्रतिबन्धशून्यतया स्वस्वरूपे प्रतिष्ठितः सर्वकर्तृत्वसर्वज्ञत्वादिधर्माणामाश्रयो भवति ॥ ३९ ॥

एवं व्याधिवलीपलिताद्युच्छेदाय उपपत्तिमाह--

इदमप्येतत्प्रसादेनेत्याह—

ग्लानिर्विलुण्ठिका देहे तस्याश्चाज्ञानतः सृतिः ।
तदुन्मेषविलुप्तं चेत्कुतः सा स्यादहेतुका ॥ ४० ॥

ग्लानिः किल शरीरस्य विनाशिनी । सा च ग्लानिरज्ञानादुत्पद्यते। तदज्ञानम् उन्मेषेणात्मस्वभावेन यदि नित्योज्झितं तदा सा कुतः, कारणरहिता भवेत्? अनेनैव कारणेन वलीपतिभावः शरीरदार्ढ्यं च योगिनाम् । ४० ॥

'ग्लानिः' मान्द्यादिजनिता हर्षहानिः, सा 'देहे' शरीरे 'विलुण्ठिका' धातुबलवर्णतेजःशक्त्यादीनां हठेन हर्त्री; 'तस्याश्चाज्ञानतः' प्रतिपादिततत्त्वावगमाभावात् 'सृतिः' सरणं प्रवृत्तिः; 'तत्' अज्ञानम् 'उन्मेषविलुप्तं चेत्' उन्मेषेण वक्ष्यमाणेन स्वभावालोकविकासेन, विलुप्तं विच्छिन्नं निर्मूलतां नीतं यदि, तदा असौ ग्लानिः 'अहेतुका' कारणरहिता 'कुतो भवेत्' न भवेदेव, निर्निमित्तस्य उत्पादाभावात्; अज्ञानं नाम जन्म परिणाम-विवृद्धि-क्षय-विनाशात्मकविकारविरहितनित्यनिर्विकारस्वस्वभावाप्रत्यभिज्ञानात जन्मा-

..........................म्ना सर्वक्लेशानामास्पदं ततश्च देहे या ग्लानिः अर्थाद्देहाभिमानिनः पुंसो यो हर्षक्षयोऽसौ विलुण्ठिका परसंविद्द्रविणापहारेण पारिमित्यदौर्गत्यप्रदा तस्याश्च ग्लानेरज्ञानतश्चिदानन्दघनस्वस्वरूपाप्रत्यभिज्ञानात्सृतिरुद्भवोऽवस्थितिश्च । तदज्ञानं प्रदर्शयिष्यमाणस्वरूपेणोन्मेषरूपेण चेद्विलुप्तं निकृत्तं तदासौ ग्लानिरज्ञानात्मनो हेतोरभावात् कुतः स्यान्न भवेदित्यर्थः । ग्लान्यभावे च देहेऽवश्यंभाविन्यो व्याध्यादिसन्तापावस्था अपि यथा यथा योगिनोऽपकृष्यन्ते तथा तथा हेम्न इवातिताप्यमानस्य कालिकापगमे स्वस्वरूपं देदीप्यत एव । एवं च देहावस्थितस्यापि सर्वदा ग्लान्यभाव एव परयोगिनो विभूतिः । यथोक्तं परमयोगिन्या मदालसया बालदारकान् प्रयोगीकुर्वत्या—

व्याधिनामुच्छेदाय उपपत्तिमाह—ग्लानीति । ग्लानिर्नाम मन्दस्वप्रयुक्ता हर्षक्षयः । सा च ग्लानिः शरीरे विद्यमानानां धातूनां बलस्य उत्तमवर्णस्य क्लेशः शक्तेः हठात् लुण्ठिका-विनाशिका भवति । इयं च अनाद्यज्ञाननिमित्ता तथा संसारस्य कारणञ्च ।

दिविकाराधिकरणे कलेवरादौ आत्माभिमानः, यस्मिश्च सति अप्रबुद्धो जनः तद्विकारान् जन्मादीन् आत्मनि आरोपयन् ग्लान्या विलुण्ठयते। यस्तु वक्ष्यमाणोन्मेषपरिशीलनाद् आविर्भूतसत्यात्मप्रत्ययः तस्य कुतः ग्लानिः,—इति मुख्यं फलं सहजानन्दहानिरूपाया ग्लानेरभावः; गौणस्तु वलीपलिताद्यभावः, यतः तदा कुतः सा ग्लानिः कारणरहिता भवेत्,—इति व्याख्याय पुनर्वृत्तिकृता व्याख्यातम्—

'अनेनैव कारणेन वलीपलिताभावः शरीरदार्ढ्यं च योगिनाम्' इति ॥ ४० ॥

त्वं कञ्चुके शीर्यमाणे निजेऽस्मि-
न्देहे हेये मूढतां मा व्रजेथाः।
शुभाशुभैः कर्मभिर्देहमेत-
न्मदादिभिः कञ्चुकस्ते निबद्धः ॥ (मा० पु० २५। १४)

इति मितसिद्ध्यभिलाषिणो योगिनः समावेशाभ्यासरसेन देहं विध्यतो वलीपलितादिव्याधिजयो भवतीत्यपि भङ्ग्यानेन प्रतिपादितम् ॥ ४० ॥

अथ उन्मेषस्य ग्लानिकारणभूताज्ञानविनाशहेतोः स्वरूपप्रतिपादनाय आह—

अथ योऽयमुन्मेषः स किंस्वरूपः किमुपायलभ्यश्चेत्याकांक्षायामाह—

**एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः।**
**उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥ ४१ ॥**

एकत्र विषये व्यापृतचित्तस्य यतो यस्मात् स्वभावात् झगित्यन्या चिन्तोत्पद्यते, स चिन्तायाः कारणम् उन्मेषो ज्ञातव्यः। स तु स्वयमेव योगिना लक्षणीयः, चिन्ताद्वयान्तर्व्यापकतयानुभूयमानः ॥ ४१ ॥

ईदृशमज्ञानं सर्वविधहानिकरम् उन्मेषद्वाराविनाशितं स्यात्तदा इयं ग्लानिकारणाभावात् कस्मादुद्भवेत् नहि निमित्तमन्तरा किमपि उद्भवति। अज्ञानं हि सर्वविधविकारशून्यस्वस्वभावाज्ञानात् योऽसौ जन्मादिविकाराश्रये शरीरादौ आत्माभिमानः। यस्मिन् विद्यमाने प्रबोधरहितो जनः जन्मादीन् विकारान् स्वात्मनि समारोप्य ग्लान्या सर्वविधं शुभं विनाशयति। यतो हि पुरुषधौरेयः उन्मेषपरिशीलनेन सर्वव्यापकं स्वात्मानमेव परोक्षीकरोति, तस्य न ग्लानिर्नवा तेजःप्रभृतीनां क्षतिर्भवति ॥ ४० ॥

'स तु' स पुनरुन्मेषः स्वस्वभावाभासविकासो 'विज्ञेयो' बोद्धव्यो लक्षणीयः। कोऽसौ?--'एकाचिन्ताप्रसक्तस्य' एकस्यां चिन्तायां दृश्यमानस्मर्यमाणतत्तद्वस्तूपरक्ते ज्ञाने प्रसक्तस्य, एकाग्रस्य चिन्तयितुः 'यतो' यस्मात् चिन्त्याभासानुपरक्तज्ञानात्मनः स्वस्वभावप्रकाशात् कारणभूतात् 'अपरस्याः' चिन्तायाः ग्राह्यालम्बिनो ज्ञानान्तरस्य 'उदयः' उत्पत्तिः 'स्यात्'। तं च योगी 'स्वयं' आत्मनैव 'उपलक्षयेत्'--परमार्थपरमेश्वरः सर्वतो विविक्तः परमकारणं परमात्मा अयमहमस्मि--इति प्रतिपद्येत। नहि तस्य शब्दादिवत् इदन्तया स्वरूपमुपलक्षयितुं शक्यं,--स्वसंवेदनसंविदितस्वभावत्वात्। तस्यैवंविधस्य नित्योदितस्यापि उपदेश्यं प्रति तदानीमेव अभिव्यज्यमानत्वात् उन्मेषशब्देन व्यपदेशः कृतः। यस्त्वेवं मन्यते--यस्यां चिन्तायां सत्याम् अपरचिन्तोदयः सा चिन्तैव चिन्तान्तरकारणं नान्तरालवर्ति वस्त्वन्तरं विद्यते, यच्चिन्ताद्वयस्वरूपव्यतिरेकेण उपलक्षणीयात्मकं द्वितीयचिन्ताकारणं स्यात्--इति, तं प्रति कारणभावेन कार्यभावेन च अभिमतस्य पूर्वापरीभूतस्य चिन्ताद्वयस्य एष संबन्धो न सिद्ध्यति, अनुसंधातारं तृतीयं विना। पूर्वं कारणम् अपरा च कार्यभूता चिन्ता,--इति योऽनुसंधत्ते, यश्चासौ अनपह्नवनीयोऽनुसंधाता सोऽनुसंधेयचिन्ताद्वयव्यापक-

'भावे त्यक्ते निरुद्धा चिन्नैव भावान्तरं व्रजेत्।
तदा तन्मध्यभावेन विकसत्यतिभावना॥' (वि० भै० ६२)

इति नीत्या एकस्यां कस्यांचिदालम्बनविशेषनिभृतविकारात्मिकायां चिन्तायां प्रसक्तस्य एकाग्रीभूतस्य योगिनो यत इति तदेकाग्रताप्रकर्षोल्लसत्संवित्स्फारतस्तदालम्बननिमीलनाज्झटिति ग्रस्तसमस्तचिन्तासन्ततेरग्नीषोमाविभेदात्मनः स्पन्दतत्त्वादपर एवोदयश्चिच्चमत्कारात्मान्य एव लोकोत्तर उल्लासः स्यात् स तच्चमत्कारोन्मेषकत्वादेवोन्मेषो विज्ञातव्योऽन्वेषणीयः, इत्थमेव योगिना ज्ञातुं शक्यः ततश्च स्वयमिति इदन्ताविषयत्वाभावादकृतकप्रयत्नात्मनावधानेनाहन्तयैवोपेत्यात्मनि लक्षयेत् असाधारणेन चमत्का-

उन्मेषस्य स्वरूपमाह— एकेति। स एव उन्मेषः, यो हि स्वरूपानुभातः विकासः, अनेन जायमानेन उन्मेषेण ग्लानिस्तिरस्कृता भवति। कस्य योगिनः इदृशस्य विकासो भवति—एकचित्ताप्रयुक्तस्य एकस्यां चिन्तायाम् अनुभूयमानः स्मर्यमाणः तत्तद्वस्तुरूपोपाधिना उपहिते ज्ञाने प्राप्तस्य एकाग्रचिन्ताशीलस्य यतः चिन्ताविषयावभासानुपरक्तस्य साक्षिस्वरूपप्रकाशेन हेतुभूतेन द्वितीयचिन्ताया अर्थात् ग्राह्यविषयकज्ञानान्तरस्य उत्पत्तिः स एव उन्मेषः स्यात्। ईदृशस्य उन्मेषस्य योगी स्वानुभवेनैव उपलक्षयति—अयं परमशिवः

विशुद्धचिन्मात्रस्वरूपः सर्वकारणमात्मैवोन्मेष इत्युक्तः । अत एव वृत्तिकृता व्याख्यातम्--'चिन्ताद्वयान्ते व्यापकता अनुभूयमानः' इत्यादिना ॥ ४१ ॥

रात्मना प्रत्यभिजानीयात् । 'यत एकस्यां विषयविचारादिचिन्तायां प्रसक्तस्य अपरस्याश्चिन्ताया झटित्युदयः स्यात् स चिन्ताद्वयव्यापक उन्मेषः, इत्यन्ये ॥ ४१ ॥

इदानीं तत्तत्साधनविशेषाभिनिविष्टानां योगिनां प्रायेण याः प्राप्यफलतया अभीष्टाः सिद्धयः ता एतदुपासायोगिनो विघ्नपरम्परा एव, इत्यन्मेषाभ्यासप्रभावं प्रतिपादयितुमाह--

इदानीं मितयोगिजनप्रयत्नसाध्यास्वपि तासु तासु सिद्धिषून्मेषपरिशीलनमात्रोदितासु परियोगिनो हेयत्वमेव मन्तव्यमित्यादिशति—

अनो बिन्दुरतो नादो रूपमस्मादतो रसः ।
प्रवर्तन्तेऽचिरेणैव क्षोभकत्वेन देहिनः ॥ ४२ ॥

अतः अस्माद् उन्मेषाद् अनुशील्यमानात् 'बिन्दुः' तेजोरूपः, 'नादः' प्रणवाख्यः शब्दः, 'रूपम्' अन्धकारे दर्शनम्, रसः अमृतास्वादो मुखे, एते क्षोभकत्वेन प्रवर्तन्ते अचिरेण कालेन ॥ ४२ ॥

'अतः' अस्मात् प्रतिपादितस्वरूपात् उन्मेषात्, जागराद्यवस्थागतसुखदुःखाद्यनुभवदशासु अविलुप्तेन अवधानेन, प्रतिक्षणविनश्वरविचित्रपरतन्त्रतुच्छरूपात् वेद्यवस्तुनो वैधर्म्येण भाव्यमानात् सर्वकारणभूतात् 'अचिरेण' अल्पेन कालेन, एतानि सिद्धचिह्नानि, क्षोभकत्वेन संतोष-स्मयाभिमानादिभिः चित्तव्युत्थापकत्वेन 'देहिनो' नितरामनुन्मूलितदेहाद्यहंप्रत्ययस्य योगिनः 'प्रवर्तन्ते' प्रादुर्भवन्ति । कानि तानि ?–'बिन्दुः' भ्रूमध्यादौ प्रदेशे

अत उन्मेषादुपलक्ष्यमाणादप्रलीयमानस्थूलसूक्ष्मादिदेहाहम्भावस्य योयिनोऽचिरेणैव भ्रूमध्यादौ तारकाप्रकाशरूपो विन्दुरशेषवेद्यसामान्य-

सर्वेषामीश्वरः सर्वेभ्यो भिन्नः, परमकारणम् अयमहमेव इत्येदंरूपेण जानाति, नहि तस्य अयं घट इतिवत् इदन्तया उपलक्ष्यते । तथा न तमुपलक्षयितुं शक्यते तस्य स्वानुभवविदितस्वभावत्वात् ॥ ४१ ॥

सम्प्रति उन्मेषसाक्षात्काराय प्रवृत्तस्य यस्य योगिजनस्य मितप्रयत्नसाध्यतत्तल्लब्धसिद्धयः प्रतिबन्धकैवेति दर्शयति—अत इति । अविरतमुन्मेषानुशीलने प्रवृत्तिमतः

ध्यानाभ्यासप्रकर्षप्रवर्धमानोत्तरोत्तरप्रसादस्तेजोविशेषो, यो बिन्दुभेदाभ्यासात् धरातत्त्वध्यायिनामभिव्यज्यते। तथा–'नादो' वेगवन्नद्योघनिर्घोषघनोपक्रमः क्रमसूक्ष्मीभावाभिव्यज्यमानमधुमत्तमधुकरध्वनितानुकारी स्वोच्चरितो ध्वनिविशेषो, यं व्योमतत्त्वाभ्यासिनः शृण्वन्ति। तथा–'रूपं' सन्तमसाद्यावरणेऽपि सति तत्तद्दृश्यवस्त्वाकारदर्शनं, यत् तेजस्तत्त्वन्यक्षनिक्षिप्तमतयो निरीक्षन्ते। तथा–'रसो' रसवद्वस्तुविरहेऽपि अमृतास्वादो मुखे, लोलाग्रलम्बिकादिधारणानिरतैः अप्तत्त्वध्यायिभिर्य उपलभ्यते; पवनतत्त्वध्यायिनां स्पर्शविशेषोऽपि योऽभिव्यज्यते सोऽपि अस्मात् प्रवतत,–इति अत्र द्रष्टव्यम्। इदमत्र तात्पर्यम्–उन्मेषाभ्यासयोगिना तत्तद्धारणाद्यभ्यासचिरलभ्यास्वपि अचिरप्राप्यासु एतासु उपलब्धिषु संतोषिणा न भाव्यम्–निरुत्तरपदारोहप्रत्यूहभूतत्वादासाम्। एताश्चेतरयोगिनां क्रमभाविन्योऽपि उन्मेषाभ्यासयोगिनां तदभिसंधिविरहात् अक्रमेणापि प्रवर्तन्ते इति तथैव निर्दिष्टाः। व्याख्यातमेतत्––

'अतोऽस्मात् उन्मेषात्'

इत्यादिना वृत्तौ ॥ ४२ ॥

प्रकाशात्मा, नादः सकलवाचकाविभेदिशब्दनरूपोऽनाहतध्वनिरूपो, रूपमन्धकारेऽपि प्रकाशनं तेजः, रसश्च रसनाग्रे लोकोत्तर आस्वादः क्षोभकत्वेन स्पन्दतत्त्वसमासादनविघ्नभूततावत्सन्तोषप्रदत्वेन वर्तन्ते। यदाहुः—

'ते समाधावुपसर्गा व्युत्थाने सिद्धयः।' (पात० सू० ३। ३७)

इति। एवमुन्मेषनिभालनोद्युक्तस्यापि देहात्ममानिनो योगिनो बिन्दुनादादयः क्षोभका भवन्तीत्युक्तम् ॥ ४२ ॥

परयोगिनः स्वल्पसमय एव सिद्धयः प्रादुर्भवन्ति। काः ताः सिद्धयः? बिन्दु—तारकाग्रे विलक्षणतैजस्विता यया अशेषज्ञेयसामान्यानां प्रकाशो भवति। नादः—मधुकरध्वनितानुकरणशीलः चोच्चरितध्वनिविशेषः। अमुं ध्वनिं व्योमतत्त्वाभ्यासशीलाः शृण्वन्ति। रूपम्— तत्तज्ज्ञेयवस्तूनामाकारदर्शनम्। रसः—रसयुक्तवस्त्वभावेऽपि मुखेऽमृतवदास्वादः। परन्तु इमाः सिद्धयः परयोगिनः कृते प्रक्षोभप्रदाय एव भवन्ति। अत एव एताः सिद्धयः सदा हेयाः ॥ ४२ ॥

एवम् उन्मेषोपदेशेन आत्मनो देहादिवेद्यव्यतिरिक्तस्वरूपतां प्राक् बहुभिः प्रकारैः प्रतिपादितां संग्रहेण प्रतिपाद्य, इदानीं तथैव तस्य सकललोकस्वानुभवसिद्धं व्यवहारं प्रदर्शनीकृत्य विश्वरूपतां संक्षेपतः प्रतिपादयन् समस्तप्रकरणार्थतात्पर्यमाह--

इदानीमत्रोन्मेषात्मनि स्वभावे देहप्रमातृतां निमज्जयति, तदाकाराम पि परप्रमातृतां लभत इत्याह—

**दिदृक्षयेव सर्वार्थान् यदा व्याप्यावतिष्ठते ।**
**तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते ॥ ४३ ॥**

दिदृक्षा द्रष्टुमिच्छा, तदवस्थास्थ इव सर्वान् भावान् यदा व्याप्यावतिष्ठते, तदा किं बहुना उक्तेन, स्वयमेव तत्त्वस्वभावन् अवभोत्स्यते ज्ञास्यति ॥ ४३ ॥

'यदा' यस्मिन् काले, साधको 'दिदृक्षयेव' द्रष्टुमिच्छया यथा 'सर्वार्थान्' अखिलान् प्रमेयपदवीजुषो भावान् 'व्याप्य' स्वसंवित्प्रकाशेन आच्छाद्य, तदन्तर्लीनान् कृत्वा 'अवतिष्ठते' नानात्वदर्शनभ्रान्तिनिवृत्तेरेकत्र तत्त्वे विश्राम्यति; 'तदा' तस्यां दशायां यत्फलमनुभूयते तत्र 'बहुना' भूयसा 'उक्तेन' फलाभिधानेन 'किं' ? तत्प्रतिपादनेच्छया ग्रन्थसहस्राण्यपि उक्तानि निरर्थकानि भवन्ति, तस्य वचनगोचरातीतत्वात्, अत आह 'स्वयं तदवभोत्स्यते' इति तत् तादृशं फलं, स्वयमात्मनैव, व्यतिरिक्तसाधननिरपेक्षेण प्रतिपत्स्यते अभियुक्तः, स्वसंवेद्यत्वात् तस्य । इदमत्र तात्पर्यम्,–योगिना सर्वभावानां स्वस्वभावाव्यतिरेकजिज्ञासुना स्वानुभूता दिदृक्षावस्था निदर्शनीकार्या, तथा हि–द्रष्टुमभीष्टा भावाः स्वस्वभावाभेदेन व्यवतिष्ठन्ते, भाव-

यथा पश्यन्तीरूपाविकल्पकदिदृक्षावसरे दिदृक्षितोऽर्थोऽन्तरभेदेन स्फुरति तथैव स्वच्छन्दाद्यध्वप्रक्रियोक्तान् धरादिशिवान्तान्तर्भाविनोऽशेषानर्थान् व्याप्येति सर्वमहमिति सदाशिववत् स्वविकल्पानुसन्धानपूर्वकमविकल्पान्तमभेदविमर्शान्तःक्रोडीकारेणाऽऽच्छाद्य यदावतिष्ठते अस्याः समापत्तेर्न

इदान्तीन्तनम् उन्मेषं साक्षात्कुर्वतो योगिनः विश्वरूपतांप्रतिपादयन् समस्तप्रकरणार्थतात्पर्यं दर्शयति—समेति । यस्मिन् समये साधकजनो निखिलार्थान् अर्थात् प्रमेयरूपान् भावपदार्थान् इष्टमिच्छयाये न प्रकारेण स्वसंवित्प्रकाशेन तदन्तर्हितां संपाद्य अवतिष्ठते

भेदहेतोरिदन्ताप्रत्ययस्य अनुन्मेषात्, तदा यथा दिदृक्षावस्थायां क्षेत्रज्ञस्वभावादभेदः तद्दिदृक्षितानां भावानां, तथा परमात्मस्वभावात् अखिलजगद्भावानामभेद एव,–इति पूर्वोपदिष्टव्यतिरिक्तात्मस्वरूपोपलब्धिपरामर्शाभ्यासात् उन्मिषितदिदृक्षाक्षणोपलक्षणक्षमविज्ञानचक्षुषं योगिनं प्रत्येव अयमुपदेशः; मायाशक्तिजनितेन हि विकल्पतिमिरेण तिरस्कृतसम्यग्ज्ञानदृश एकमेव निर्विभागचिन्मात्रस्वरूपमात्मतत्त्वं प्रमातृभेदेन प्रमेयभेदेन च नानारूपं पश्यन्तो दिदृक्षितदृश्यमानदृष्टाद्यवस्थाविभागं भावानां परिकल्प्य, दिदृक्षितानामपि तेषां जीवस्वभावादभेदं वस्तुसन्तमेव परामृष्टुमशक्ताः, कुतो जगद्भावानां परमात्मस्वभावानाम् अभेदं प्रतिपद्येरन्, तदा योगिनैव दृष्टान्तीकृतस्वदिदृक्षाक्षणपरामर्शदिशा स्वस्वभावाभेदमखिलभुवनभावाभासानां भावयता भेदध्वान्तनिर्भेदभास्करेण भवितव्यम्–। व्याख्यातमेतत्––'दिदृक्षा द्रष्टुमिच्छा तदवस्थास्थ इव' इत्यादिना वृत्तौ ॥ ४३ ॥

विचलति, तावदशेषवेद्यैकीकारेणोन्मिषत्तावद्वेद्यग्रासीकारिमहाप्रमातृतासमावेशचमत्काररूपं यत्फलं तत्स्वयमेवावभोत्स्यते स्वसंविदेवानुभविष्यति, किमत्र बहुना प्रतिपादितेन ॥ ४३ ॥

एनमेव उपदेशं द्रढयितुमाह––

तस्योपलब्धिः सततम् इति प्रतिज्ञाय तदनन्तरमुपपादितमुपायजातं परिशीलयतः सततं स्पन्दतत्त्वसमाविष्टत्वं सुप्रबुद्धस्य भवतीति तदनन्तप्रमेयसंभिन्नत्वादुपदेश्यहृदये स्मारयन्ननुप्रवेशयुक्त्युपसंहारभङ्ग्याह—

**प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोच्य गोचरम् ।**
**एकत्रारोपयेत् सर्वं ततोऽन्येन न पीड्यते ॥ ४४ ॥**

प्रबुद्धोऽसंकुचितशक्तिः सर्वकालं तिष्ठेत्, ज्ञानेनालोच्य गोचरम्-ज्ञेयं परिच्छिद्य । एवमेकत्र तत्त्वसद्भावे विद्यात्मके आरोपयेत् सर्वम् । ततोऽन्येन वक्ष्यमाणेन कलासमूहेन न पीड्यते ॥ ४४ ॥

भेददर्शनभ्रान्तिनिरासेन एकस्मिन् तत्त्वे विश्रामं करोति । तस्यामवस्थायां तेन यत्फलमनुभूयते तत्र किमु बहुना उक्तेन । तत्फलनिरूपणेच्छया प्रवृत्तानि ग्रन्थसहस्रपरिमितानि वाक्यान्यपि निरर्थकानि भवन्ति, वाचामगोचरत्वादिति तस्य तादृशं फलन्तु स्वयमेव आत्मनैव अनुभूयते ॥ ४३ ॥

'सर्वदा' सर्वासु अनुभवदशासु 'प्रबुद्धस्तिष्ठेत्' प्रतिपादितोपदेशाभ्यासपरत्वात् अनिमीलितसम्यग्ज्ञानदृष्टिः जाग्रदेव आसीत । कथं ?--'ज्ञानेन' संवेदनेन 'गोचरं' विषयम् 'आलोच्य' परिच्छेद्य, तथारूपतया निश्चित्य 'एकत्र' ज्ञातरि स्वात्मनि 'सर्वं' परिच्छेद्यम् 'आरोपयेत्' अर्पयेत्, तदभिन्नतया प्रतिपद्येत इत्यर्थः । 'ततश्च' सर्वभावानामेकप्रमातृस्वरूपाभेदप्रतिपत्तिरूपात् आरोपणात् 'अन्येन' व्यतिरिक्ततया अवभासमानेन प्रमेयेण, वक्ष्यमाणेन कलाद्यात्मकेन भावजातेन 'न पीडयते' विनश्वरभावाहंभावप्रतिपत्त्यादिना पाशेन संसारचक्रे निबध्य न कदर्थ्यते । इदमत्र तात्पर्यम्,--यं यमर्थं रूपादिकं चक्षुरादिज्ञानेन प्रमाता आलोचयति निश्चिनोति, स स निश्चयावस्थायां प्रमातृरूपात् अभिन्न एव भवति; निश्चितत्वं हि नाम वस्तुनः प्रकाशमानत्वं, तच्च प्रकाशमानत्वादभिन्नमेव, नान्यद्भवितुमर्हति, प्रकाशव्यतिरिक्तरूपत्वे तस्य प्रकाशमानतानुपपत्तेः । एवं निश्चयावस्थायां प्रकाशमात्रस्वरूपप्रमात्रभेदः सर्वभावानां स्वभावसिद्धः, तत एवंविधो ग्राह्यग्रहीतृग्रहणसंबन्धः स्थितोऽपि अपरामृश्यमानो नानात्वमोहजालेन बध्नाति सर्वजन्तून्, अतः सर्वावस्थासु अविरतपरामर्शो भवेत्, येनैकप्रमातृपरमार्थत्वं जगद्भावानां प्रतिपन्नः सन् पुनः संसारी न स्यात् । तदेवं 'प्रबद्धः सर्वदा तिष्ठेत्' इत्युक्तम् ।

सर्वदा जागरास्वप्नसुषुप्तसंविदादिमध्यान्तपदेषु प्रबुद्धस्तिष्ठेत् उन्मीलितस्पन्दतत्त्वावष्टम्भदिव्यदृष्टिः सुप्रबुद्धतामेव भजेत । कथं ज्ञानेन बहिर्मुखेनावभासेन सर्वं गोचरं नीलसुखादिरूपं विषयमालोक्य—

तस्माच्छब्दार्थचिन्तासु न सावस्था न या शिवः ( २ । ४ )

इत्युपपादितदृशा विमृश्य एकत्र स्रष्टरि शंकरात्मनि स्वभावे सर्वमारोपयेत् निमीलनोन्मीलनदशयोस्तदभेदेन जानीयात् पूर्वापरकोटचवष्टम्भदार्ढ्यान्मध्यभूमिमपि चिद्रसाश्यानतारूपतयैव पश्येदित्यर्थः । एवं च न केनचिदन्येन व्यतिरिक्तेन वस्तुना बाध्यते सर्वस्मिन् स्वात्मनः स्वीकृतत्वात् । यथोक्तं श्रीप्रत्यभिज्ञाकारेण—

पूर्वोक्तमेव द्रढयितुमाह—प्रबुद्धेति । प्रबुद्धो योगी ज्ञानेन संवेदनात्मकेन विषयजातं तदीयस्वरूपं निश्चित्य सर्वासु अनुभवावस्थासु एकस्मिन् संवित्प्रकाशे ज्ञातृरूपे स्वात्मनि समर्पयेत । अखिलप्रमेयजातं स्वाभिन्नतया ज्ञायेत । समग्रभावानां प्रमातृस्वरूपाभिन्नप्रतिपत्तिरूपारोपात् सांसारिकभावसमूहेन स नैव पीडयते—परिवर्तनशीलशरीरादिभावेषु

'प्रबुद्धोऽसंकुचितशक्तिः'
इत्यादिना व्याख्यातमेतत् वृत्तौ ॥ ४४ ॥

योऽविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः ।
स्वात्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भयम् ॥
( उ० स्तो० १३।१६ )

इति ॥ ४४ ॥

**इदानीमेवं स्वयं संव्यवस्थितः स्वात्मै परमेश्वरः एकः पदार्थः सन् निजयैव मायाशक्त्या प्रतिपशुभेदेन आत्मानमवभासयन् क्रीडति——इति तत्त्वतो द्वितीयपदार्थाभावमेव समर्थयमानः पशस्वरूपप्रतिपादनद्वारेण शक्तिप्रसरक्रीडामेव अस्य प्रतिपादयितुमाह——**

'ततोऽन्येन न पीड्यते' इति यदुक्तं तत्र कोऽसावन्यः पीडकः कश्च पीड्यः, यतः शिवात्मकमेव विश्वमुक्तमित्याशङ्क्य पाशानां पशोश्च स्वरूपं निर्णेतुमाह—

**शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम् ।**
**कलाविलुप्तविभवो गतः सन् स पशुः स्मृतः ॥ ४५ ॥**

शब्दराशिरकारादिक्षकारान्तः तत्समुद्भूतस्य कादिवर्गात्मकस्य ब्राह्म्यादिशक्तिसमूहस्य; भोग्यतां गतः पुरुषो, ब्राह्म्यादीनां कलाभिः ककाराद्यक्षरैर्विलुप्तविभवः स्वस्वभावात् प्रच्यावितः पशुरुच्यते ॥४५॥

**'स' इयता प्रबन्धेन प्रतिपादयितव्यस्वरूप आत्मैव ईश्वरो, वक्ष्यमाणेन हेतुना पराधीन सर्ववृत्तित्वेन अनवभासितात्मा 'पशुः' तिर्यक्प्रायः**

इह योऽयं प्रकाशात्मा स्वस्वभावः शांकर उक्तः, असौ—
व्यवस्थितः करोत्यैष विश्वकारणमीश्वरः ।
सृष्टिं स्थितिं च संहारे तिरोधानमनुग्रहम् ॥ ( स्व० । )

इति श्रीस्वच्छन्दशास्त्रदृष्ट्या निजशक्त्याश्लिष्टः सदा पञ्चविधकृत्यकारी स्वतन्त्रः स्पन्दललितेश्वरादिशब्दैरागमेषूद्घोष्यते । स्वातन्त्र्यशक्तिरेवास्य

अहंभावादिरूपपाशेन संसारचक्रे प्रक्षिप्य न कदर्थीभवति । अभेददर्शिनः योगिनो न कस्मादपि भयं भवति । यतो हि स्वातिरिक्तं वस्तुतत्त्वं पश्यति तस्यैव भयं भवति । द्वितीयाद्वै भयं भवतीति श्रुतेः ॥ ४४ ॥

**'स्मृतः' अनादित्वात् संसारक्रीडाव्यवहारस्य सदा स्मर्यमाणत्वेन स्थितः। कीदृशः सन् ?--'शब्दराशिसमुत्थस्य शक्तिवर्गस्य कलाविलुप्तविभवो**

सनातनी पूर्णाहन्ता रूपा परा मत्योदरी महासत्ता स्फुरत्तोर्मिः सारं हृदयं भैरवी देवी शिखा इत्यादिभिरसंख्यैः प्रकारैस्तत्र तत्र निरुच्यते। पूर्णाहन्तैव चास्यानुत्तरानाहतशक्तिसंपुटीकारस्वीकृतादिक्षान्तवर्णभट्टारिका तत एव स्वीकृतानन्तवाच्यवाकरूपषडध्वस्फारमयाशेषशक्तिचक्रक्रोडीकारान्तःकृत - निःशेषसर्गप्रलयादिपरम्पराप्यक्रमविमर्शरूपैव नित्योदितानुच्चार्यमहामन्त्रमयी सर्वजीवितभूता परा वाक्। एषैव भगवत इत्याद्विश्ववैचित्र्यचलत्तामिव स्वात्मनि प्रथयन्ती स्पन्दते इत्यर्थानुगमात् स्पन्द इति इहोच्यते। एवं चेयद्विश्वशक्तिखचितपराशक्तिसुन्दरस्य स्वात्मनः स्वरूपगोपनक्रीडया स्वात्मभित्तावेवांशांशिकया निर्भासन भगवान् यावच्चिकीर्षति तावदेकैवाभिन्नाप्यसौ तदीया विमर्शशक्तिरिच्छात्वं प्रतिपद्य ज्ञानक्रियारूपतया स्थित्वा शिवशक्तिपरामर्शात्मकबीजयोनिभेदेन द्विधा भूत्वा वर्गभेदेन तत्कलाभेदेन च नवधा पञ्चाशद्धा च स्फुरन्ती तद्विमर्शसारैरघोरघोरघोरतरैः संवित्तिदेवतात्मभिः रूपैः प्रथमाना भगवतः पञ्चविधकृत्यकारितां निर्वहति। यथोक्तं श्रीमालिनीविजयोत्तरे—

या सा शक्तिर्जगधातुः कथिता समवायिनी।
इच्छात्वं तस्य सा देवी सिसृक्षोः प्रतिपद्यते ॥ ( ३ । ५ )
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ॥
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।
एवं भवत्विदं सर्वमिति कार्योन्मुखी यदा ॥
ज्ञाता तदैव तद्वस्तु कुर्वत्यत्र क्रियोच्यते।
एवमेषा द्विरूपापि पुनर्भेदैरनन्तताम् ॥
अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी।
तत्र तावत्समापन्ना मातृभावं विभिद्यते ॥

**पूर्वस्मिन्श्लोके 'ततो नैव पीडयते, तत्र अन्य पीडाकर्ता कः कस्य पीडां प्राप्नातीति शङ्कामुत्पद्यते। यतो हि सर्वं विश्वं शिवस्वरूपमेव विद्यते। इमामाशङ्कां परिहर्तुं पाशानां पशोश्च लक्षणं निर्णेतुमाह—शब्देति। सः–एतावत्पर्यन्तग्रन्थराशिना प्रतिपिपादयिषित ईश्वरो यद्यपि स्वात्मैव वर्तते तथापि पराधीन समस्तवृत्तितया अनवगतस्वस्वरूपपशुः**

भोग्यतां गतः सन्' पारमेश्वर्याः शक्तेः वक्ष्यमाणवाग्रूपप्रसराभिप्रायेण आदि-

द्विधा च नवधा चैव पञ्चाशद्धा च मालिनी ।
बीजयोन्यात्मकाद्भेदाद्द्विधा बीजं स्वरा मताः॥
कादयश्च स्मृता योनिर्नवधा वर्गभेदतः ।
पृथग्वर्णविभेदेन शतार्धकिरणोज्ज्वला ॥
बीजमत्र शिवः शक्तिर्योनिरित्यभिधीयते ।
वर्गाष्टकमिति ज्ञेयमघोराद्यमनुक्रमात् ॥
तदेव शक्तिभेदेन माहेश्वर्यादि चाष्टकम् ।
शतार्धभेदभिन्ना च तत्संख्यानां वरानने ॥
रुद्राणां वाचकत्वेन कल्पिता परमेष्ठिना ।
तद्वदेव च शक्तीनां तत्संख्यानामनुक्रमात् ॥

इत्यादि । तथा—

विषयेष्वेव संलीनानधोऽधः पातयन्त्यणून् ।
रुद्राणून्याः समालिङ्ग्य घोरतर्योऽपरास्तुताः ॥
मिश्रकर्मफलासक्ति पूर्ववज्जनयन्ति याः ।
मुक्तिमार्गनिरोधिन्यस्ताः स्युर्घोराः परापराः ॥
पूर्ववज्जन्तुजातस्य शिवधामफलप्रदाः ।
पराः प्रकथितास्तज्ज्ञैरघोराः शिवशक्तयः ॥ ( ३ । ३३ )

इति । एवं शब्दराशेः समुत्थितो वर्गनवकरूपो यो ब्राह्म्यादिदेवतावर्गः शिवसहितस्तस्य भोग्यतां पाश्यतां गतः सन् स एव शंकरात्मा स्वभावः पशुः स्मृतः आगमेषु तथोक्तः । ननु कथं भोक्ता महेश्वर इमामवस्थां प्राप्तः, इत्याशङ्काशान्त्यै विशेषणद्वारेण हेतुमाह कलाविलुप्तविभव इति । कलयति बहिः क्षिपति पारिमित्येन परिच्छिनत्तीति कला मायाशक्तिः, तया विलुप्त-विभवः स्वमायया गूहितैश्वर्यः स्थित इत्यर्थः । अथ च कलया किंचित्कर्तृत्वो-पोद्बलनात्मना शक्त्या तदुपलक्षितेन कलाविद्याकालनियतिरागात्मना कञ्चुकेन विलुप्तविभवः स्थगितपूर्णकर्तृत्वादिधर्मः । भवत्वेवं, भोग्यतां तु कथमसौ शक्तिवर्गस्य गतः इत्यत्रैतदेवोत्तरम् । कलाभिरकारादिवर्गाधिष्ठा-

तिर्यग्प्रायः स्मृतः । अनादिकालतः सांसारिकक्रीडात्मकव्यवहारस्य निरन्तरं स्मरण-कर्तृत्वेन अवस्थितः । अत एव येन स्वस्वरूपं न परिज्ञातमसौ पशुत्वेन त्रिकशास्त्रेऽस्मिन् । व्यवह्रियते । इत्थम् अनवगतस्वस्वरूपपुरुषः पशुः । स च शब्दसमूह समुत्पन्नस्य शक्ति-

क्षान्तवर्णसमुदायात्मिक[ा या] स्तद्विपरीतं ... ... ... ( १ )
... ... ... ... ... ... ... ... ...

यिकाभिर्ब्राह्म्यादिभिस्तद्वर्णभट्टारकाधिष्ठातृभूताभिश्च श्रीमालिनीविजयोक्त-देवतारूपाभि: कलाभिरकारादिवर्णैर्विलुप्तविभव: संकुचितोऽस्मि,अपूर्णोऽस्मि-करवाणि किंचिदिदमुपाददे, इदं जहामि इत्यादिविचित्रविकल्पकाविकल्पक-प्रतिपत्तिकदम्बकान्तरनुप्रविष्टस्थूलसूक्ष्मशब्दानुवेधकदर्थितो हर्षशोकादिरूपतां नेनीयमान इव क्षणमपि स्वरूपस्थितिं न लभते यत:, अतोऽसावुक्तरूप: शक्तिवर्गेण भुज्यमान: पशुरुक्त:। कलया अख्यात्यात्मनांशेन विलुप्तविभव: संकुचित इव, न तु तत्त्वत: शिवात्मा स्वभावोऽस्य क्वापि गत:, तदभावे हि स एव न स्फुरेत्। तथावभासमानैरेव कलाभि: संकुचितै: शब्दैर्ज्ञानैश्च विलुप्तविभवस्तथारूपमात्मानं न विभ्रष्टुं क्षम इत्यर्थ: ॥ ४५ ॥

अधुना पशु: संकुचितत्वच्छक्तिबाध्य: पाश्यश्चेत्येतद्विभजति—

**परामृतरसापायस्तस्य य: प्रत्ययोद्भव:।**

**तेनास्वतन्त्रतामेति स च तन्मात्रगोचर: ॥ ४६ ॥**

परामृतरसात् स्वरूपात् अपाय: प्रच्युति:, तस्य य: प्रत्ययोद्भवो विषयदर्शने स्मरणोदयो यत:, तेन पुरुषोऽस्वतन्त्रताम् असर्वगत्वं च प्राप्नोति, स च प्रत्यय: तन्मात्रगोचरो रूपाद्यभिलाषात्मक: ॥ ४६ ॥

... ... ... ... ... ... ... ... ( १ )

**'अस्वतन्त्रो' व्यतिरिक्तसाधनसामग्र्यपेक्षसकलसमीहितार्थ: पुमान् तद्भावमापद्यते, जागरस्वप्नसुषुप्तावस्थोपमेयसकल-विज्ञानाकल-प्रलयकेवलाख्यभेद-**

तस्य पशोर्य: प्रत्ययानां लौकिकशास्त्रीयविकल्पानां तदधिवासितानां भिन्नार्थज्ञानानां विकल्पानामप्युद्भव: विनाशाघ्रात उत्पाद: स परस्यामृतर-

वर्गस्य भोग्यस्वरूपतां प्राप्त: सन् अकारादिक्षपर्यन्त: वर्णसमुदायरूपाय शक्त: भोग्यस्वरूपताम् आप्नोति। ककाराद्यक्षरै: स्वकीयं वैभवं विस्मृत्य पुरुष: पशु उच्यते। अज्ञानावृत्वादिति तात्पर्यम् ॥ ४५ ॥

त्रययोगी सहजादिमलत्रयावृतः पशुर्भवति इत्यर्थः। यतस्तस्य प्रत्ययोद्भव एव 'परामृतरसापायः' परम् अनुत्तरम् अमृतमविनाशि अद्वयचिन्मयं शिवाख्यं स्वरूपं तस्य 'रसः' तथाप्रत्यवमर्शात्मक आस्वादः, तस्मात् 'अपायः' पृथग्भावोऽन्यथावृत्तिः इदमित्यादिविकल्परूपः। इदमत्र वाक्ये गर्भीकृतम्–एकस्यैव परस्य तत्त्वस्य स्वेच्छापरिकल्पितानुग्राह्यानुग्राहकभावविविक्तात्मनोऽनुग्राह्योपायार्थं, तथैव स्वेच्छया परिकल्पितशिवशक्तिसदाशिवेश्वरविद्यात्मकविभागाभासस्य प्रक्रियाशास्त्रेषु यत् पञ्चरूपत्वं व्यवस्थितं, तत् परामृतशब्देन रसशब्देन च संग्रहेण उक्तम्। तथा च–अहमित्येव अत्यन्तभेदसंस्पर्शशून्यपरमशिवाख्यस्वभाववाचकत्वेन परामृतशब्दः, तत्परामर्शरूपशक्तितत्त्ववाचकत्वेन च रसशब्दः अत्यन्तप्रशान्तनिष्परामर्शशून्यप्रायशिवतत्त्ववादिमतनिरासार्थं यः प्रयुक्तः स पूर्वं व्याख्यात एव; तदेवं तत्त्वद्वयं शिवशक्त्याख्यं, यदभिन्नमपि स्वरूपप्रतिपादनान्यथानुपपत्त्या विभज्य तत्त्वविद्भिः प्रकाश्यते। तथा च तत्त्वगर्भस्तोत्रे गुरुभिः सततमविलुप्तोपलब्धृत्वलक्षणस्वधर्मरूपायाः शक्तेः प्राधान्यप्रतिपादनाभिप्रायेण शिवतत्त्वमेवमस्तूयत।

'यस्या निरुपधिज्योतीरूपायाः शिवसंज्ञया।
व्यपदेशः परां तां त्वामम्बां नित्यमुपास्महे॥'

इति। शक्तितत्त्वं च विदितपरमार्थैः स्वरूपप्रत्यवमर्शसामान्यस्पन्दादिसंज्ञाभिः व्यवह्रियमाणं तत्पर्यायभूतोन्मेषादिपदाभिधेयतया प्रतिपादितम्। यदुक्तम्—

'किंचिदुच्छूनतापत्तेरुन्मेषादिपदाभिधाः ।
प्रवर्तन्ते त्वयि शिवे शक्तिता ते यदाम्बिके॥'

इति। न च यदा शब्दश्रुतिभ्रमात् कदाचिदेषा शक्त्यवस्था भवति, कदाचिन्न भवति इति मन्तव्यम्; यतः स्वभावसंवेदनात्मको नित्यः सामान्यस्पन्दरूप एव धर्मः किंचिदुच्छूनता इत्युक्तम्। ततः परं सदाशिवेश्वरविद्याख्यं तत्त्वत्रयमपि परामृतशब्दवाच्यमेव; यतः परमेश्वरस्य परमार्थतः एकत्वेऽपि

सस्य चिद्घनस्यानन्दप्रसरस्यापायो निमञ्जनम्। उदितेषु भिन्नार्थेषु प्रत्ययेषु चिद्भूमिः स्थिताप्यपरामृश्यमानत्वादस्थितेव लक्ष्यते, तत एवमुक्तम्। तेन च प्रत्ययोद्भवेनायमस्वतन्त्रतामेति तद्वशः सम्पद्यते। यदुक्तं श्रीशिवसूत्रेषु

सम्प्रति पशुभावमापन्नो जीवात्मा परिच्छिन्नज्ञानशक्त्या बद्धो भवति तथा पाशभोग्यस्य जायते, इत्येतद्विभागशः विवृणोति—परेति। अनवगतस्वस्वरूपस्य पशुरूपतां

अत्यद्भुतस्वैश्वर्यवीर्येण विशुद्धचिन्मात्ररूपतया विश्वात्मकत्वेन च अन्तर्बही-रूपं द्वैविध्यं यदवस्थितम्, तत्र विश्वात्मकस्य बाह्यस्य रूपस्य ज्ञेयकार्यभावेन लब्धस्वरूपत्वात् एकापि तच्छक्तिः ज्ञानक्रियारूपतया द्वित्वेन उपचर्यते। तच्च ज्ञानक्रियात्मकत्वं यत्र बहिरगृहीतोन्मेषमन्तः साम्येनैवावतिष्ठते त्रैगुण्यमिव अव्यक्तावस्थायां, सा परमेश्वरभोगात्मकज्ञानक्रियारूपत्वेऽपि अन्तर्मुखत्वात् निमेषात्मिका सदाशिवदशा। यत्र पुनः शक्तेः क्रियाप्राधान्येन बहिर्गृहीतोन्मेषायाः पराहंभावविश्रान्तिः सा ईश्वरदशा। यस्यां पुनर्ज्ञानशक्त्युद्रेकेण अस्या बहिर्मुखत्वं बाह्याभ्यन्तररूपसामानाधिकरण्यपर्यवसायित्वात् स्वरूपविश्रान्तिनिष्ठत्वमेव सा विद्यादशा इति। तिसृष्वपि एतासु दशासु भेदप्रतिपत्तिमूलत्वात् लब्धात्मिकापि मायाशक्तिः परस्याः संविदः सर्वापूरकपरिपूर्णाहंकारलक्षणे स्वभावे एव विश्रान्तत्वात् प्रत्यस्तमिता सती परमानन्दनिर्भरशिवरूपं तिरोधातुं नालम्, इति पदत्रयमेतत्परामृतमेव। यदुक्तं तत्त्वगर्भ एव—

'ज्ञानक्रियास्वरूपेण प्रवृत्तायास्तु ते शिवे।
सदाशिवत्वं जगदुर्भोगाह्वं तत्त्ववेदिनः॥
गुणीभूतज्ञशक्तिस्त्वं व्यक्तीभूतक्रियात्मिका।
यदा तदैश्वरं तत्त्वं व्यक्ततामेति वृत्तिमत्॥
प्रवृत्तावुन्मुखीभूता भवेस्त्वं परमे यदा।
ज्ञानशक्तिस्तदोदारा विद्या त्वं परिगीयसे॥'

इति। तथा ईश्वरप्रत्यभिज्ञायाम्—

'एवमन्तर्बहिर्वृत्तिः क्रिया कालक्रमानुगा।
मातुरेव तदन्योन्यावियुक्ते ज्ञानकर्मणी॥
किं त्वान्तरदशोद्रेकात्सादाख्यं तत्त्वमादितः।
बहिर्भावपरत्वे तु परतः पारमेश्वरम्॥

'ज्ञानं बन्धः' ( १ । २ ) इति। श्रीमद्व्यासमुनिनापि 'मातापितृमयो बाल्ये' इति। श्रीमदालसयापि—

प्राप्तस्य पुरुषविशेषस्य यो हि लौकिकशास्त्रीयविभिन्नपदार्थज्ञानात्मकविकल्पानामपि उद्भवो जायते। स उद्भव एव परामृतरसस्य चिद्घनस्य सर्वोपाधिविनिर्मुक्तः सर्वव्यापकशिवात्मात्मकानन्दप्रसरणस्य तिरोभावः। भिन्नार्थेषु जातेषु प्रत्ययेषु स्थितापि चिद्रूपता परामृष्टा नैव भवति। अत एव अस्थित इव भाति, उक्तप्रत्ययोद्भवेन अयं जीवः न

ईश्वरो बहिरुन्मेषो निमेषोऽन्तः सदाशिवः ।
सामानाधिकरण्यं च सद्विद्याहमिदंधियोः ॥
इदंभावोपपन्नानां वेद्यभूमिमुपेयुषाम् ।
भावानां बोधसारत्वाद्यथावस्त्ववलोकनात् ॥'

इति । ततः परं तु परस्परपरिहारावस्थिताहंप्रतीतिलक्षणभिन्नविषयापेक्षिणि नानाभेदनियतात्माभिमानत्वात् तात्त्विकस्वैश्वर्यानभिज्ञे क्षेत्रज्ञतत्त्वे माया-शक्तिरेव केवला प्रभोर्विश्वरूपैश्वर्यप्रथास्पदभूता विजृम्भते । यथोक्तं तत्त्व-गर्भे एव—

'यदा त्वेवंविधादत्र निजा भोगाज्ञता पशोः ।
तदा मायास्वरूपेति गीयसे वैभवाश्रयः ॥'

इति । प्रत्यभिज्ञायामपि—

'भेदे त्वेकरसे भातेऽहंतयानात्मनीक्षिते ।
शून्ये बुद्धौ शरीरे वा मायाशक्तिर्विजृम्भते ॥'

इति । सा इह प्रत्ययोद्भवशब्देन प्रतिपादिता, यतोऽहमित्येव शिवात्मकस्य स्वभावस्य परामर्शात्मकं सम्यक् ज्ञानं, तस्यैव च स्वभावस्य विश्वरूपतया अवभासमानस्य इदन्तोल्लेखने भेदोद्भावनसामर्थ्यं मायाख्या शक्तिराख्याता, न तु वस्त्वन्तरं किंचित् । इदमिति च परामृश्यमानोऽर्थः प्रकाशमानत्वमति-क्रम्य अन्यथाभवितुं यतो न शक्नोति ततो भेदरूपापि असौ माया प्रकाशात्म-कपारमेश्वरधर्मत्वानतिक्रमात् भगवतः शक्तिरेव इयमत्यद्भूता, यत् स्वरूपं स एव एवं प्रत्यपादयत् ।

'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥'

इति । तथाहि अत्रायमर्थः—एषा मम दैवी माया, देवस्य इत्थंक्रीडनैकरसस्य ईश्वरस्य सतः शक्तित्वेन संबन्धिनी; किंस्वरूपा ?—गुणमयी, गुणाः सुखा-

तातेति किंचित्तनयेति किंचित्
अम्बेति किंचिद्दयितेति किंचित् ।
ममेति किंचिन्न ममेति किंचित्
भौतं संघं बहुधा मा लपेथाः ॥ (मा० पु० २५ । १५)

स्वाधीना अपितु पराधीनाः सम्पद्यन्ते । अस्यां स्थितौ अज्ञानवशमापन्नानां परस्परं पीड्यपीडकभावेन स्थिताः जीवाः पशव एव सन्ति । तन्मात्रगोचरः—भिन्नवेद्यविषयेत्यर्थः ।

द्यात्मानः सत्त्वाद्यभिधानाः तत्प्रकृतिका; सा हि भेदावभासस्वभावा, भिन्नश्चार्थः शब्दादिविषयात्मकः, विषयश्च सुखादिसंवेदनपर्यवसितात्मा,—इति सुखादिरूपग्राह्याकारनिर्भासिनी माया गुणमयी इत्युक्ता। तथा दुरत्यया दुःखेन अत्येतुमशक्या, तदतिक्रमणे कृतोत्साहैः प्रबुद्धैरपि सपदि सकलसंसार्यवस्थोच्छेदानुपपत्तेः भेदव्यवहारस्य दुर्लङ्घ्यत्वात्। किं तु मामेव ये प्रपद्यन्ते छिन्नद्वैतदशाप्रतिष्ठितसंविदः सुप्रबुद्धाः सन्तो मामेवैकं तत्त्वमभेदेनात्मतया प्रत्यभिजानते, ते मद्भावमापन्ना एनामतितरन्ति। तस्यां हि दशायां दिवसद्युताविव द्योतमानायाम् इयं यामिनीव निर्मूलनष्टस्वरूपा तैरेवातिक्रान्ता भवति। यदुक्तं स्तोत्रे—

'समाधिवज्रेणाप्यन्यैरभेद्यो भेदभूधरः।
परामृष्टश्च नष्टश्च त्वद्भक्तिबलशालिभिः॥'

एवंप्रत्ययोद्भवमात्रं माया, तन्मूलं च क्षेत्रज्ञतत्त्वं पशुपर्यायेण अस्वतन्त्रशब्देनात्र प्रतिपादितम्। प्रत्ययोद्भवरूपया हि अनया मायया स्वभावात् प्रच्यावितस्य अस्य तद्धर्मविपरीतेन कालादिरूपेण सुप्रसवेन पाशपञ्चकेन ग्रथितस्य पारतन्त्र्यं पशुत्वमुद्भाव्यते। तथा थ—अयम् अनया व्यामोहितः अनवच्छिन्नत्वादिरूपं स्वधर्मम् अपरामृशन्, तद्विपरीतेन अवच्छेदकेन कलनात्मना भूतभविष्यदादिविकल्पविभक्तेन कालाख्येन, तथा सर्वात्मकत्वधर्मविस्मृतेः सर्वत्र नियतकार्यकारणभावाख्यात्मकेन नियतिनाम्ना, तथा सर्वकर्तृत्वसर्वज्ञत्वलक्षणधर्मद्वयौदासीन्यात् किंचित्कर्तृत्व-किंचिज्ज्ञत्वरूपाभ्यां कलाविद्याभिधानाभ्यां, तथा प्रेप्सितार्थविरहात् नित्यनिरभिलाषत्वलक्षणस्वधर्मापरामर्शात् विषयाभिलाषितारूपेण रागाख्येन च पाशेन बध्यमानः पराधीनवृत्तिः पशुः संबध्यते। एष च मायाशक्तेः पञ्चभेदः प्रसवः समस्तस्य पशुप्रबन्धस्य अविशेषेण स्वरूपमावृत्य व्यवस्थितः। यस्तु प्रतिप्राणि विचित्रबुद्ध्यादिरूपतया परिणमन् तमावृणोति, तस्य प्रधानाख्यस्य प्रसवस्य प्रपञ्चं प्रत्ययोद्भवविषयप्रतिपादनद्वारेणाह 'स च तन्मात्रगोचरः' इति, स च पशुत्वकारणं प्रत्ययोद्भवः, तन्मात्रगोचरः तन्मात्राणि शब्दादिसामान्यानि इति। प्रत्ययस्योद्भवस्तन्मात्राणि तीव्रातीव्रभेदसामान्यवृत्तयो गोचरो यस्य तथाभूतो भिन्नवेद्यविषय इत्यर्थः। अनेनेदमाह यावदियं भिन्नवेद्यप्रथा

याबत्कालपर्यन्तं जीवस्य विभिन्नवेद्यप्रकाशः स्यात्। तावत्कालपर्यन्तं स पाशबद्ध एव भवेत्। यदा तु पूर्वजन्मोपार्जितपुण्यपरिपाकवशात् सद्गुरोरुपदेशं गृहीत्वा सर्वं

गोचरो विषयो यस्य स तथा; प्रत्ययो हि अयं प्रत्येयं भिन्नं विषयमपेक्ष्य प्रादुर्भवति, विषयविषयिभावश्च ग्रहीतृग्रहणग्राह्यरूपे त्रितये सति उपपद्यते। तदपि त्रितयं साधारणं प्रवृत्तिकारणं विना न स्यात् इति। तच्चतुष्टयमनेन वाक्येनाक्षिप्तम्। तत्र ग्रहीता प्रत्ययवान् पशुः, ग्राह्याः प्राधान्येन शब्दस्पर्शरसरूपगन्धाः आकाशादिस्थूलभूताश्रया विशेषात्मका गुणाः, तदात्मना समस्तविषयोपलब्धेः। तेषां चात्रोपादाने उपपन्ने सामान्ये सर्वविशेषाणामन्तर्भावः,–इति सामान्यवाचिना तन्मात्रशब्देन उपात्ताः। तैः शब्दादिभिराश्रयभूतानि स्थूलानि आकाशादिभूतानि आक्षिप्तानि, निराश्रयाणां तेषामनुपपत्तेः। तदेतत् दशविधं कार्यम्। स च प्रत्ययवान् परवशः पशुः विषयित्वे सति इष्टानिष्टविषये हानादानक्रियायां करणमपेक्षते। तत्र येन विषयं निश्चिनोति तत्प्रकाशप्रधानं बुद्ध्याख्यं करणं। येन च अनात्मभूतं देहादिकमर्थम् आत्मतया अभिमन्यते तद्विपर्ययात्मकं नियमप्रधानमहंकाराख्यं, येन च प्रवृत्तिप्रधानेन विषयं विकल्पयति तत्संशयात्मकं मनोऽभिधानम्,–इति त्रिविधमन्तःकरणं यथोत्तरं कार्यत्वेनोक्तम्। येन तु शब्दादीन् गृह्णाति तच्छ्रोत्रादिबुद्धीन्द्रियपञ्चकम्। येन वचनादिक्रियां करोति तद्वागादिकर्मेन्द्रियपञ्चकम्,–इति दशविधं बहिष्करणम्। तच्च अहंकारकार्यतयैव उक्तम्। तदेतदाभ्यन्तरं बाह्यं च करणम्। एवं त्रयोविंशतिविधः कार्यकरणवर्गो विषयित्वान्यथानुपपत्त्या अत्राक्षिप्तः। तथा प्रवर्तकं हेतुमन्तरेण विषयप्रवृत्तेरभावादपि विषयत्वं न उपपद्यते,–इति स हेतुरत्र सुखाद्यात्मा प्रधानाभिधान आक्षिप्तः। तथाहि–सुखं प्रतिप्राणि स्ववासनानुगुणेष्टविषयप्राप्तेस्तृप्तिरनित्य आनन्दः, तेन प्रयुक्तः सन् इष्टविषयादानाय प्रवर्तते, तद्विपर्ययो दुःखम् अनिर्वृतिः ततोऽनिष्टविषयहानाय; उभयन्यग्भावस्तु मोहः, तस्मिन् सति व्यवतिष्ठते,–इति सुखदुःखमोहात्मकं प्रकाशप्रवृत्तिनियमार्थं सत्त्वाद्यभिधानगुणत्रयमयं विकारावस्थायामपि अन्योन्याविनाभूतत्वात् एकमेव प्रधानाख्यं सर्वप्राणभृतां विविधवासनानुगुणनानारूपकार्यकरणात्मकस्वपरिणामप्रपञ्चानुगतसाधारणं प्रवृत्तिकारणं रागाख्यमा-

तावद्बद्ध एव, यदा तूक्तोपदेशयुक्त्या सर्वमात्ममयमेवाविचलप्रतिपत्त्या प्रतिपद्यते तदा जीवन्मुक्त इति। यथोक्तं 'इति वा यस्य संवित्तिः' [ २।५ ]

शिवस्वरूपमेव इत्यपरोक्षज्ञानं हृदि समुत्पद्यते। तदा स मुमुक्षुजनः जीवन्मुक्तो भवेत् ॥ ४६ ॥

यीयमलप्रपञ्चभूतम्। अनेनैवाभिप्रायेण वृत्तिकृता स च तन्मात्रगोचरः, इत्यस्य पदस्य--'रूपाद्यभिलाषात्मकः' इति पर्यायः प्रयुक्तः। रूपादिषु योऽभिलाषो रागः, तन्निमित्तकत्वात् तदात्मकः प्रत्ययोद्भवः; ततश्च अभिलाषप्रपञ्च एव सुखाद्यात्मकं प्रधानं कारणम् इत्येषा प्राधानिकी तत्त्वचतुर्विंशतिः 'स च तन्मात्रगोचरः' इत्यनेनाक्षिप्ता। प्राक् च द्वादश तत्त्वानि निर्णीतानि, तद्यथा-शिवादिविद्यान्तानि पञ्च, माया, कालादिपञ्चकं, पशुतत्त्वं च,-इति षट्त्रिंशत्तत्त्वरूपतया पारमेश्वरी एकैव शक्तिर्विजृम्भते। व्याख्यातप्रायमेतत् वृत्तौ--'परामृतरसात् स्वरूपात् अपायः प्रच्युतिः' इत्यादिना ॥ ४६ ॥

इत्यादि। एवं च यत्पूर्वमुक्तं 'तस्माच्छब्दार्थचिन्तासु न सावस्था न या शिवः।' ( २। ४ ) इत्यादि, न तेन सह 'परामृतरसापायस्तस्य यः प्रत्ययोद्भवः' ( ३। १४ ) इत्यस्य वैषम्यं किंचित् ॥ ४६ ॥

एवं प्रत्ययोद्भवस्य पशुत्वकारणभावे प्रतिपादिते शक्तिवर्गस्य भोग्यतां गतः सन् पशुः स्मृतः,-इति पूर्वोक्तविरोधपरिहारार्थमाह--

ननु यदि प्रत्ययोद्भवोऽप्यस्य परामृतरसापायः तत्कथमुक्तं शक्तिवर्गस्य भोग्यतां गतः,-इत्याशङ्कां परिहरति—

**स्वरूपावरणे चास्य शक्तयः सततोत्थिताः।**
**यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः ॥ ४७ ॥**

स्वरूपस्य स्वभावस्याच्छादने चास्य पुरुषस्य शक्तयो ब्राह्म्याद्याः पूर्वमुक्ता याः, ताः सततम् उद्युक्ताः। यतः शब्दरहितस्य प्रत्ययस्य ज्ञानस्य नास्त्येव कस्यचिदुद्भवः ॥ ४७ ॥

'अस्य' एवंप्रत्ययापादितपशुत्वस्य आत्मनः 'स्वरूपावरणे' स्वरूपस्य शिवात्मकस्य स्वभावस्य आवरणे, तथाप्रत्यवमर्शाभावमात्रेण हेतुना व्यव-

चः शङ्कां द्योतयन् तत्परिहाररूपं प्रमेयान्तरं समुच्चिनोति। अस्य पशोः स्वस्य शिवात्मनो रूपस्यावरणे भित्तिभूतत्वेन प्रथमानस्यापि सम्यग-

शक्तिवर्गस्य भोग्यरूपतां निरूपयति-- स्वरूपेति। पूर्वं चासां ब्राह्म्यादि शक्तीनां स्वरूपं वर्णितम्। ताः सर्वा अपि पुरुषस्य स्वस्वरूपतां प्रतिक्षणमावृतं कुर्वन्ति। अभेदं

धाने स्थगने; तन्निमित्तं 'शक्तयः' प्रागुक्ताः 'सततोत्थिताः' पतिपशुव्यवहारस्य न कदाचित् उपरमात् 'सततं' नित्यम् 'उत्थिताः' उदिताः; 'यतः' अस्वतन्त्रतापादनात्मना अमृतरसापायहेतुत्वेन प्रतिपादितो यः 'प्रत्ययोद्भवः' स 'शब्दानुवेधेन' शब्दसंभेदेन 'विना' न संभवति,–इति शेषः। एतदेव कुतः? इति चेत्, तदुच्यते,–शब्दः खलु प्रत्यवमर्शात्मा अवभासात्मनोऽर्थस्य अन्यतः खड्गोदकादर्शादेरन्तःक्रोडीकृततत्तत्पदार्थसार्थात् जडात् भेदतः स्वभावभूत एव। तथा च प्रत्यभिज्ञा––

'स्वभावमवभासस्य विमर्शं बिन्दुरन्यथा।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः॥'

इति। अन्यत्रापि उक्तम्––

'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमं विना।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥'

इति। स च सर्वावच्छेदविरहितविशुद्धचित्प्रकाशात्मकमुख्यार्थनिष्ठः सन् प्रत्यवमर्श इत्युच्यते। जातिगुणक्रियाभिधानादिविविधविशेषावच्छिन्नभिन्नरूपविश्वात्मकार्थावभासनिष्ठस्तु विविधकल्पनात्मकत्वात् विकल्प इत्युच्यते। तदेव शब्दस्य मुख्यं रूपं, तत्संकेतत्वेन व्यवस्थितः श्रोत्रग्राह्यो ध्वनिविशेषात्मकोऽर्थ एव प्रायेण शब्द इति व्यवह्रियते। तस्माच्छब्दरूपतामापन्नाः प्रत्ययोद्भवप्राणभूताः शक्तय एवास्य स्वरूपावरणे सदोद्युक्ता,– इति शक्तिवर्गस्य भोग्यतां गतः सन् पशुः स्मृतः,–इति पूर्वोक्तेनाविरोधः प्रतिपादितः। 'स्वरूपस्य स्वस्वभावस्याच्छादने'–इत्यादिना वृत्तौ व्याख्यातमेतत्॥ ४७॥

परामर्शने तन्निमित्तं व्याख्यातरूपाः शक्तयः सततमुत्थिताः, यावद्धि परामृतरसात्मकस्वस्वरूपप्रत्यभिज्ञानमस्य न वृत्तं तावदेताः स्वस्वरूपावरणायोद्यच्छन्त्येव। यतोऽस्य यः प्रत्ययोद्भवो विकल्पकाविकल्पकज्ञानप्रसरः स शब्दानुवेधेन 'अहमिदं जानामि' इत्यादिना सूक्ष्मान्तःशब्दानुरञ्जनेन स्थूलाभिलापसंसर्गेण च विना न भवति,–इति तिरश्चामप्यसांकेतिकः··· निर्देशप्रख्यः, स्वात्मनि च शिरोनिर्देशप्रख्योऽन्तरभ्युपगमरूपः शब्दनविमर्शोऽस्त्येव, अन्यथा बालस्य प्रथमसंकेतग्रहण न घटेत अन्तरूहापोहात्मकविमर्शशून्यत्वात्। स्थूलशब्दानुवेधमयस्तु विकल्पः सर्वस्य स्वानुभवसिद्धः॥ ४७॥

कारणं यत् शब्दसहकारितां विना कथमपि प्रत्ययात्मकविकल्पज्ञानस्य उदयो न भवति। कारणं विना कार्यस्य असंभवादिति॥ ४७॥

अथास्य शब्दपर्यन्तस्य प्रसरस्य, परस्याश्च शक्तेरभेदप्रतिपादनपूर्वं तत्स्वरूपाप्रत्यभिज्ञामात्रनिबन्धनौ बन्धमोक्षौ प्रतिपादयितुमाह—

श्लोकत्रयोक्तमर्थमुपसंहरन्नियतः प्रमेयस्य सामान्यस्पन्दतत्त्वादभिन्नतां प्रागुक्तामनुबध्नन् तत्प्रत्यभिज्ञानाप्रत्यभिज्ञानमयौ बन्धमोक्षौ, इति लक्षयति—

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥ ४८ ॥

सा चेयं क्रियास्वभावा भगवतः पशुवर्तिनी शक्तिः । यदुक्तम्—

'न सा जीवकला काचित् सन्तानद्वयवर्तिनी ।
व्याप्त्री शिवकला यस्यामधिष्ठात्री न विद्यते ॥'

इति । सैव च बन्धकारणम् अज्ञाता, ज्ञाता सा च पुनः परापरसिद्धिप्रदा भवति पुंसाम् ॥ ४८ ॥

'सा शिवस्य' स्वस्वभावस्यैव परमेश्वरस्य 'क्रियात्मिका' तत्स्वरूपप्रत्यवमर्शलक्षणव्यापारशरीरा 'शक्तिः' अव्यभिचारी धर्मः समर्थतारूपः 'इयं' प्रतिपादितप्रसररूपा शक्तिः यैव अद्वयचिन्मात्रस्वभावप्रत्यवमर्शिनी परा शक्तिः परमेश्वरस्य सैव इयम् इत्थं-प्रसृत्य अवभासते तत्त्वतो नास्ति अस्याः ततो भेद इत्यर्थः । यथोक्तं वृत्तौ—

'न सा जीवकला काचित्संतानद्वयवर्तिनी ।
व्याप्त्री शिवकला यस्यामधिष्ठात्री न विद्यते ॥'

इति । अस्य हि श्लोकस्यामर्थः—जीवस्य पुंसः पशो कलानां द्विविधः संतानो—ज्ञानरूपः क्रियारूपश्च; तत्र ज्ञानरूपोऽन्तःकरणात्मकः त्रिविधः, क्रियारूपो बहिष्करणात्मकः स्वभावस्थप्राणशक्तिसहित एकादशविधः,—इति चतुर्दशविधो जीवकलासंतानः संग्रहात् द्विविध एव, संतानद्वयवर्तिनी जीवस्यात्मनः कला सा न काचित् संभवति इति शेषः; यस्यां व्याप्त्री देशकालाद्यनवच्छिन्न

सेति श्लोकत्रयनिर्णीतत्वात्, इयमिति प्रमेयपर्यन्तेन रूपेण स्फुरन्ती स्वस्वभावरूपस्य चिदात्मनः शिवस्य सम्बन्धिनी स्पन्दतत्त्वात्मिका परा-

स्पन्दतत्त्वप्रत्यभिज्ञानेन मोक्षस्तदप्रत्यभिज्ञानेन बन्धेति निर्दिशति—सेयमिति । सेयमित्यत्र तच्छब्दप्रयोगेन निर्णीता प्रमेयसमूहात्मना स्फुरणशीला शिवसम्बन्धिनीस्पन्द-

वैभवाधिष्ठात्री वेद्यत्वादिना सर्वमधिष्ठाय आत्मपरतन्त्रं कृत्वा वर्तमाना शिवकला, शिवस्य परमात्मनः कला परा शक्तिः उक्तरूपा न विद्यते सत्तां व्यभिचरति, सैव इत्थमवभासते इत्यर्थः। वैश्वरूप्येऽपि अवभासलक्षणस्य सामान्यरूपस्य शिवधर्मस्य व्यापकस्य अतिरोभावात्, सैव परा शक्तिरियम्, अपरा स्थूलक्रियारूपा,-इति परापरयोः शक्त्योरभेद एव पारमार्थिकः प्रत्यभिज्ञापितः। तदेतत् ज्ञानगर्भस्तोत्रेऽप्युक्तम्—

बहिष्करणबुद्धचहंकृतिमनः सुषुम्नाश्रया-
च्चतुर्दशसु चण्डिके पथिषु येन येन व्रजेत्।
कला शिवनिकेतनं जननि तत्र तत्र स्म ते
दशोदयति दुर्लभा जगति या सुरैरप्यहो॥'

अस्यापि श्लोकस्यायं तात्पर्यार्थः-श्रोत्रादिपञ्चकं वागादिपञ्चकं दशविधं बहिष्करणं, बुद्धचहंकारमनांसि त्रिविधमन्तःकरणं मध्यमप्राणश्च,-इति कलायाः चिदात्मिकायाः शक्तेः चतुर्दश भेदाः। तेषां ये तावन्त एव पन्थानः प्रसरमार्गास्तेषु मध्ये येन येन केनचिदेकतमेन पथा एषा कला शिवनिकेतनं व्रजेत्, शिवः परमात्मा स एव निकेतनमालयस्तद् गच्छेत्, तत्र दशा उदयति-इति संबन्धः। शिवनिकेतनं व्रजेत्-इति मायीयभेदप्रत्ययव्यतिरेकेण शिवाख्यस्वपदाश्रयणरूपः पारमार्थिकः कलाया व्यापारः सिद्धवत् व्यवहृतः। इयं हि कला शिवात्मकात् निजास्पदात् 'न दुःखं न सुखम्' इत्यादिना कृतलक्षणात् उदेति, कृतकृत्या च तत्रैवान्ते[न्तः]प्रविश्य समरसीभवति सरिदिव सागरे; मध्येऽपि बुद्धचाद्यन्योन्यभिन्नप्रसररूपतया नानात्वेन अवभासमानापि जलरूपत्वमिव सामान्यं चिदात्मकत्वं न व्यभिचरति,-इति न कदाचित् शिवस्वभावात् अपैति; किंतु मायाशक्तिव्यामोहितैः न तथा प्रत्यभिज्ञायते-इति। एवमेषा कला येन येन पथा शिवनिकेतनं व्रजेत्, तत्र सा तादृशी स्वसंवेद्यत्वात् व्यपदेष्टुमशक्या कस्यचित् प्रबुद्धस्यैव दशा अवस्था उदयति अभिव्यज्यते, या सुरैर्ब्रह्मादिभिरपि दुर्लभा, ते हि प्रत्ययोद्भवजनितब्रह्मत्वाद्यवच्छिन्नपाशवाभिमानानतिक्रमात् शिवरूपां पतिदशां

भट्टारिकैव विश्ववैचित्र्यावस्थितिकारित्वात् क्रियाशक्तिः प्राङ्‌निर्णीतदशा शिव एव गृहीतपशुभूमिके वर्तमाना प्राणपुर्यष्टकरूपममं कर्तृतात्मनाहन्ता-

तत्त्वस्वरूपाक्रियाशक्तिविचित्रविश्वस्थितिकारिणीक्रियाशक्तिः पुर्यष्टात्मकात्मनि शरीरे कर्तृताऽहंताभिमानं कृत्वा स्पन्दतत्त्वसाक्षात्कारेऽसमर्थः सन् बन्धनमाप्नोति, बन्धहेतुत्वेन

कथमाप्नुयुः-इति । प्रकृतमिदानीं व्याख्यायते,-किंतु एवं-रूपापि असौ पारमेश्वरी क्रियात्मिका परा शक्तिः 'पशुर्वर्तिनी बन्धयित्री' पशौ भेदप्रत्ययोद्भवापादितपारतन्त्र्ये पुंसि वर्तमाना, बन्धस्य जन्मादिप्रबन्धपरिवर्तनात्मकस्य संसारस्य कर्त्री ।-पशुः किल सर्वतो व्यवच्छिन्नस्य आत्मन एव स्वत्वेन एनाम् अध्यवस्यन् इष्टानिष्टविषयोपादानहानजनितसुखाद्यनुभवमात्रपर्यवसितनिजज्ञानक्रियापरिस्पन्दत्वात् अपरामृष्टतत्परमार्थो व्यवच्छिनत्ति; । सा चैवं व्यवच्छिन्नत्वेन गृह्यमाणा तम् आ प्रबोधप्रत्युदयात् पशुत्वेन बध्नाति;-इति 'पशुर्वर्तिनी बन्धयित्री' इत्युक्तम् । ननु एवंस्वभावत्वात् अस्याः, पशोः बन्धध्वंसाभावप्रसङ्गः ? तत आह-'ज्ञाता' विदिता शिवात्मकस्वस्वभावप्रत्यवमर्शक्रियारूपतया प्रत्यभिज्ञाता सती 'सिद्ध्युपपादिका' सिद्धेः आत्मैश्वर्याधिगमलक्षणायाः परायाः, आनुषङ्गिकविविधविभूत्याविर्भावरूपायाश्च अपरायाः उपपादिका, वस्तुस्वभावबलात् संपादयित्री; यत एषा 'स्वमार्गस्था' स्वस्मिन् आत्मीये शिवस्वभावरूपे मार्गे अध्वनि स्थिता, तद्व्यतिरिक्तविषयान्तरनिवृत्तगतिरित्यर्थः; प्रत्ययोद्भवरूपमायावैभवोद्भावितभिदापेक्षया तु पशुर्वर्तिनी जीवकला-इत्युच्यते; प्रत्युदितप्रबोधस्य तु यथावस्थिततत्त्वेन प्रत्यभिज्ञायमाना सर्वाः सिद्धीरुपपादयति ।-इति श्लोकार्थं व्याख्याय, इदानीं यथा एषा स्वमार्गस्था तथा वितत्य प्रतिपाद्यते । एषा हि परमेश्वरस्वरूपप्रकाशप्रत्यवमर्शमात्ररूपा परैव शक्तिः वाग्रूपतया प्रसृता,-इति परमेश्वरेण शास्त्रेषु बहुशः प्रदर्शयता सर्वदा स्वमार्गस्थत्वमस्याः प्रतिपादितम् । तथा च श्रीमालिनीविजये--

'या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।
इच्छात्वं तस्य सा देवि सिसृक्षोः संप्रपद्यते ।।
सैकापि सत्यनेकत्वं यथा गच्छति तच्छृणु ।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ।।
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ।
एवं भवत्विदं सर्वमिति कार्योन्मुखी यदा ।।

विप्रुषा प्रोक्षितं कुर्वाणा तथारूपेणाप्रत्यभिज्ञाय स्वरूपावारकत्वाद्धानादानादिपरिक्लेशहेतुत्वाच्च बन्धयित्री भवति । यदा तु स्वस्य शिवात्मनो रूपस्य यो मार्गः—

सा क्रियाशक्तिः बन्धयित्री शब्देन व्यवह्रियते । यस्मिन् काले स्वस्य शिवस्वरूपतः प्राप्त्यु-

जाता तदैव तत्तद्वत्कुर्वत्यत्र क्रिया मता।
एवं यथा द्विरूपैव पुनर्भेदैरनेकताम् ॥
अर्थोपाधिवशाद्याति चिन्तामणिरिवैश्वरी।
तत्र तावत्समापन्ना मातृभावं विभिद्यते ॥
द्विधा च नवधा भेदैः पञ्चाशद्धा च मालिनी।'

इत्यादिना प्रकाशितोऽयमर्थः। तथा शब्दाद्वयवादिभिरपि विवृत्तिवाचोयुक्त्या तत्प्रसरं प्रतिपादयद्भिः स्वमार्गस्थत्वमेव अस्याः प्रदर्शितम्। यदाहुः—

'वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥'

इति। सैषा अत्यन्ताभेददशा, यस्यां स्फुटमेव अस्याः स्वमार्गस्थत्वम्। यदा पुनः इदमिति नानारूपं विभक्तत्वेन क्रमिकत्वेन च अन्तः परिस्फुरितमखिलं जगत् अविमर्शात् उपसंहृत्य विभागक्रमशून्यस्वमहिम्नि स्वभावव्योम्नि निमिषन्ती स्वरूपप्रकाशमात्रपरिशेषैव भवति, तदा आन्तरस्य परस्य ज्ञातुः पश्यन्त्यभिधानवाग्रूपा विवृत्तिः—इत्युक्ता। यदाहुः—

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥'

इति। अत्रापि स्वमार्गस्थैव एषा। यदा प्राणप्रयत्नव्यतिरेकेण प्रतिप्राणिशरीरान्तरस्वोदितानादिनिधनध्वनिविशेषात्मकतया कालादिक्रमं वर्णादिविभागं भाविनमनुगच्छन्ती प्रसरं गृह्णाति, तदा मध्यमाख्यवाग्रूपा विवृत्तिः—इत्यभिहिता; तदापि संविन्मात्रप्रकृतिकत्वमनतिक्रान्ता स्वमार्गस्थैव एषा। यदुक्तम्—

'केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥'

शक्त्यवस्थां प्रविष्टस्य निर्विभागेन भावना।
तदासौ शिवरूपी स्याच्छैवी मुखमिहोच्यते ॥' (२०)

पायभूता या पराशक्तिर्विद्यते तदात्मतया तदीयक्रियाशक्तेः तस्मिन् काले स जीवः योगी

इति। यदा तु प्रयोक्तृपुरुषेच्छानुविधायिप्रयत्नप्रेरिते प्राणाभिधाने मरुति शरीरोद्देशेषु उरःप्रभृतिषु जाताभिघाते, सैव सामान्यध्वनिरूपा स्वरव्यञ्जनादिभेदविभक्ताकारादिनियतवर्णरूपतां प्रयोक्तृभेदेऽपि अव्यभिचरन्ती प्रसरति, तदा वर्णभेदादिव्यञ्जकप्राणमात्राश्रया वैखर्यभिधानवाग्रूपा विवृत्तिः–इत्युक्तम्। यदुक्तम्—

'स्थानेष्वभिहते वायौ कृतवर्णपरिग्रहा।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना॥'

इति। तदापि असौ देशकालाधारप्रयोक्त्रादिवैचित्र्यैः अविकार्यनियतवर्णसमुदायात्मिकतां पुरुषेच्छादिसापेक्षाभिव्यक्तिकामजहती नित्यैव, संविद्रूपत्वमपि अनुगतमेव मध्यमावदस्यामपि–इति स्वमार्गस्थत्वमपि अस्या न व्याहन्यते। एवमसौ वैखरीरूपतामापन्नापि मातृकावर्गवर्णपदवाक्यार्थभेदेन अपर्यन्तं प्रसरं गृह्णाति। यथा च वर्णवैखरीरूपा इयम् एवमनन्तप्रसरा, तथा स्वरवैखरीरूपापि स्वरग्राममूर्च्छनातानजातरागादिभेदेनापि अनन्तप्रसरा। तदेवम् इयं पारमेश्वरी परा शक्तिः स्वभावप्रत्यवमर्शक्रियादिना सांकेतिकशब्दपर्यन्तेन निरवधिना स्वमहिम्ना प्रसृतापि, सर्वस्यैव पदार्थजातस्य सामान्यसंवित्प्रकाशव्यतिरेकेण अनुपपन्नस्वात्मलाभस्य प्रत्यवमर्शिनी सती, सर्वदा स्वमार्गस्थत्वं न व्यभिचरति। ततश्च–जगत्क्रीडार्थम् ईश्वरोद्भावितमायाशक्तिजनितैः नानाविकल्परूपैरावरणैः संबध्यमानापि अनुग्रहशक्तिस्पर्शोन्मेषितसत्यतद्रूपग्रहणकुशलविमलविज्ञानदृशः प्रमातॄन् प्रति तैः स्थगयितुमत्यन्तं तिरोधातुमशक्यैव–। यदुक्तम्—

'सेयमाकीर्यमाणापि नित्यमागन्तुकैर्मलैः।
अन्त्या कलेव सोमस्य नात्यन्तमभिभूयते॥'

इति। तत् इत्थं परममेव कारणं यथाविभक्तशब्दरूपतयापि प्रसृतम्–इति स्थितम्।

इति श्रीविज्ञानभट्टारकोक्तनीत्या प्राप्त्युपायः पराशक्तिस्तदात्मतयासौ क्रियाशक्तिर्ज्ञायते योगिना, यदा वा विकल्पकाविकल्पकप्रसरेऽपि शिवस्व-

सन् परमानन्दमयीं सर्वोत्कृष्टान् सिद्धिं सम्पादयति–मुक्तः सन् सर्वत्र व्याप्तो भवति॥४८॥

'सत्यं परागतं सूक्ष्मं निरवद्यमनुत्तरम् ।
अथ ब्रह्म परं शान्तमाविवर्णत्वमागतम् ॥'

इत्यादि । तथा च शब्दाद्वयवादे सामान्येन शब्दार्थोभयरूपोऽपर्यन्तावान्तरभेदो योऽयमीश्वरस्य शक्तिप्रसरः, तं विवर्तवाचोयुक्त्या व्यवहरति स्म । यदाह—

'अथायमान्तरो ज्ञाता सूक्ष्मे वागात्मनि स्थितः ।
व्यक्तये स्वस्य रूपस्य शब्दत्वेन विवर्तते ॥
अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥'

इति । अत्र ब्रह्मपर्यायशब्दतत्त्वतया पारमेश्वरमेव रूपं निर्दिष्टम् । तत्–इयं परा शक्तिरेव स्वमार्गस्था ज्ञाता तथा सम्यक्प्रतिपन्नस्वभावा सती संपूर्णां सिद्धिम् उपपादयति,–इत्युक्तम् । सेयमेव वैखरीरूपतामापन्ना पुरुषप्राणपरिस्पन्दाधीनाभिव्यक्तिकत्वात् स्थूला क्रियाशक्तिः,–इत्यपि क्वचिदुक्ता, तत्पूर्वा च मध्यमा वाक् इच्छाशक्तिः, तत्पूर्वा च पश्यन्ती ज्ञानशक्तिः–इति । तदेवं शक्तित्वे सति शक्तिमन्तमियम् अपेक्षते,–इत्यभिन्नमातृकात्मकः शब्दराशिरूपक्रियाशक्तिप्रधान ऐश्वरो विग्रहोऽस्याः समाश्रयः, यत्र इयं वर्णादिभिः वाक्यपर्यन्तैः स्वप्रसरभेदैः विजृम्भते । योऽपि वाक्यरूपः प्रसरोऽस्याः, स नित्यानित्यभेदेन द्विविधः,–तत्र मन्त्रात्मकः शास्त्रात्मकश्च नित्यः, लौकिकव्यवहारविषयलौकिकवाक्यात्मकस्तु अनित्यः । एवं परमेश्वरशक्तित्वेन प्रत्यभिज्ञायमाना एषा वाङ्मयी विभूतिः परसिद्धिप्रदा, नानापशुसंबन्धितया तु अवच्छिद्यमाना बन्धहेतुर्भवति–इति । व्याख्यातमेतद् वृत्तौ—

'सा चेयं क्रियात्मिका क्रियास्वभावा'

इत्यादिना ॥ ४८ ॥

रूपस्य स्वात्मनोंऽशभूतमेवाशेषवेद्यमनेनेक्ष्यते तदास्यासौ परानन्दमयीं परां सिद्धिमुपपादयति ॥ ४८ ॥

एवं पतिस्वभावस्यैव आत्मतत्त्वस्य स्वमायावभासितं पशुत्वं प्रतिपाद्य, इदानीं पशोः सतो विद्योदयात् स्वमार्गस्थत्वेन अभिज्ञायमाना एषा परा शक्तिः, पतित्वाभिव्यक्तिमावहन्ती संसारविच्छेदहेतुः यथा भवति, तथा संसारकारणप्रतिपादनपूर्वं हेतुकथनं प्रतिजानानः श्लोकद्वयमाह--

इत्थंकारं ( पशुरत्र बध्यते, वक्ष्यमाणोपायपरिशीलनेन च मुच्यते, इति प्रतिपादयन् बन्धस्वरूपमुच्छेद्यत्वेनानुवदति )—

तन्मात्रोदयरूपेण मनोऽहंबुद्धिवर्तिना ।
पुर्यष्टकेन संरुद्धस्तदुत्थं प्रत्ययोद्भवम् ।। ४९ ।।
भुङ्क्ते परवशो भोगं तद्भावात् संसरत्यतः ।
संसृतिप्रलयस्यास्य कारणं संप्रचक्ष्महे ।। ५० ।।

तन्मात्रोदयः, तन्मात्राणां शब्दादीनाम् अनुभवरूपेण, मनोऽहंकारबुद्धिभिः इति त्रिभिः परामृश्यमानेन पुर्यष्टकेन बद्धः, तदुत्थं तस्मादुद्भूतं सुखदुःखसंवेदनरूप तदा ।। ४९ ।।

भुङ्क्ते अश्नाति, अस्वतन्त्री भोगं सुखदुःखसंवेदनरूपं, तस्य पुर्यष्टकस्य भावात् संसरति संसारशरीरे, अतः संसृति-प्रलयस्य जन्ममरणप्रवाहरूपस्य संसारस्य विनाशकारणं संप्रचक्ष्महे वक्ष्यामः ।। ५० ।।

'अतो' हेतोः 'अस्य' उक्तवक्ष्यमाणरूपस्य पशोः, यः 'संसृतिप्रलयः, संसारक्षयः, तस्य 'कारणं' हेतुं 'संप्रचक्ष्महे' युगलकात् अस्मादुत्तरेण श्लोकेन

पुर्यष्टकोत्थितं भोगं भुङ्क्ते । यत एव प्रत्ययेषु सुखादिप्रत्ययोद्भवः अत एवासौ प्रत्ययोद्भवात् पशुः परवशः शब्दानुवेधक्रमेण पदे पदे

बन्धस्वरूपमुच्छेदयोग्यमिति श्लोकद्वयेन दर्शयति— तन्मात्रेति । यद्यपि सूक्ष्मशरीरमेव पुर्यष्टकेन तत्र तत्र वर्णितमस्ति तथापि स्थूलशरीरस्य तज्जन्यत्वेन पुर्यष्टकम्

सम्यक् प्रकर्षेण च ब्रूमहे। अत्र व्यधिकरणेन षष्ठचौ व्याख्येये। कुतो हेतोः ?–यतोऽयं पशुः 'पुर्यष्टकेन संरुद्धः' सन् 'भोगं भुङ्क्ते' पुर्यां सूक्ष्मे शरीरे तन्मात्रपञ्चकं गुणत्रयम्–इति स्थूलशरीरकारणभूतमष्टकम् यत् संनिविष्टं, तन्मुखं पुर्यष्टकम्, तत्कार्यत्वात् स्थूलमपि शरीरं तच्छब्देन इह पुर्यष्टकम्–इत्युच्यते, तेन 'संरुद्धः' तावन्मात्रमात्मत्वेनाभिमन्यमानो विस्मृतसर्वात्मकत्वादिस्वसामर्थ्यवशात् बद्धः, अत एव 'परवशः' सर्वशक्तिस्वभावव्यतिरिक्तकारणान्तराधीनसकलसमीहितार्थसिद्धत्वात् अस्वतन्त्रः सन् 'भोगं' मायावभासितानादिनिजकर्मोपचितवासनानुगुणसुखादिसंवेदनात्मकतया पर्यवसितं स्वविषयमात्रं 'भुङ्क्ते' अनुभवति। कीदृशं ? 'तदुत्थं' तस्मात् पुर्यष्टकात् उत्थितमुद्भूतं,–देहबन्धे हि सति भोगनिर्वृत्तिरुपपद्यते–। कं तं भोगम् ?–'प्रत्ययोद्भवं' प्राग्व्याख्यातस्वरूपनियतस्वविषयज्ञानोत्पादरूपं,–स्वविषयमात्रभोक्तृत्वाभिमानरूपस्य प्रत्ययस्य उत्पाद एव भोगः–इत्यर्थः। कीदृशेन पुर्यष्टकेन संरुद्धः ?–'तन्मात्रोदयरूपेण' तन्मात्राणि स्थूलभूतकारणभावेन ईश्वरेच्छयैव अवभासिताः सूक्ष्माः शब्दादयः, तेषामुदयः स्थूलशरीरभावपरिणताकाशाद्यात्मना अभिव्यक्तिः। तथा च––अत्र यद्यन्नाड्यादि सुषिरं तदाकाशं शब्दतन्मात्रोदयः, यद्यत् सक्रियं प्राणादि स वायुः स्पर्शतन्मात्रोदयः, यद्यत् उष्णप्रभास्वरादिरूपं अग्न्यादि तत्तेजो

ब्राह्म्यादिदेवीभिराक्षिप्यमाणः, न तु सुप्रबुद्धवत् स्वतन्त्रः तस्य पुर्यष्टकस्य भावादेव पुनःपुनरुद्बोधितविचित्रवासनः संसरेत् तत्तद्भोगोचितभोगायतनानि शरीराण्यर्जयित्वा गृह्णाति चोत्सृजति च। यतश्चैवमतोऽस्य पुर्यष्टकसंरुद्धस्य या संसृतिस्तस्या यः प्रकृष्टो लयः पुर्यष्टकात्मकमलोच्छेदेन विनाशः

'अनेन' स्थूलशरीरेण पुर्यष्टकात्मना तावन्मात्रे—आत्मत्वाभिमानेन बद्धः। तस्मात् परतन्त्रः सन् जीवः अनेकविधभोगपदार्थान् सुखदुःखादिसाक्षात्कारान् करोति। देहसम्बन्धे सति भोग उपपद्यते। अत एव तदुत्थं प्रत्ययोद्भवमित्युक्तम्। प्रत्ययोद्भवो हि प्राप्तस्तत्तद्विषयकभोक्तृत्वाभिमानजनितज्ञानोत्पत्तिः, प्रत्ययोत्पत्तिरेव भोगः, स्थूलभूतानां कारणरूपेण ईश्वरेच्छया भासमानाः सूक्ष्माः शब्दादयस्तैः शब्दादितन्मात्राभिः स्थूलशरीरस्य अभिव्यक्तिर्जायते। अस्मिन्नेव स्थूलशरीरे यस्य मनोवृत्तिविशेषरूपदृढाभिमानः स एव परवशः सन्

रूपतन्मात्रोदयः, यद्यत् द्रवरूपं रुधिरादि ता आपः रसतन्मात्रोदयः, यद्यत् कठिनं मांसास्थिस्नाय्वादि सा पृथ्वी गन्धतन्मात्रोदयः,–इति तन्मात्रोदयो रूपमाकारो यस्य तत् तथा तेन । एवं तन्मात्रोदयरूपत्वं व्याख्याय, गुणोदयरूपत्वं दर्शयितुं विशेषणान्तरमाह,–मनोऽहंबुद्धिवृत्तिना' इति । अनुभूयमानस्य अस्य आत्मलाभोऽनुभवश्च अन्तःकरणनिष्ठः–इति मनसि रजोगुणोदये, अहङ्कारे तमोगुणोदये, बुद्धौ च सत्त्वगुणोदयरूपायां वृत्तिर्वर्तनम् अवस्थितिः यस्य तादृशेन । स च एवंविधेन पुर्यष्टकेन संरुद्धः सन् पशुः 'तद्भावात्' तस्य पुर्यष्टकस्य स्थूलसूक्ष्मस्य भावात् विद्यमानत्वात् अप्रबोधे सति अनुच्छेदात् 'संसरेत्' अनवरतं नानाशरीरभोगवासनाकर्मचक्रभ्रममनुभवेत् आ प्रबोधप्रत्युदयात् । इदमत्र तात्पर्यम्–देहसंरुद्धस्य पुंसः प्रतिनियतसुखादिसंवेदनात्मनि भोगे यो भोक्तृत्वाभिमानः, तत् संसारकारणम्, अतोऽस्य निरावणस्वस्वरूपस्थितिमात्रं संसारविनाशहेतुं संप्रचक्ष्महे–इति । व्याख्यातमेतत् वृत्तिकृता––

'तन्मात्रोदय'

इत्यादिना

'भुङ्क्तेऽश्नाति परवशः'

इत्यादिना च ॥ ४९ ॥ ५० ॥

तस्य कारणं सम्यक् सुखोपायं प्रचक्ष्महे समनन्तरमेव ब्रूमः, तथा संप्रचक्ष्महे प्रकरणेऽस्मिन् स्वयं प्रतिपादितवन्तः । 'वर्तमानसामीप्ये वर्तमानवद्वा' ( पा० सू० ३ । ३ । १३१ ) इति वर्तमानप्रयोगः ॥ ४९-५० ॥

भोगः भुञ्जानः जन्ममरणलक्षणसंसारे पौनःपुन्येन आवागमनं कुरुते । अत्र हेतुः शरीरेन्द्रियादिषु तादात्म्याभिमानः । अयं निष्कर्षः—देहाभिमानिनः पुरुषस्य तत्तद्विषयलाभजनितसुखादिसंवेदनरूपे भोगे यो हि भोक्तृत्वाभिमानः स एव संसारस्य मूलकारणमस्ति । अत एव अस्माभिः अज्ञानाद्यावरणरहितः स्वरूपनिष्ठैव संसारविनाशहेतुरिति व्याख्यातुम् ॥ ४९-५० ॥

अधुना आत्मन एव शिवस्य यथोक्तैश्वर्यरूपं पतित्वं येन अभिव्यज्यते, तत् समनन्तरं प्रतिज्ञातम् उपायान्तरम् उपदिशन् प्रकरणमुपसंहरति--

एतत् प्रतिपादयन् आद्यसूत्रोक्तमर्थं निगमयति—

**यदा त्वकेत्र संरूढस्तदा तस्य लयोदयौ ।**

**नियच्छन् भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ।। ५१ ।।**

यदा पुनस्त्वेकत्र स्थूले सूक्ष्मे वा संरूढो लीनचित्तः, तदा तस्य प्रत्ययोद्भवस्य लयोद्भवौ ध्वंसप्रादुर्भावौ नियच्छन् कुर्वन् भोक्तृतां प्राप्नोति । ततः चक्रेश्वरो भवेत् सर्वाधिपतिर्भवति ।। ५१ ।।

'यदा तु' यस्मिन् पुनः काले स्थूलसूक्ष्मत्वात् अनयोः पुर्यष्टकसंज्ञानिर्दिष्टयोः प्रत्ययोद्भवमात्रमूलयोः शरीरयोः मध्यात् 'एकत्र' अन्यतरस्मिन्, अथवा-प्राक्प्रतिपादितोपपत्त्या संवेद्यमानस्यैव अर्थस्य शरीरत्वे व्यवस्थिते भूतात्मकभावात्मकभेदेन स्थूलसूक्ष्मयोः शरीरयोर्मध्यादेकत्र, अथवा—ध्येयतया आलम्बनीययोः स्थूलसूक्ष्मयोर्भावयोर्मध्यात् एकत्र 'संरूढः' सम्यक् अविलम्बतया रूढः, एकाग्रताप्रकर्षात् अभेदेन परिणतसंवित् साधकः 'तदा, तस्मिन् क्षणे 'तस्य' अभेदेन प्रतिपन्नस्य यथोक्तस्य शरीरस्य 'लयोद्भवौ' त्यागग्रहरूपौ विनाशोत्पादौ 'नियच्छन्' भोक्तृशब्देन वक्ष्यमाणस्य सत्यस्य कर्तुः आत्मन एव कार्यतया अवधारयन्,—अहमेव नित्यनिरावरणस्वतन्त्रचिन्मात्रस्वरूपः अनयोः कर्ता—इति निर्विकल्पतया व्यवस्थापयन् 'भोक्तृतामेति' भोक्तुरुपलब्धृमात्रस्वभावस्य परमात्मनो भावो भोक्तृता तामाप्नोति, सतीमपि तदानीमेव प्रत्यभिज्ञया स्वीकुरुते 'ततः'

यदा पुनरयमुक्ताः परतत्त्वसमावेशोपदेशयुक्तीः परिशीलयन् एकत्र पूर्णाहन्तात्मनि स्पन्दतत्त्वे सम्यगविचलत्वेन रूढः समाविष्टस्तन्मयो भवति,

इदानीं प्रथमश्लोकार्थं निगमयति—यदेति । यदा साधकः स्थूलसूक्ष्मपुर्यष्टकयोः कस्मिन्नपि एकस्मिन् पुर्यष्टकेऽवस्थितः सन् स्वकीयचित्तं लोकोत्तरस्पन्दतत्त्वे विलीनी-

सत्यात्मस्वरूपप्रत्यभिज्ञालक्षणात् हेतोः 'चक्रेश्वरो भवेत्' चक्रस्य प्राक्प्रतिपादितस्थित्या चराचरभावपर्यन्तेन प्रपञ्चेन प्रसृतस्य शब्दराशिसमुत्थस्य स्वशक्तिसमूहस्य, ईश्वरोऽधिष्ठाता, स्वैश्वर्यविजृम्भामात्रतया अवगम्यमानस्य यथेष्टविनियोक्ता संपद्येत। तदैव स्वाभाविकस्वातन्त्र्याभिव्यक्तेः पशुप्रत्ययप्रध्वंसे सति, शक्तिचक्रभोग्यतां विमुच्य, तद्भोक्तृभावरूपमैश्वर्यं प्रतिपद्येत; अतः तौ लयोद्भवौ तत्र भोक्तरि आत्मनि नियच्छेत्-इति वाक्यार्थः। इदमत्र तात्पर्यम्-यथा सर्वः कश्चित् देही देहमात्रप्रतिष्ठितात्माभिमानो बाह्यस्य घटादेः पदार्थस्य ग्राह्यतयैव प्रतिपन्नस्य त्यागग्रहौ तादृशि स्वात्मनि नियच्छन् अहमेव एतयोः कर्ता–इति निश्चिन्वन्, तावति स्वतन्त्रं कर्तारं शरीरितानिविष्टमात्मानं मन्यते, तथैव तस्य शरीरस्य वेद्यभूमिकापादनेन क्रियमाणौ त्यागग्रहौ तद्विलक्षणे सर्वदावेद्यत्वसंस्पर्शासहिष्णौ अनन्यसाधारणकर्तृत्वस्वभावे सत्ये स्वात्मनि वस्तुसामर्थ्यात् नियमं भजन्तावपि अप्रबुद्धत्वात् न प्रतिपद्यते; ततः शरीरशरीरिविवेकग्रहणयोग्यप्रज्ञप्रबुद्धमेव प्रति अयमुपदेशः; यतः तादृश एव अनुग्रहशक्तिशकलितसंशयग्रन्थिः परमेश्वरस्य एवंविधविशेषोपदेशपात्रम्। यदाह—

'अयं सर्वस्य प्रभव मत्तः सर्वं प्रवर्तते।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।
कथयन्तश्च मां नित्यं तुष्यन्ति रमयन्ति च॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मां प्रापयन्ति ते॥

तदा तस्येति पूर्वसूत्रनिर्दिष्टस्य पुर्यष्टकस्य तद्द्वारेणैव विश्वस्य निमीलनोन्मीलनसमावेशाभ्यां लयोदयौ नियच्छन् प्रथमसूत्रनिर्णीतदृशा एकस्मादेव शंकरात्मनः स्वभावात् संहारं सर्गं च कुर्वन् भोक्तृतामेति धरादिशिवान्तसमग्रभोग्यकवलनेन परमप्रमातृतां सतीमेव प्रत्यभिज्ञानक्रमेणावलम्बते।

कुर्वन्नास्ते। तदा स प्रथमसूत्रोक्तनिर्णीतमार्गेण निमीलनोन्मीलनसमावेशाभ्यां विश्वस्य नियच्छन्—संहारं सर्गं च संपादयन् भोक्तृत्वं संपादयति समग्रभोगविषयकबलेन अबाधितमेव परमप्रमातृताप्रत्यभिज्ञानक्रमद्वारा अवलम्बते। अनन्तरमाद्यश्लोकप्रदर्शितशक्तिचक्रस्य

तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥'

इति। यस्मात् उपदेशात् अनुशील्यमानात्, अस्य 'एकत्र' इति प्रतिपादितस्य शरीरस्य अभेदेन प्रतिभासमानस्य सतः, समनन्तरं वेद्यीक्रियमाणस्य त्यागग्रहात्मकौ लयोद्भवौ तद्विधर्मिणि भोक्तरि सर्वेश्वरे स्वात्मन्येव स्वातन्त्र्येण कार्यतया नियम्यमानौ नियन्तुः परस्वभावप्रत्यभिज्ञामावहन्तौ सर्वैश्वर्याय कल्पेते, ततः तौ तत्र नियच्छेत्–इति वाक्यार्थः। तत् अनेन आत्मन एव शिवस्य स्वेच्छामात्राधीनौ जगतः प्रलयोदयौ, जगदपि तत्स्वरूपाभेदात् तस्य स्वशक्तिचक्रमयो विभव–इति यथोपक्रान्तार्थनिर्वाहात् एकमेव तत्त्वं स्वरूपपरामर्शमात्राव्यभिचारधर्मकं परमार्थसन्, अतो व्यतिरिक्तं किंचित् न संभवति–इति उपपादितम्। यदुक्तम्––

'परमार्थे तु नैकत्वं पृथक्त्वाद्भिन्नलक्षणम्।
पृथक्त्वैकत्वरूपेण तत्त्वमेकं प्रकाशते॥
यत्पृथक्त्वमसंदिग्धं तदेकत्वान्न भिद्यते।
यदेकत्वमसंदिग्धं तत्पृथक्त्वान्न भिद्यते॥
द्यौः क्षमा वायुरादित्यः सागराः सरितो दिशः।
अन्तःकरणतत्त्वस्य भागा बहिरवस्थिताः॥'

इति। अयमेवार्थः उक्त्यन्तरेण स्वस्तोत्रे प्रतिपादितोऽस्माभिः––

'चित्रालोकविकल्पकल्पितनवाकल्पाङ्कनानाकृति
नृत्यन्तीं बहुधा बहिः स्ववपुषोऽप्यन्तर्न भिन्नां पुनः।
नित्यं नूतनकौतुकः प्रियतमां स्वां शक्तिमालोकयन्
अच्छिन्नाप्रतिमप्रमोदमहिमा शंभुर्जयत्येककः॥'

ततश्च प्रथमसूत्रनिर्णीतस्य शक्तिचक्रस्य स्वमरीचिनिचयस्येश्वरोऽधिपतिर्भवेत्। अनेनैव च देहेन महेश्वरत्वमवाप्नोत्येवेति यावत्। एवं चोपक्रमोप-

स्वमरीचिसमूहस्य अधिपतिर्भवति। अनेनैव शरीरेण महेश्वरत्वं प्राप्नोतीति हृदयम्। इत्थमुपक्रमोपसंहार—संपुटीकृत्यमहार्थं प्रदर्शयन् तत्साररूपेण समस्तवेदान्तोपनिषन्मूर्धन्यत्वम् स्पन्दशास्त्रस्य प्रकटीकरोति श्रीमदाचार्यो वसुगुप्त इति दिक्॥ ५१॥

इति। तत् अत्र समनन्तरव्याख्याते श्लोके प्रकरणारम्भश्लोकप्रतिज्ञातः स्वसंवेदनसंवेद्य आत्मैश्वर्याद्वयलक्षणोऽर्थो निर्वाहितः। व्याख्यातमेतत् वृत्तिकृता—

'यदा पुनरेकत्र स्थूले सूक्ष्मे वा'

इत्यादिना ग्रन्थेन ॥ ५१ ॥

इति श्रीराजानकश्रीरामविरचितायां स्पन्दविवृतौ
शक्त्यात्मकविश्वाव्यतिरेकोपलब्धिः प्रकीर्णं च
चतुर्थो निःष्यन्दः समाप्तः ॥ ४ ॥

संहारयोर्महार्थसंपुटीकारं दर्शयन् तत्सारतया समस्तशांकरोपनिषन्मूर्धन्यतामस्याविष्करोति शास्त्रस्य श्रीमान्वसुगुप्ताचार्यः, इति शिवम् ॥ ५१ ॥

इति श्रीस्पन्दनिर्णये विभूतिस्पन्दस्तृतीयो निःष्यन्दः
समाप्तः।

# चतुर्थो निःष्यन्दः

**इदानीम् आत्मन एव एकस्य तत्त्वस्य संशयमात्रम् अप्रथने कारणं, तच्च सद्गुरूपदेशव्यतिरेकेण न शक्यमुन्मूलयितुम्, परमेश्वरो हि गुरुमूर्तिमाविश्य अनुग्राह्यान् स्वप्रत्यभिज्ञापनेन प्रबोधयति,–इति निजगुरुसरस्वतीस्तवनद्वारेणाह––**

ग्रन्थान्ते परमां स्पन्दभूमिं गुरुगिरं च श्लेषोक्त्या स्तौति—

**अगाधसंशयाम्भोधि - समुत्तरणतारिणीम् ।**
**वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम् ॥ ५२ ॥**

अगाधो ह्यप्रतिष्ठोऽनन्तः ॥ ५२ ॥

परिपूर्णेयं 'स्पन्दवृत्तिः' कृतिसात्रभवन्महामाहेश्वराचार्यभट्ट-
श्रीकल्लटपादानाम् ॥

**'ताम्' अशक्यस्वरूपप्रतिपादनां हृदि स्फुरन्तीं 'गुरुभारतीं वन्दे' गुरोः वसुगुप्ताभिधानस्य साक्षात् सिद्धमुखसंक्रान्तसमस्तरहस्योपनिषद्भूतस्पन्दतत्त्वामृतनिःष्यन्दस्य, भारतीं वाचं स्तौमि । कीदृशीम् ?–'अगाध' इत्याद्यार्धेन विशेषणम्, अविद्यमानो गाधो विश्रान्तिभूमिका यत्र तादृशो यः 'संशयः' तत्त्वाप्रतिपत्तिरूपो विभ्रमः, स एव दुर्जरविकल्पोर्मिजालसंकुलत्वादिना 'अम्भोधिः' समुद्रः, तस्य 'समुत्तरणे' सम्यक् विलङ्घने 'तारिणीम्' नावम् । तथा 'विचित्रार्थपदां' विचित्रः अत्यद्भुतः अर्थोऽभिधेयं वस्तु येषां**

तामसामान्यां भगवतीं गुरुं 'शैवी मुखमिहोच्यते' ( वि० भै० २० ) इति स्थित्या शिवधामप्राप्तिहेतुत्वादाचार्यरूपाम् । अथ च गुरुं पश्यन्त्यादिक्रोडीकारात् महतीं भारतीं परां वाचम्, तथा गुरोराचार्यस्य सम्बन्धिनीमुपदेष्ट्रीं गिरं चित्रां लोकोत्तरचमत्काररूपां वन्दे सर्वोत्कृष्टत्वेन समाविशामि । अथ च सर्वावस्थासु स्फुरद्रूपत्वादभिवदन्तीमुद्यन्तृताप्रयत्नेनाभिवादये स्वरूपविमर्शनिष्ठां तां समावेष्टुं संमुखीकरोमि । कीदृशीमगाधो

इदानीन्तनं श्लेषद्वारा परां स्पन्दभूमिं स्तुवन् शास्त्रस्यास्य महाफलत्वं सूचयति—अगाधेति । अहं त्वां गुरुभारतीं वन्दे । गुरुविशेषेण पश्यन्त्यादि संबद्धेन महत्त्वं सूचितम्, आचार्यत्वं च भारत्या शिवतादात्म्यप्राप्तिजनकत्वेन, अन्यस्मिन् पक्षे गुरोः आचार्यस्य उपदेशकर्तृं कामपि अनिर्वचनीयां चमत्कारप्रदाम् अत एव चित्रां भारतीं वन्दे, यद्यपि

तादृंशि पदानि यस्यां सा । तथा तां 'चित्रां' घटनाविशेषशालित्वात् विस्मयाधायिनीम् । विशेषणद्वयेन अनेन अर्थगतं शब्दगतं च अतिशयं तुष्टाव, यतोऽत्र सकललोकाशयनिर्विषयः कतिपयलोकोत्तरप्रबुद्धहृदयसंवादी विचित्रोऽर्थः पदानां, तादृगर्थप्रतिपादनशालिनी च चित्रा पदवाक्यरचना– इति ओम् । व्याख्यातमेतत् वृत्तौ––

'अगाधो हि अप्रतिष्ठोऽनन्तः'

इत्यादिना ग्रन्थेन ।। ५२ ।।

दुरुत्तरो यः संशयः पूर्णाहन्तानिश्चयाभावात्मा विचित्रः शङ्काकलङ्कः स एव विततत्वेनाम्भोधिस्तस्य सम्यगुत्तरणे या तारिणी नौरिव तामित्युभयत्रापि योज्यम् । तथा विचित्रार्थानि नानाचमत्कारप्रयोजनानि पदानि विश्रान्तयो यस्यां परस्यां वाचि तां विचित्राणि रम्यरचनानुप्रविष्टानि अर्थपदानि वाच्य-वाचकानि यस्यां गुरुवाचि ताम् ।। ५२ ।।

प्रसिद्धप्रभावस्वनामोदीरणात्सम्भावनाप्रत्ययेनार्थिनः प्रवर्तयन् गृह-नीयतया महाफलतामस्य शास्त्रस्य निरूपयनि शास्त्रकारः—

लब्ध्वाप्यलभ्यमेतज्ज्ञानधनं हृद्गुहान्तकृतनिहितेः ।
वसुगुप्तवच्छिवाय हि भवति सदा सर्वलोकस्य ।। २ ।।

एतच्छास्त्रोक्तमेतज्ज्ञानमेव पुरुषार्थप्राप्तिहेतुत्वाद्धनमलभ्यमपि दुष्प्रापमपि लब्ध्वा शंकरस्वप्नोपदेशसारं शिलातलादवाप्य प्रकाशविमर्शा-त्मकं हृदमेव विश्रान्तःप्रवेशावकाशप्रदत्वाद्गुहा तस्यामन्तेन निश्चयेन कृता

वन्दनं स्वनिष्टापकृष्टत्वप्रकारकबोधानुकूलव्यापाररूपं तथापि प्रकृते तां सर्वोत्कृष्टरूपेण हृदि अभेदेन धारयामीत्यर्थस्तस्य बोध्यः । स्वरूपविचारनिष्ठां तां मनसि समाविष्टुमभिमुखी-करोमि । इमामनुभवरूपां वाणीं दुस्तरसंशयरूपसंसारसागरसमुत्तरणे तरणिरूपा विद्यते, गुरोर्वाचि विचित्रार्थप्रतिपादकतया नैकविधचमत्कारफलहेतुत्वं विद्यते, अत एव तस्य चित्रत्वं सेयम् । यथा वसुगुप्तेन एतच्छास्त्रपरिशीलनद्वारा शिवस्वरूपत्वं लब्धं तथैव एतच्छास्त्रं समग्रलोककृते निरन्तरं शिवस्वरूपताप्रदाये भवति सम्पद्यते । यद्यपि इदं ज्ञानात्मकं धनमलभ्यमपि शङ्करद्वारा स्वप्ने प्रदत्त उपदेशानुसारं शिलातलात् वसुगुप्तो लब्धवान् । हृदयगुहायां तस्य निश्चयात्मिका वसुगुप्ताचार्येण प्रतिष्ठा संपादिता, तया प्रतिष्ठया आचार्यवसुगुप्तेन मोक्षाख्यं फलं लब्धम् । अनया रीत्या मोक्षरूपपरमपुरुषार्थ-प्राप्तिहेतुज्ञानधनं यो हि स्वस्य एतद्गुहायां प्रतिष्ठितं करोत्यसौ निश्चयेन स्पन्दतत्त्वात्मक्-शिवरूपतां प्राप्नोति ।। ५२ ।।

श्रीकृष्णानन्दसागरविरचितास्पन्दरञ्जनी समाप्ता ।।

एष स्पन्दाभिधानो निधिरिह विवृतो वीतसंदेहसर्प-
त्रासः संपूर्णसिद्धिप्रदनिरतिशयज्ञानमाणिक्यगर्भः।
सर्वार्थिभ्यो विलब्ध्या स्वयमपि सहजानन्दभोगोपलब्ध्या
भव्यानामस्य लाभं सफलयतु परः शंकरस्य प्रसादः ॥ १ ॥

सद्विद्यासरसीविभूषणवरस्फारोत्पलोच्चाशय-
प्रोत्सर्पत्परिपक्वबोधमधुपेनेदं मयागायि यत्।
रामेणानुपमप्रमोदमधुरं बद्धावधानस्य त-
च्छ्रोतुः कस्य न चेतनस्य तनुते विश्रान्तिमन्तः पराम् ॥ २ ॥

चेतस्याकुलिते क्वचित्कुविषये तूष्णीं विवृत्य स्थितां
व्यावर्त्य प्रणयात्प्रसाद्य च शनैः कान्तां निजां चेतनाम्।
चुम्बन्तो विगलद्विभागनिबिडाश्लेषोल्लसन्नूतना-
नन्दस्पन्दनिमीलिताक्षमनिशं भूयास्त भव्याशयाः ॥ ३ ॥

अत्युक्तं यदिहास्त्यनुक्तमपि यद्यद्वा दुरुक्तं बुधै-
स्तत्सूक्ष्मांशनिरूपणैकनिभृतप्रज्ञैरवज्ञायताम्।
पुष्पान्तमकरन्दसारकणिकास्वादोत्सुकाः कानने
किं विन्दन्ति कठोरकण्टकशिखास्पर्शव्यथां षट्पदा ॥ ४ ॥

निहितिः स्थापना येन अर्थात्तस्यैव ज्ञानधनस्य, तस्य स्वामिनः श्रीवसुगुप्ताभिधानस्य गुरोर्यथैव तच्छिवाय जातं तद्वदधिकारिनियमसंकोचाभावात्सर्वलोकस्यापिहृद्गुहान्तकृतनिहितेर्यत्नादसामयिकात् गोपयतः दृढप्रतिपत्त्या च स्वात्मीकुर्वतः सदा शिवाय भवति नित्यशंकरात्मकस्वस्वभावसमावेशलाभाय सम्पद्यत इति शिवम् ॥ २ ॥

यद्यप्यस्मिन् विवृतिगणना विद्यते नैव शास्त्रे
लोकश्चायं यदपि मतिमान् भूयसोत्तानवृत्तिः।
जानन्त्येते तदपि कुशलास्तेऽस्मदुक्तेर्विशेषं
केचित्सारग्रहणनिपुणाश्चेतनाराजहंसाः ॥ १ ॥

अनन्तापरटीकाकृन्मध्ये स्थितिममृष्यता।
विवृतं स्पन्दशास्त्रं नो गुरुणा नो, मयास्य तु ॥ २ ॥
विशेषलेशः सन्दोहे दर्शितः पूर्वमद्य तु।
रुद्रशक्तिसमावेशशालिनः शिवरूपिणः ॥ ३ ॥
शूरनाम्नः स्वशिष्यस्य प्रार्थनातिरसेन तत्।
निर्णीतं क्षेमराजेन स्फारान्निजगुरोर्गुरोः ॥ ४ ॥

शशिज्योतिर्दीपप्रभृतिभिरशक्यं शमयितुं
यदासीन्निःस्पन्दीकृतसकललोकं किल तमः ।
गते तत्रेदानीं क्षयममलसूर्यागमहते
कृतार्थाः संकोचं विजहतु विनिद्रा जनदृशः ॥ ५ ॥
जयति जनमरिष्टादुद्धरन्ती भवानी
जयति निजविभूतिव्याप्तविश्वः स्मरारिः ।
जयति च गजवक्त्रः सोऽत्र यस्य प्रसादा-
दुपरमति समस्तो विघ्नवर्गोपसर्गः ॥ ६ ॥

संपूर्णा इयं वृत्त्यनुसारिणी स्पन्दविवृतिः
कृतिस्तत्रभवतो महामाहेश्वराचार्यशिरोमणिराजानक-
श्रीमदुत्पलदेवपादपद्मानुजीविनो राजानकश्रीरामकण्ठस्य

॥ इति शिवम् ॥

येषां नो धिषणोपदेशविशदा सद्देशिकैर्दर्शिता
श्रीयच्छाम्भवशासनोपनिषदा येषां न भग्नो भ्रमः ।
ये नास्वादितपूर्विणो मृदुधियः श्रीप्रत्यभिज्ञामृतं
ते नात्राधिकृताः परैः पुनरिदं पूर्णाशयैश्चर्व्यताम् ॥ ५ ॥
शिवादिक्षित्यन्तो विततविततो योऽध्वविभवः
स्फुरन्नानासर्गस्थितिलयदशाचित्रिततनुः ।
इयद्विश्वं यस्य प्रसरकणिकासौ विजयते
परः संवित्स्पन्दो लसदसमसौख्यायतनभूः ॥ ६ ॥

समाप्तोऽयं श्रीस्पन्दनिर्णयः

कृतिः श्रीप्रत्यभिज्ञाकारप्रशिष्यस्य महामाहेश्वराचार्यश्रीमदभिनवसुगुप्त-
नाथदत्तोपदेशस्य श्रीक्षेमराजस्येति शिवम् ।

श्रीमद्वसुगुप्ताचार्यविरचिता

# स्पन्दकारिका

श्रीमदुत्पलाचार्यविरचिता

## स्पन्दप्रदीपिकायुता

यत् परापरभूस्पर्शि यत्सङ्कल्पाल्लयोदयौ ।
स्पन्दसंज्ञं ज्ञरूपं तच्छक्तीशं स्वबलं नुमः ॥
नत्वा विकल्पविलसत्सत्स्वभावगुरुं गुरुम् ।
भुक्तिमुक्त्यै युक्तियुक्तं किञ्चिद्वच्म्यर्थितोऽर्थिभिः ॥
ज्ञानान्तराणि सन्त्याशु नात्यन्तसुखदानि तु ।
मुक्तात्मकज्ञानममृतं सुरसेष्विव मृत्युजित् ॥
चिन्तामणिस्त्वेक एव सगुणेष्वमणिष्विव ।
तेजस्विषु यथैकोऽर्को निःशेषध्वान्तहा तथा ॥
नारायणस्थानसंस्थद्विजवर्यत्रिविक्रमात् ।
जातो जनानुग्रहार्थं व्याख्याति स्पन्दमुत्पलः ॥
मायाश्यामतमच्छन्न आत्मचिन्तामणिर्यतः ।
न दृश्यतेऽतस्तत्प्राप्त्यै ग्राह्या स्पन्दप्रदीपिका ॥
अयमत्र किलाम्नायः सिद्धमुखेनागतं रहस्यं यत् ।
तद् भट्टकल्लटेन्दुर्वसुगुप्तगुरोरवाप्य शिष्याणाम् ॥
अवबोधार्थमनुष्टुप्पञ्चाशिकयाऽत्र सङ्ग्रह कृतवान् ।
यदपि तदर्थो व्याख्याज्योत्स्नाप्रकटीकृतोऽस्ति तेनेषत् ॥
मोहनिशामध्यगता मन्ददृशस्तदपि नार्थमीक्षन्ते ।
सूक्ष्मं दीपिकयाऽन्ते स्वतस्तदुद्दीपनार्थमहमद्य ॥
स्वोद्यन्तृतः स्वरूपस्पन्दोल्लासेन चोदितश्च यदा ।
परवश इव प्रवृत्तस्तदा न गर्वान्मयेयमारब्धा ॥

( कलापकोऽयम् )

अत्रादौ तावत्सम्बन्धाऽभिधेयविषयप्रयोजनप्रयोजनानीति षडुच्यन्ते । यतस्तैर्विना श्रोतॄणां शास्त्रं प्रत्यनादर एव स्यादप्रयत्नश्च । इहैवोक्तं हि—

'प्रयत्नेन परीक्ष्यं तत्त्वमादरात्' इति ।

शास्त्रमन्तरेण च हेयोपादेयविचारमात्रमपि न भवेत् । किं पुनस्तत्त्वपरीक्षणम् । तथा चोक्तमागमरहस्यस्तोत्रे—

**साक्षाद्भवान् यदि विधाय न मूर्तिमाद्यां**
**तत्त्वं निजं तदवदिष्यदतोऽतिगुह्यम् ।**
**नाज्ञास्यत त्रिभुवनं ध्रुवमन्धमूक-**
**कल्पं समस्तमसमञ्जसतामयास्यत् ॥** इति ।

षाड्गुण्यविवेकेऽपि--

**साक्षात् त्वमेव वा शास्त्रं त्वदीयैव हि सा मतिः ।**
**शब्दद्वारेण सङ्क्रम्य संस्करोत्यधिकारिणः ॥**

पञ्चरात्रश्रुतावपि—

'यद्वत् सोपानेन प्रासादमारुहेत् प्लवेन वा नदीं तरेत् तद्वच्छास्त्रेणैव हि भगवान् शास्ताऽवगन्तव्यः' इति ।

तत्रामीषां शास्त्राणां सम्बन्धस्तावत् पञ्चविधः। परो महान् दिव्यो दिव्येतर इतरेतरश्चेति । तत्रेह सिद्धपुरुषयोः प्रायेण दिव्येतरः । अथ वाच्यवाचक-लक्षणः । वाच्योऽर्थः । वाचकं शास्त्रम् । स्पन्दाभिधोऽर्थोऽत्र वाच्यः । तद्वाचकत्वाद् उपचारात् स्पन्दस्याप्येतत्संज्ञा । स्पन्दशब्दस्यार्थो यद्यप्याद्यश्लोके युक्त्यैवोक्तः, तथापि धात्वर्थेन सहोच्यते ।

**'स्पदि किञ्चिच्चलने'** इति ।

स्पन्दनात् स्पन्दः। स्पन्दनं च निस्तरङ्गस्यास्य तावत् परमात्मनः युगपन्निर्विकल्पा या सर्वत्रौन्मुख्यवृत्तिता । तस्मात्—

**शान्तषाड्गुण्यरूपस्य यत् स्फुरन् प्रतिभोदयः ।**
**स चाऽऽत्मबलशक्तीशश्चिद्रूपः स्पन्दसंज्ञकः ॥** इति ।

अतश्चाऽस्मत्पितुर्मातामहाचार्येण महाबलेन—

**'यथार्थनाम्न कोधे'**

इत्यादिनोक्तो विभवोदयो रहस्यस्तोत्रे । उक्तं चेश्वरप्रत्यभिज्ञायाम्--

**या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता ।**
**अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ॥**
**व्यापकत्वात्स सामान्यः सर्वसाधारणादपि ।** इति ।

अस्य च—

**स्पन्दः सामान्यपूर्वश्च शुद्धात्मा शङ्करः शिवः ।**
**भावः स्वभावस्तत्त्वं च ज्ञातेत्याद्यभिधाः स्मृताः ॥** इति ।

अन्यच्च, चित् संविद् ज्ञानं बोधश्चेति पर्यायाः। एष एव निरावरण-चित्स्वरूपत्वाद् दिक्कालाद्यनवच्छिन्नप्रसरोऽद्वितीयः स्वानुभवैकप्रमाणः शक्ति-चक्रेश्वर आत्मचिन्तामणिरुपेयतयाऽभिधेयः। कुतोऽस्य चिन्तामणित्वम् ? इति चेत्। शास्त्रात्। श्रीपौष्करायां ह्युक्तम्—

चिन्तामणौ स्वरूपेण न किञ्चिदुपलभ्यते।
अथ चाभिमतं सूते ब्रह्मैवं सर्वशक्तिकम्॥ इति।

परमार्थसारे च—

सर्वाकारो भगवानुपास्यते येत येन भावेन।
तं तं भावं भूत्वा चिन्तामणिरिव समभ्येति॥ इति।

ज्ञानसम्बोधेऽपि—

स्वभावादेकरूपापि नानात्वं प्रतिपद्यते।
ज्ञानस्य शक्तिः सङ्कल्पैर्लक्ष्मीश्चिन्तामणेरिव॥ इति।

अस्य च शास्त्रकारेणान्वर्थसंज्ञयाऽऽत्यन्तिकश्रेयकरत्वात् शिवशङ्करशब्दाभ्यां निर्देशः कृतः। वस्तुतस्तु निर्नामिक एव सः। प्रोक्तं चैतत्सिद्धनाथेन अभेदार्थ-कारिकासु—

वस्तुनो भावशून्यस्य त्वग्राह्यस्य निराकृतेः।
कल्पनामात्रमेवैतत् यच्छिवव्यपदेशनम्॥
नेत्थं विभोर्विवर्तोऽस्ति परिणामश्च न क्वचित्।
अथवा द्वयमप्यस्तु तथाप्यस्य न खण्डना॥ इति।

संवित्प्रकाशेऽपि—

इति निर्मलबोधैकरूपे देहपरिग्रहः।
विवर्तपरिणामाभ्यां द्वाभ्यामप्युपपद्यते॥
विवर्तोऽप्यतथारूपस्तथा भासि त्वमच्युत।
परिणामे स एव त्वं सुवर्णमिव कुण्डले॥ इति।

ननु कथमस्य निरावरणत्वम् ? यतः सुखदुःखमोहात्मकगुणादिस्पन्द-निस्पन्दैरावृतमेव पश्यामः। अत्रोच्यते। एते हि ज्ञेयत्वात् स्वयं निःसत्ताकाः। ज्ञातृसंश्रयात्तु लब्धप्रतिष्ठा इवाप्रबुद्धबुद्धीनां स्वं शुद्धबुद्धस्वरूपं विहाय अहम्प्रत्य-येन कामकामात्तादात्म्यं प्रतिपन्नानां निजधर्मैरधिकस्य सङ्कोचरूपतामापादयन्ति, अविद्यारूपत्वात्। न पुनः स्वस्वरूपास्थितानाम्। उक्तं चेहाग्रे—

'गुणादिस्पन्द' इत्यादि।

धातुसमाक्षायां च—

अविद्याशकलस्यास्य स्थितं मेयत्वमात्मनः ।
गृहीतं न निजं रूपं शबलेन तदात्मना ॥
सा चाऽनृतात्मिकाऽविद्या नानृतस्य हि वस्तुता ।
नावस्तु वस्तुनो नाशं विकारं वा करोत्यतः ॥
नाच्छादितस्य तमसा रज्जुखण्डस्य विक्रिया ।
नाशो वा क्रीयते तद्वत् तद्वन्नाऽविद्ययाऽऽत्मनः ॥
नाऽतः स्वतो न परतो बन्धोऽस्य परमात्मनः ।
बद्धोऽथाऽविद्यया जीवो मुक्तिस्तस्य हि तत्क्षये ॥ इति ।

तत्त्वयुक्तौ च--

येन येन हि बद्धयन्ते जन्तवो रौद्रकर्म्मणा ।
सोपायो न तु तेनैव मुच्यन्ते भवबन्धनात् ॥ इति ।

कुलयुक्तौ च--

प्राणिनां पतनं येन तेनैवोत्पतनं स्मृतम् ।
अज्ञस्तु बद्धयते येन ज्ञाता तेनैव मुच्यते ॥ इति ।

तथा मायाऽपि--

सीदति येनैव जडः प्राज्ञस्तेनैव सन्तरति दुःखात् ।
पिण्डितमयोऽप्सु मज्जति तदेव पात्रीकृतं प्लवते ॥ इति ।

गीतासु चेद्दगेवाऽत्र युक्त्योपायः प्रदर्शितः—

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ।
( भ० गी० २।७० )

तथा--

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥ इति ।
( भ० गी० २।६४ )

अन्यच्च—

असंत्यक्तात्मभावानां विषयाननुगृह्णताम् ।
विज्ञातपरमार्थानां जीवतामेव मुक्तया ॥
ते चैवास्यात्मनः स्पन्दो नटस्येवान्यरूपता । इति ।

उक्तं च योगिनाथेन ह्येतच्चिच्छक्तिसंस्तुतौ—

तदेवं त्वत्प्रवृत्त्या त्वन्निवृत्त्या चोदयेतरे।
जुषन्ते येन तत्त्वानि तान्यतः स्पन्द एव ते॥
वैसादृश्येऽपि कार्यस्यास्यात्र दृष्टान्तमाह यत्।
ज्वलनाद् धूमोद्गतिरिव विविधाकृतिरम्बरे गता भाति।
तद्वद्विष्णोः सृष्टिः स्वभावजाऽद्वैतरूपेयम्॥
प्राश्यानश्चिद्रसस्यौघः साकारत्वमुपागतः।
अवश्यायः प्रबोधार्के तूदिते स्वस्वभावभाक्॥

इत्यलमतिविस्तरेण, ग्रन्थगौरवभयात्। इह चैतदेवाऽऽसमाप्तेर्विचार्यते। उपायोपेयप्रतिपादनमेव शास्त्रस्य प्रयोजनम्। या तदवबोधादुपेयस्वरूपापत्तिः स्थिरा तदेव प्रयोजनप्रयोजनमिति। अस्य चेदं दर्शनं स्वतन्त्रम्। प्रागुक्तोपपत्त्या सर्वशास्त्रसमुद्भूतं चाद्वैतप्रतिपादकत्वं निर्बाधमेव। यतो विमर्शात्मस्पन्दभूम्युपारोहात् पश्यन्त्यादिक्रमेण वाक्प्रसवलाभः। उक्तं च संवित्प्रकाशे—

संविन्मूलाद् वर्णरूपाज्ज्ञानस्तम्भात् सरस्वती।
प्रागघोषा सनादाऽनु पुण्यतीर्था प्रवर्तते॥
तत्प्रवृत्त्या प्राणयति शक्तिः सा विश्वमोजसा।
प्रतियान्ति पुनस्त्वासां संकोचयति संभवम्॥
कार्याऽनुरूपं सा रूपं तथा नामापि बिभ्रती।
निर्वाहयति विश्वस्मिंश्चित्रां यात्रां चराचराम्॥ इति।

तद्विना च सर्ववादिनां सत्तैव नास्ति। अतस्ते निरस्ता एव स्थिताः। अत एवेश्वरप्रत्यभिज्ञायामादिसिद्धिरित्युक्तम्--

कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः॥ इति।

तदप्यत्र ये मोहाद्विप्रतिपद्यन्ते तेष्विदमापतितम्। यथा कश्चिन्माण्डलिको राजा चक्रवर्तिनः सकाशात् किञ्चिच्चतुरङ्गादिसाधनं प्राप्यानन्तरं साम्राज्यजिगीषया तेनैव सह युद्धं कर्तुमिच्छति, तदात्मविनाशायैव तस्य स्यात्। एवं तेषामपि तत्। इत्यमप्यस्याजय्यत्वं सिद्धमेवेति।

अथ संग्रहग्रन्थकृता समग्रमप्यग्रन्थार्थं गर्भीकृत्य ग्रन्थनिष्पत्त्यर्थमभिमतदेवतां स्तोतुं य। श्लोक उपन्यस्तस्तस्यार्थः प्राक् श्लोके ध्वनितोऽपि वितत्योच्यते--

यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शङ्करं स्तुमः ॥१॥

तं भगवन्तं स्तुमो नुमः। भोगापवर्गाख्यं शं श्रेयः सुखं वा करोतीति शङ्करः। अमलः स्वस्वभावो यः प्रागभिधेयतयोपात्तः। इह हि जीवन्मुक्ततैव मोक्षः। उक्तं चेहाग्रे--

'इति वा यस्य संवित्तिः' इत्यादि ।

तस्याश्चैतद् द्वयमप्यन्तःस्थम्। यतः सा ज्ञत्वकर्तृत्वभोक्तृत्वेश्वरतारूपा। उक्तं चेह--

'तदास्याकृत्रिमो धर्मः' इत्यादि ।

तथा--

'यदा त्वेकत्र' इत्यादि ।

सर्वज्ञभैरवे च--

नान्यत्र गदनं स्थानं मोक्षोऽस्ति सुरसुन्दरि ।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते ॥ इति ।

मोक्षधर्मेषु--

चित्तमेव हि संसारो रागादिक्लेशभूषितम् ।
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥ इति ।

बौद्धे च--

रागादिमलिनं चित्तं संसारस्तद्विविक्तता ।
संक्षेपात् कथितो मोक्षः प्रहीणावरणैर्जिनैः ॥ इति ।

नारदसंग्रहे च--

सर्वो विकल्पः संसारो नान्यो बन्धो विकल्पतः । इति ।

ग्रन्थकर्तुश्च स्वस्वभावसम्बोधने--

बन्धनं बन्धकृद् बध्यस्त्रिष्वप्येको न भिद्यते ।
स्वविकल्पकृतैर्बन्धैर्बद्धयते त्वनिशं जगत् ॥ इति ।

आत्मसप्ततौ च--

वस्तुस्थित्या न बन्धोऽस्ति तदभावान्न मुक्तता ।
विकल्पघटितावेतावुभावपि न किञ्चन । इति ।

पञ्चरात्रेऽपि--

'त्रिविधो दोषः--स्वभावजस्तामसो विकल्पजो राजसः' इत्यादि, 'यावत्तेनैव देहेन वशीभवति भगवद्भूतस्तदा सर्वज्ञो भवति सर्वदर्शी सर्वेश्वरः सर्वशक्तिः'

इत्यादि। अत एवाऽत्र भगवच्छब्दः प्रयुक्तः। यतः--

**ऐश्वर्यस्य समग्रस्य ज्ञानस्य यशसः श्रियः।**
**वैराग्यस्य च मोक्षस्य षण्णां भग इति स्मृतः॥**
**भगवद्व्यतिरेकेण न च स्तुत्योऽस्ति मानिनाम्।** इति।

तत्स्वरूपानुप्रवेश एव स्तुतिः। अत्र त्वभिन्नत्वमेवाभिमतम्। अन्यथा कः स्तोता? कः स्तुत्यः? का वा स्तुतिः? यस्मात्--

**विरुद्धमेतदद्वैतात् स्वच्छायो यथा।** इति।

उक्तं च--

**वेद्यं स्वरूपतां नीत्वा यदा जानन्ति वेदनम्।**
**तदानीं वेद्यता का स्यात् का वा वेदनता परा।** इति।

केवलं त्वत्रं शब्दकृतो भेदः। सोऽपि विकल्पमूलत्वात्तेषाम्। उक्तं च--

विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः।
यथा राहोः शिर इति धारा वा सर्पिषो यथा॥ इति।

अन्यच्च--

**यदभिन्नं स्वसंवित्तौ तत् परस्य यदोच्यते।**
**तदभिन्नमिवाभाति शाब्दीं भूमिमुपागतम्॥** इति।

उक्तेर्विना व्यवहारोऽपि न निर्वहति। उक्तं संवित्प्रकाशे—

वागेवास्याः कारणं विश्ववृत्तेर्न्याय्यं चैतन्नागमः केवलोऽयम्।
नासङ्कल्पं किञ्चिदस्तीह कार्यं वाचं विना न विकल्पोऽस्ति कश्चित्। इति

एषाऽपि बोधमूलेति प्रागेवोक्तम्। अन्यच्च जयाख्यसंहितायाम्—

**निष्कम्पबोधसामान्य मात्रा पुरा स्वयम्।**
**ये शब्दजनिता भावाः सूक्ष्मसूक्ष्मतराऽखिलाः॥**
**सामान्यबोधशब्दस्य पश्यतस्त्वेकतां गताः।**
**यदाऽभिमुखमायान्ति सङ्कल्पाद्युत्थितस्य च॥**
**शब्दरूपपदार्थस्य शब्दः स परमः स्मृतः।**

सङ्कल्पपदवीरूढः स्फुरत्यन्तः स्थितः स्फुटम् ॥
पदार्थोपरमः शब्दो मध्यमं स्मृतः ।
चिद्वायुकरणोत्थासु प्रयत्नपदवीषु च ॥
वाच्यवाचकभावेनाऽभिव्यक्तः स्थूल उच्यते ।
दृश्यादृश्येषु भावेषु योऽभिव्यक्तिं प्रयाति च ॥
स तु स्थूलतरश्चैव व्यवहारेऽखिले स्थितः । इति ।

अन्यत्रापि--

शरीरजो वा शाब्दो वा मानसो वा समुद्गतः ।
व्यवहारोऽप्यसौ नास्ति यत्र त्वं नाथ नाग्रगः ॥ इति ।

उपपन्नमेतत् । तं स्तुम इत्युक्तम् । तं कम् ? यदुन्मेषादौन्मुख्याज्जगतो विश्वस्योदयः प्रभवः सन्ततिरिति यावत् । निमेषाद्विश्रामात् प्रलयोऽप्ययः । न ह्येतद्व्यतिरिक्तस्य जगतोऽस्त्युदयोऽप्ययो वा ।

किन्त्वीशशक्तिप्रसरविरामौ प्रभवाऽप्ययौ ।

इति सिद्धम् । उक्तं च--

समुदेति जगदशेषं तवोदयविकलसंविदाकारे ।
अस्तं याति समस्तं पुनरपि निजरूपरूढायाः ॥ इति ।

ग्रन्थकृताप्युक्तं तत्त्वविचारे--

शक्तिप्रसरसङ्कोचनिबद्धावुदयव्ययौ ।
यस्यात्मा स शिवो ज्ञेयः सर्वभावप्रवर्तकः ॥ इति ।

कक्ष्यास्तोत्रेऽपि—

त्वदाशयोन्मेषनिमेषमाशमयौ जगत्सर्गलयावितीदृक् ।
स्फुटे स्फुटं त्वन्महिमाऽवभाति विचित्रनिर्माणनिदर्शनेन ॥
ज्ञानक्रियादिगर्भेच्छाशक्तिर्यः प्रसरात्मकः ।
सङ्कल्पोक्तः स उन्मेषः प्रोक्तं ह्येतत् स्वतन्त्रके ॥
यत्र यत्र भवेदिच्छा ज्ञानं तत्र प्रवर्तते ।
क्रियाकरणसंयोगात् पदार्थस्योदयो भवेत् ॥ इति

तद्विरतिश्च निमेषः । उदयप्रलयाविति वक्तव्ये प्रलयोदयाविति यदुक्तं तद्वृत्तभङ्गभयात् । विपर्ययेण चोन्मेषशब्दस्य मङ्गलार्थत्वादादिप्रयोगः । सृष्टेश्चाद्यत्वात् ।

यस्माद्वस्त्वभिधेयं नातः शब्दक्रमेऽत्र भवबन्धः ।
तत्पक्षो नीचः स्याद्ये तु ब्रुवते यथासंख्यम् ॥ इति

आभ्यामस्य जगत्सृष्टिसंहारयोः कारणभावः प्रोक्तो भुक्तिमुक्ती च। तत्रोन्मेषाद्भोगो नानाविधः। निमेषान्मोक्षो निस्तरङ्गरूपता। अन्यच्च। तं किंभूतम् ? शक्तिचक्रविभवप्रभवमिति।

**इच्छाख्यैका विभोः शक्तिः प्राग्द्विधा ज्ञ-क्रियाभिदा।** इति

तन्नानात्वं चक्रशब्देनोक्तम्। यदुक्तं मालिनीविजये--

**या सा शक्तिर्जगद्धातुः कथिता समवायिनी।**
**इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते॥**
**सैकाऽपि सत्यनेकत्वं यथा गच्छति तच्छृणु।**
**एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम्॥**
**ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते।**
**एवं भवत्विदं सर्वमिति कार्योन्मुखी यदा॥**
**जाता तदैव सा तद्वत् कुर्वन्त्यपि क्रियोच्यते।**
**एवमशेषा द्विरूपाऽपि पुनर्भेदैरनेकताम्॥**
**अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी।**
**तत्र मातृत्वमापन्ना पञ्चाशद्वर्णमालिनी।** इति

शक्तीनां चक्रं शक्तिचक्रं मातृवर्गः। तच्च मुख्यं चतुर्विधम्। उक्तं च--

**खेचरी गोचरी चाऽथ दिक्चरी भूचरीभिदा।**
**परादिभारतीसंस्थं शक्तिचक्रं चतुर्विधम्॥** इति।

तथा--

**आनन्देच्छाः ज्ञ-क्रियाख्यं खेचर्याद्यं चतुष्टयम्।** इति।

तस्य यो विभवो विभूतिर्विस्तरो वा तस्याऽपि प्रभवम्। प्रभवत्यस्मादिति प्रभव उत्पत्तिस्थानम्। यतः सर्वासां शक्तीनां सस्फारचिच्छक्त्यवगमनाच्छक्तित्वम्। सा च तदभिन्नैव। प्रोक्तं हि श्रीजयायाम्—

**तत्त्वनिर्मुक्तदेहस्य केवलस्य चिदात्मनः।**
**य उदेति महानन्दः सा शक्तिर्वैष्णवी परा॥** इति।

विष्णुयामले च--

**पाहि पाहिति वचनात्तत्त्राणात्तत्स्वविग्रहाः।**
**परापरबलस्पर्शात् स्वस्वरूपसमाश्रयात्॥**
**निहता दानववराः परं वीर्यं प्रकाशितम्।**
**तेन ता मातरः प्रोक्ता विश्वसंभवकारणात्॥** इति।

अत एव ग्रन्थकारेणासां विज्ञानदेहात्मकत्वमुक्तम्। अथवा अलमत्र। किमनेनासां रहस्यस्वरूपातिप्रकाशनेन योगिनीनां मुखगतेन। शक्तयश्च खेचर्याद्या वेच्छाद्या वा पराद्या वा अघोराद्या वा वामाद्या वा ब्राह्म्याद्या वा अन्या वैष्णव-शैव-सौर-बौद्धायुक्ता वा। अथवा 'शब्दराशिसमुत्थस्य' (स्पन्दप्रदी. श्लोक. सं. ४५.) इत्यादिना वक्ष्यमाणा अकाराद्यक्षररूपाः करणरूपा वा भवन्तु। एतावत् प्रयोजनमत्र आभिर्यदासां सर्वासां स्पन्दरूपो भगवानेव प्रभव इति प्रतिपादनम्। तथा च मायावामनसंहितायाम्--विष्णु-शिव-सूर्य-बुद्धादिरूपतया तत्तच्छक्तिचक्रपरिवारयुतस्तत्कारणं भगवानेक एव ध्यानभेदेनोपास्यत्वेनाभिहितः। उक्तं च कुलयुक्तौ--

वेदान्ते वैष्णवे शैवे सौरे बौद्धेऽन्यतोऽपि च।
एक एव परः स्वात्मा ज्ञाता ज्ञेयं महेश्वरि ॥ इति।

अन्यच्च--

'यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ। तं स्तुमः'

इत्येतावता सर्वमुक्तं स्यात्। अत्यन्तस्फुरणाच्छक्तिचक्रस्य। उक्तं हि रहस्यशास्त्रेषु--

शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते।
शक्तयश्च जगत् सर्वं शक्तिमांस्तु महेश्वरः ॥ इति।

यत्तु 'शक्तिचक्रविभवप्रभवम्' इति पदमुपन्यस्तं तदुद्देश्यार्थम्। साभिप्रायत्वान्महाकवेः। उक्तं च ध्वनौ--

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्तत् प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु ॥
तेनैतदेव शक्तीनां यतोऽन्तः प्रसरोदयौ।
तद्बलालम्भनात्तासां प्रभुत्वं प्राप्यतेऽचिरात् ॥ इति

उक्तं चेह--

अपि त्वात्मबलस्पर्शात् पुरुषस्तत्समो भवत्। इति
यदिदं पदमग्रेऽस्ति परीक्ष्यं तत्त्वमादरात्।
इतः प्रभृति सर्वत्रेहानुयोज्यं तु तद्बुधैः ॥

इति ॥ १ ॥

ननु संसरावस्थायां कथं तस्करताऽऽत्मनि।
इत्याशङ्क्योत्थदुर्दोषपरिहाराय तूच्यते ॥

**यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।**
**तस्यानावृतरूपत्वान्न निरोधोऽस्ति कुत्रचित् ॥२॥**

यत्र यस्मिन् स्पन्दतत्त्वे इदं सर्वं जगल्लक्षणं ज्ञानरूपतया शक्त्यात्मना स्थितं निमेषावस्थायां तस्यानावृतरूपत्वाद् बोधरूपतयाऽनाच्छादितस्वरूपत्वाद्धेतोर्न कुत्रचिन्निरोधोऽस्ति । यतो बोधस्य स्वयं सत्तैव नास्ति । अबोधृरूपमनावृतमेवावस्थाद्वयेऽपि । उक्तं च--

यथा हेम्नो रूपकेषु वैचित्र्यं स्वान्न रिच्यते ।
अथ नित्यस्वरूपस्य तथा ते विश्वरूपता ॥
यथा गलितरूपस्य हेम्नः पिण्डात्मना स्थितिः ।
तथा गलितवेद्यस्य तव शुद्धचिदात्मता ॥ इति ।

ज्ञानसम्बोधेऽपि--

विश्वस्याश्रय आकाशं न विश्वं नभसो भवेत् ।
ज्ञानं नभ इवानन्तं ज्ञेयं विश्ववदल्पकम् ॥
आकाशस्येव वाऽन्येन प्रतिबन्धो न केनचित् ।
व्यापित्वात् तद्वदस्याऽपि ज्ञानस्याऽप्रतिबन्धता ॥

इति ॥ २ ॥

सर्ववृत्त्युपसंहारो निरोधो मास्तु तस्य तु ।
जाग्रदाद्यास्ववस्थासु कुतः स्यादनिरुद्धता ॥—

**जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति ।**
**निवर्तते निजान्नैव स्वभावादुपलब्धृतः ॥३॥**

जाग्रदादिविभेदे प्रसर्पति प्रसरत्यपि सति तत् स्पन्दतत्त्वं निजादात्मीयात् स्वभावादुपलब्धृरूपात् स्वसंवित्स्वरूपान्नैव निवर्तते । कुतः ? उपलब्धृतो हेतोर्वा । यस्मादुपलब्धृरूपत्वं तिसृष्वप्यवस्थासु साधारणम् । उक्तं च--

अवस्थास्वेव भेदोऽयं नावस्थातुः कदाचन ।
यथा विषस्याङ्कुरादौ तच्छक्तेर्न तु भिन्नता ॥ इति ।

जाग्रत्स्वप्नयोस्तावत्संवेदनं सर्वेषां प्रसिद्धमेव सुषुप्तेरुत्तरकालं 'सुखमहमस्वाप्सम्' इत्याद्यज्ञस्याऽपि संवेदनान् संवेत्ता निर्दिष्ट एव भवति । उक्तं च--

वेल्लत्सु प्रतिबिम्बेषु जलस्पन्दानुवर्तिषु ।
यथेन्दोर्न क्रियावेशस्तथाऽत्र परमात्मनः ॥ इति ।

अन्यच्च, विभेदे विशेषेण भेदो विभेदः तस्मिन्। किंभूते ? तदभिन्ने। तस्यैव ताद्रूप्येणावस्थानात्। तथा च--

अक्षैर्योऽर्थग्रहो द्रष्टुस्तज्जाग्रदिति कथ्यते।
यत्तैर्विनार्थस्मरणं मनसा स्वप्नसंज्ञितम्॥
यत्रार्थस्मरणे नस्तत् सौषुप्तमुदाहृतम्।
शुद्धबोधैकरूपो योऽवस्थाता सैव तुर्यता॥

इति॥ ३॥

अवस्था एव विश्वान्तर्नावस्थातेति ये जगुः।
प्रत्यभिज्ञादियुक्त्येयं तन्निरासाय कारिका॥

अहं सुखी च दुःखी च रक्तश्चेत्यादिसंविदः।
सुखाद्यवस्थानुस्यूते वर्तन्तेऽन्यत्र ताः स्फुटम् ॥४॥

अहं सुखीत्याद्याः याः संविदः संवेदनानि अवस्थाः। ताः संविद्भ्योऽन्यत्र संवेत्तर्यवस्थातरि सुखाद्युपलब्धरि उपरागतया स्फुटं कृत्वा वर्तन्तेऽवतिष्ठन्ते। संवेत्तारं विना संवेदनस्याऽभावात्।

नद्योऽब्धाविव तादात्म्यं तत्प्रविष्टाः प्रयान्ति वा।
क्षणिकज्ञानिनां ह्येव न तु ता एव केवलाः॥ इति।

यस्मात्—

कार्यकारणभावो हि बाध्यबाधकताऽपि च।
पूर्वापरैकमातारमन्तरेण प्रसिद्ध्यतः॥ इति।

तत्र हि--

प्रामाण्यं क्षणिकत्वेन प्रत्यक्षेणोपपद्यते।
प्रागभावादुत्तरज्ञानदार्ढ्यात् प्रामाण्यसिद्धितः॥
प्रतिक्षणमथान्यत्वात् सामान्यस्याग्रहे सति।
विलक्षणाः क्षणाः सर्वे प्रामाण्ये किं निबन्धनम्॥
सम्बन्धस्याग्रहश्चापि तेन मानस्य का गतिः।
मिथ्याज्ञानस्य मिथ्यात्वं ब्रूहि वा किंनिबन्धनम्॥
क्षणान्तरे शुक्तिकायां रजतं केन वार्यते।
भिन्नज्ञानस्य कर्तृत्वे सर्वं प्रामाण्यमाप्नुयात्॥
अन्यस्वरूपसंसिद्धावन्यसिद्धिर्भवेद्यदि ।
घटस्वस्वरूपसंसिद्धौ पटस्यावगमो भवेत्॥

योऽयं स एवाऽयमिति प्रत्ययः स्थिरकालजः ।
कर्तुं शक्यो न तद्वादिप्रामाण्यात् क्षणिकैस्ततः ॥
प्राग्विज्ञानस्मृतिं प्रत्यभिज्ञा नित्यं प्रतिष्ठिता ।
अतो नित्यस्वभावस्यैवात्मनः कर्तृतोदिता ॥ इति

किं वा बहूक्त्या--

एकप्रमात्रभावात् स्यात् क्षणिकत्वादनिश्चयात् ।
प्रमाणमप्यप्रमाणं स्याद् बौद्धानां हि निराश्रयम् ॥ इति

उक्तं च बौद्धायनसंहितायाम्--

कार्यकारणभावस्तु नास्ति ज्ञाने क्षणक्षयः ।
क्षणं द्वितीयं नास्ते चेत् स्मृतिबीजं कथं भवेत् ॥
जनकं तत् कथं नष्टमनष्टं वाप्यनष्टकम् ।
नष्टस्य जनकत्वं चेदभावाद्भावसन्ततिः ॥
द्वितीयं यत्क्षणं तिष्ठेत्तदाऽऽस्ते शतमप्यथ ।
जनकत्वेऽर्थनिष्ठस्य अर्थे नाऽभावमेति तत् ॥
तस्माद्भावाः स्थिराः सर्वे न च्यवन्ते स्वरूपतः ।
आत्मावबोधविषये स्वस्थिरा क्षणिका न ते ॥
बाध्यबाधकभावोऽपि न स्यान्निश्चायकं विना ।
शुक्तौ हि रजतज्ञानभ्रान्तिभङ्गोऽस्ति नान्यता ।
तस्माज्ज्ञानं नित्यमेकं क्षणिकानि बहूनि नो ॥

सत्कार्यसिद्धौ च--

न हि स्वनिष्ठे विज्ञाने इतरेतरवेदनम् ।
तस्मात् पूर्वापरावस्था ( प्रमाण )परिपिण्डितः ॥
एकः प्रमाता चित्राभिर्वृत्तिभिर्व्यवहारभाक् । इति ।

प्रत्यभिज्ञायां च--

एवमन्योन्यभिन्नानामपरस्परवेदिनाम् ।
ज्ञानानामनुसन्धानजन्मा नश्येज्जनस्थितिः ॥
न चेदन्तःकृतानन्तविश्वरूपो महेश्वरः ।
स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहनशक्तिमान् ॥ इति।

गीतास्वपि--

'मत्तः स्मृतिर्ज्ञानमपोहनं च',
( भ० गी० १५-१५ )

इत्यलं कुतर्काश्मनां चर्वणेन । अन्यच्च, किंभूते संवेत्तरि ? सुखाद्यवस्थासु बोद्धृरूपताऽनुस्यूतेऽनुविद्धे । मणिषु सूत्रमिव सदानुस्यूते एव सर्वास्ववस्थासु । यस्माद्य एवाहं प्राक्सुखी स एवाद्य दुःखी । आदिग्रहणाद्रक्तोऽहं विरक्तोऽहं मूढोऽहं प्रबुद्धोऽहं धनादिमानहमिति स्मृतिप्रत्यभिज्ञानुसन्धानात् । नन्वेवमसौ सावरणः । नैतत्सत्यम् । विकल्परूपतया तासामनित्यत्वात् । तद्व्यतिरिक्तत्वाच्च संवेत्तुः तास्वविद्यावरणादुपरागमात्रस्य । उक्तं च भर्तृहरिणा--

नाच्छादितस्य तमसा रज्जुखण्डस्य विक्रिया ।
नाशो वा क्रियते यद्वत्तद्वन्नाविद्ययाऽऽत्मनः ।। इति ।

संवित्प्रकाशे च--

अत्यन्ताच्छस्वभावत्वात् स्फटिकस्य यथा स्वकम् ।
रूपं परोपरक्तस्य नित्यमेवोपलभ्यते ।।
तथा भावसमासक्तं भगवँस्तावकं वपुः ।
अत्यन्तनिर्मलतया पृथक् तैर्नोपलभ्यत ।।
नैतावताऽसौ स्फटिकः पृथङ्नास्त्येव रञ्जकात् ।
भावरूपपरित्यक्ता तव वा निर्मला तनुः ।। इति ।

तथा--

उपरागेऽपि शुद्धत्वं न त्यक्तमनया प्रभो ।
परित्यज्य निजं रूपं संविदाख्या कुतश्च यत् ।।
अथाऽप्राप्यैव तद्रूपं भवेद्रूपान्तरानुगा ।
तद्रूपापि हि दृश्येत् कारणेऽस्याऽपि सम्भवात् ।

तथाऽत्रैव--

सदैव शुद्धोऽनुभवो यं प्रत्याकारकर्बुरः ।
आकारान्तरसञ्चारकाले तस्यापि निर्मलः ।।
यथा जात्या सितं वस्त्रं रक्तं रागेण केनचित् ।
तत्पदप्राप्तशुक्लत्वं पुनः रागान्तरं श्रयेत ।।
एवं शुद्धा चितिर्जात्या यदाकारोपरागिणी ।
तत्यागापरसञ्चारमध्ये शुद्धैव तिष्ठति ।। इति ।

तथा--

नीले पीते सुखे दुःखे चित्स्वरूपमखण्डितम् ।
विशिनष्टि विकल्पस्तच्चित्रयोपाधिसम्पदा ।।

इति ।। ४ ।।

तद्व्यतिरिक्तस्य च रूपमाह--

**न दुःखं न सुखं यत्र न ग्राह्यं ग्राहकं न च।**
**न चास्ति मूढभावोऽपि तदस्ति परमार्थतः ॥ ५ ॥**

तत् स्पन्दतत्त्वं परमार्थतोऽस्ति नित्यत्वात्तस्य। यत्र न दुःखमाध्यात्मिकादि। न सुखं वैषयिकम्। न ग्राह्यं घटपटादि न ग्राहकमहमिदं गृह्णामीति प्राकृतं सविकल्पाहङ्काररूपत्वमविद्यात्मकत्वादहङ्कारस्य। न त्वनेनाधिष्ठातृरूपस्य ग्राहकस्याभाव उक्तः। उपेयत्वात्तस्य। उक्तं च तत्त्वगर्भे--

परमार्थेन न ग्राह्यं ग्राहकं वा न किञ्चन।
यस्मादृते तत् स्वाभासमस्वाभासमिवेक्ष्यते ॥ इति।

एवं तर्हि तत् पाषाणप्रख्यं मूढत्वमेव शून्यं वा? अत्रोच्यते--'न चास्ति मूढभावोऽपि' इति। कुतः चिद्रूपत्वात्। उक्तं च मुनिना--

यथा शीतोष्णयोर्मध्ये काले नोष्णो न शीतलः।
एवं हि सुखदुःखाभ्यां हीनमस्ति पदं विभोः ॥ इति।

स्तुतौ च--

समुदेति यथा भावर्धिना भानुर्नभस्तले।
वेद्यं विनैव भगवन् भवान् केन स्वतोदयः ॥ इति।

तथा--

यथोद्धृतविशेषस्य सामान्यस्य निजा स्थितिः।
पृथङ् न शक्या निर्देष्टुं न च तत्रास्ति तावता ॥
एवं नित्या निजा शुद्धा सुखदुःखाविशेषिता।
स्वसंवेदनसंवेद्या तव संविन्मयी स्थितिः ॥ इति।

नागार्जुनेनाऽप्युक्तम्--

सर्वालम्बनधर्मैश्च सर्वतत्त्वैरशेषतः।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः ॥ इति।

आलोकमालायां च—

विरुद्धत्वात्तमोवृत्तेर्निविकामं ददाति या।
साऽवस्था काऽप्यविज्ञेया मादृशां शून्यतोच्यते ॥
न पुनर्लोकरूढयैव नास्तिक्यार्थानुपातिनी।

इति ॥ ५ ॥

अत्रास्याऽमूढत्वाऽस्तित्वयोः सन्दानितकेनोपपत्तिमाह--

यतः करणवर्गोऽयं विमूढो मूढवत् स्वयम् ।
सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृतीः ॥ ६ ॥
लभते तत् प्रयत्नेन परीक्ष्यं तत्त्वमादरात् ।
यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ॥ ७ ॥

यतो यस्मात् स्पन्दतत्त्वादयं बाह्यः करणवर्गो बुद्धिकर्मेन्द्रियाख्योऽन्तःकरणचक्रेण सह विशेषेण मूढचेतनो विचेतनवत् स्वयं प्रवृत्तिस्थितिसंहृतीर्लभते ।

एषोपपत्तिहेतुस्तु दृष्टान्तो भ्रामको मणिः ।
यथा वाताग्निसंपर्कादयःपिण्डोऽग्निवद्भवेत् ॥
दाहपाकप्रकाशादौ शक्तस्तद्वदयं गणः । इति ।

एवं योऽन्येषां चैतन्यापादने समर्थः स कथं निःस्वभावः ? उक्तं षाड्गुण्यविवेके--

स्वदेहसाक्षिकं चैतत् सर्वस्य ज्ञानचेष्टितम् ।
ज्ञानानधिष्ठितः कायो लुठत्येव यतो धृतः ॥
अत एव जडानामप्यधिष्ठातृकृता धृतिः ।
गम्यते गगने ग्रावा न धार्येताऽन्यथा कथम् । इति ।

तस्मात्तत् तत्त्वं प्रयत्नेनादरात्परीक्ष्यम् । प्रयत्न उद्योगरूप उत्साहः । आदरः श्रद्धा । अत्र च परीक्षणमुद्योगबलानुप्रवेशेन स्वीकरणम् । उक्तं चेह—

'अतः सततमुद्युक्तः' इत्यादिना ।

सिद्धोक्तं च--

अदृश्यं नेत्रवद् ब्रह्म द्रष्टृत्वं चास्ति नेत्रवत् ।
स्वात्मन्येवोपलम्भोऽस्य दर्शनं घटवन्न तु ॥ इति ।

यतो यस्मात्तस्येयमकृत्रिमा निजैव स्वतन्त्रता सर्वत्र । तेनैतदुक्तम् यथास्य करणादिषु चैतन्यापादने स्वातन्त्र्यं तथा परपुरादिष्वपि सम्भाव्यतेऽभ्यासात् ॥ ७ ॥

तदिच्छयास्तु सामर्थ्यं करणानां स्वतन्त्रता ।
सर्वत्रोक्ताऽस्य या सा तु भक्तियुक्तिरतस्त्वियम् ॥

नहीच्छानोदनस्यायं प्रेरकत्वेन वर्तते ।
अपि त्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत् ॥ ८ ॥

अयं पुरुषो जीवात्मा नेच्छानोदनस्य नेच्छाप्रेषणस्य करणचक्रचोदकस्यैव

केवलं प्रेरकभावेन वर्तते। हिशब्द एवशब्दार्थे केवल शब्दार्थे वा। अपित्विति निपातः प्रतिषेधनिवृत्तौ स्वरूपद्योतकः। आत्मनो बलमात्मबलं निरावरणचिद्रूपं ज्ञत्वकर्तृत्वलक्षणम्। तत्स्पर्शात्तदवष्टम्भात् तत्समो भवेत्। सर्वज्ञः सर्वकर्ता स्यादित्यर्थः॥ ८॥

अनेन सर्वं स्वातन्त्र्यमुक्तमस्य च तद्भवेत्।
अभिमानात्मकक्षोभक्षयेन त्वन्यमाह च॥—

निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः।
यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम्॥ ९॥

निजा सहजा। अनादिर्याऽशुद्धिरविद्याऽविवेकमूला भोगाभिलाषमलरूपतयाऽसमर्थस्य सङ्कुचितशक्तेः। अत एव च कर्तव्येषु कार्येष्वभिलाषिणः साभिलाषस्य सतो न कार्यमिच्छतोऽपि भवति। तथा च श्रीसात्वता—

अज्ञता व्यापकत्वं च सुखदुःखादिवेदनम्।
सर्वज्ञस्यात्मतत्त्वस्य कर्मचक्रावलम्बनात्॥
गतीस्त्वेषा प्रकृत्याख्या शुद्धिः प्राक्कर्मवासना।
मायाऽविद्या भ्रमो मोहो ज्ञानं मलमिति क्वचित्॥ इति।

गीतं च—

प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्॥ इति।
(भ० गी० १३।१६)

अनादित्वे समानेऽस्या विशेषोऽयं विचारतः। इति।

लयो यन्मायारूपत्वात्। तदुक्तं संवित्प्रकाशे—

मायात्वमेतदेव स्यान्नाशस्तत्त्वप्रदर्शनात्।
नहि विज्ञातरज्ज्वात्मा सर्पादीन्मन्यते पुनः॥ इति।

अन्यत्र च—

त्वत्तो द्वितीयमिह वस्तु यदस्ति किञ्चित्तद्विचारपदवीमवतारितं चेत्।
गन्धर्वपत्तनमिवोपलयं प्रयाति त्वं शिष्यसे ध्रुवमतस्तव शेषसंज्ञा॥ इति।

विद्याधिपतेश्च—

भक्षणप्रकृतिना समाधिना युक्तितो विषयधाम्नि भक्षिते।
सर्वभक्षपदवीमुपेयुषः शिष्यते परमभक्षितो भवान्॥
सा चेन्द्रजालिनो मायेवाऽऽस्थिता बाधकात्मनि।
यथाऽग्निर्धूमलेखेव मलवद्दर्पणस्य वा॥

**बुद्बुदाः सलिलस्येव तच्छान्ती निर्विकारिता।** इति।

यदा तु क्षोभो विकारोऽशुद्धिजनितो देहाहम्प्रत्ययरूपो विवेकेनात्मबलस्पर्शात् प्रलीयते प्रलयं याति तदा स्यात् परमं पदं स्वस्वरूपे स्थितिर्भवेदित्यर्थः। उक्तं षड्धातुसमीक्षायाम्—

**कर्माणि मोहमूलानि संसृतेः कारणं यतः।**
**तत्क्षयात् कर्मनिर्मुक्तः स्वस्थः शान्ततमस्ततः॥** इति।

नारदसंग्रहेऽपि—

**यथा सुभर्जितं बीजं नेह भूयः प्ररोहति।**
**विकल्पक्षीणचित्तस्य तथा भूयो न संसृतिः॥** इति।

स च क्षोभक्षयः शनैः शनैरभ्यासाद्भवेत्। उक्तं स्वात्मसंबोधे--

**यथाग्निपोत्रं ज्वलनोद्धृतं सच्छैत्यं प्रयायाच्छनकैर्न सद्यः।**
**अज्ञानपङ्केऽपि तथा निरस्ते कालेन कैवल्यमुपैति देही॥**

षाड्गुण्यविवेकेऽप्यात्मपरमात्मनोरेतावान् भेदोऽभिहितः--

**अविद्याकृतसङ्कोचगृहीताहंयुतास्य या।**
**तयाऽभिन्नोऽपि भिन्नोऽयं तत्त्वतः स्वप्नभीतवत्॥**
**अभीत एव यः स्वप्ने बिभ्यदभ्येति सम्भ्रमम्।**
**तस्य स्वाप्नादभिन्नस्य को भेदः पारमार्थिकः॥**
**तथा हि मिथ्यैव भयं ममेति यदि बुद्ध्यते।**
**स्वप्नतत्त्वं परामृश्य भीतिभिन्नैर्न बाध्यते॥**
**एवं त्वन्मत एवाऽहमिति भावनया त्वयि।**
**प्रलीनाऽहङ्कृतिग्रन्थिः पश्यत्येव त्वदात्मताम्॥** इति।

संवित्प्रकाशे च—

**कर्मेदं त्वत्कृतमपि त्वन्मयं येन माधव।**
**विहीनाऽहङ्कृति ततस्त्वमेव परिशिष्यसे॥**
**एतावतैव भेदोऽस्य यदहम्मानिताऽऽत्मनि।**
**सा चेद्विलीना त्वद्भक्त्या नष्टो भेदः स्थितैकता॥**

इति॥ ९॥

स्वरूपस्थस्य गुणानाह—

तदाऽस्याऽकृत्रिमो धर्मो ज्ञत्व-कर्तृत्वलक्षणः।
यतस्तदीप्सितं सर्वं जानाति च करोति च॥ १०॥

तदा तस्मिन् प्रलीनक्षोभात्मके कालेऽस्य आत्मनः स्वरूपस्थत्वात् अकृत्रिमः सहजो धर्मः स्वभावो भवतीति वाक्यशेषः। किंभूतः? जानातीति ज्ञः। तस्य भावो ज्ञत्वम्। करोतीति कर्ता। कर्तुर्भावः कर्तृत्वम्। आभ्यां यो लक्ष्यते, एते वा लक्षणं रूपचिह्नं यस्य धर्मस्य स ज्ञत्वकर्तृत्वलक्षणः। यतो यस्माद्धर्माद्धेतोर्वा यज्ज्ञातुमीप्सितमभिमतं तज्ज्ञानाय यत् कर्तुमिष्टं तत् करोति स्वात्मनो वा परस्य वा। पञ्चरात्रे चैष एव धर्मो विवेकजज्ञानशब्देनोक्तः—

'तस्य च प्रादुर्भवतः किं पूर्वरूपम्? यत् सर्वज्ञो भवति सर्वदर्शी सर्वेश्वरः सर्वशक्तिः' इति।

स चाऽस्य करणैर्विनाऽपि स्यात्। तत्रैवोक्तं हि—'तद्यथा अग्निर्नाम कस्मिंश्चिद्दाह्ये नान्यत्किञ्चिदुपादत्ते तेन धक्ष्यामीति स्वयमेव दहति। एवमयमात्माऽनुपादाय ज्ञाताऽनुपादायकारी स्वात्मनैव सर्वकरः' इति।

कुतः? बोधरूपत्वात्। षाड्गुण्यविवेके उक्तम्—

**नहि बोधो विचित्रार्थनिर्माणेऽन्यमपेक्षते।**
**सङ्कल्पादेव यो रूपसहस्राणि सृजत्यजः॥** इति।

ये त्वस्य ज्ञत्व-कर्तृत्वादीन्यन्यतो वदन्ति तेषामनीशतैव स्यात्। उक्तं ह्यागमरहस्ये—

येऽपीश्वरं व्यपदिशन्ति निमित्तहेतुं तैरर्पितः स्थलजलाञ्जलिरीशतायै। अन्याङ्गनोपगमनेन वशीकृतस्य कामीश्वरस्थितिममी बत सङ्गिरन्ते॥ इति। तस्माद्युक्तमुक्तम्॥ १०॥

अस्याऽकृत्रिमधर्मस्य स्थैर्यायोपाय उच्यते—

**तमधिष्ठातृभावेन स्वभावमवलोकयन्।**
**स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः॥ ११॥**

तं शुद्धमात्मस्वभावमधिष्ठातृभावेन चिद्रूपतया सर्वव्यापकत्वेनावलोकयन् पश्यन् प्रतिजानन् स्मयमान इव विस्मयाविष्ट इव विकसन्निव यस्तिष्ठति। तस्य अविद्याविलयादियं कुतः कुसृतिः? कुत्सितसंसरणं न कुतश्चिद् भवतीति वाक्यशेषः। उक्तं च शिवसूत्रेषु—

**विस्मयो योगभूमिका।**

अस्य चैतदवलोकनं यद् द्रष्टृरूपतयाऽनुभवनम्। उक्तं हीष्टोपदेशे—

**यदिदं दृश्यते दृष्टया ग्रहं पुत्राऽत्र सन्त्यज।**
**येन पश्यति तं पश्य यं दृष्ट्वा पश्यसेऽखिलम्॥** इति।

कर्त्रा चोक्तम्—

**यो जगु पश्चि एषु किंनु वीक्षोमाइत्थ करो ।**
**विषयालविलुद्दि एसे पत्तापत्त रावीक्षो अपलइयद अस्त्युबुद्दि ।।** इति ।

तथाऽस्यान्यतः कुतः साभिलाषतया विकल्पशिल्पादिकुमार्गानुसरणम् ? अपि त्वेवं सदैव स्वस्वरूपे स्थितिर्भवेत् । तत्स्थत्वाच्चेश्वरवत् सत्यसङ्कल्पः स्यादित्यतोऽस्मिन्नेवासती । यतोऽभ्यासं विना ज्ञातमपि स्वीकर्तुं न शक्यते । तदनन्तरेण च कुतः सिद्धिः ? । उक्तं मुनिना—

**यदि वाचनिकाज्ज्ञानान्मुक्तिः स्याद्भावनां विना ।**
**शारीरमानसैर्दुःखैर्मुच्येरन् सर्वजन्तवः ।।** इति ।

तथा च युक्तौ--

**रसायनं विनास्वादात् सूचितं ह्यपि सिद्धिदम् ।** इति ।

अन्यच्चोक्तम्--

**आगोपबालवनितं भगवंस्त्वमित्थं ज्ञातोऽप्युपायविरहान्न तु मोक्षदोऽसि ।**
**नान्तः स्थितं भवति धेनुषु तृड्विहर्तृ क्षीरं तदेव पुनरभ्यवहारतः स्यात् ।।**

इति ।। ११ ।।

**तान् ध्वंसयितुमाहेदं ये त्वाहुः शून्यवादिनः ।**
**अभावं भावयेत्तावद्यावत्तन्मयतां व्रजेत् ।।—**

नाऽभावो भाव्यतामेति न च तत्रास्त्यमूढता ।
यतोऽभियोगसंस्पर्शात् तदासीदिति निश्चयः ।। १२ ।।
अतस्तत्कृत्रिमं ज्ञेयं सौषुप्तपदवत् सदा ।
न त्वेवं स्मर्यमाणत्वं तत्तत्त्वं प्रतिपद्यते ।। १३ ।।

नाऽभावः शशविषाणसदृशो भाव्यतामनुभवविषयत्वमेति प्राप्नोति, अवस्तुत्वात् । न च तत्राऽभावे अमूढतास्ति, अपि तुमूढावस्थैव सा । यतोऽभियोगसंस्पर्शादभिलाषसंयोगात्तद्भावभावनमासीदभूत् । अतीतमिति निश्चयः । यस्मात् स मम शून्यावस्थातीतेति स्मर्यते । तदुक्तम्--

**अभावो येन भावेन बध्यतेऽस्ति न नास्ति सः ।**
**तस्य भावस्य सद्भावो वद केन निवार्यते ।।**
**सोऽस्त्यतश्चिन्मयो भावो येन सर्वं विभाव्यते ।** इति ।

अतो हेतोस्तदभावभावनं कृत्रिममनित्यं सदा ज्ञेयम् । किमिव ? सौषुप्त-

पदवत् सुषुप्तावस्थेव। न त्वेवं मूढावस्थावत्। तदा आत्मतत्त्वं स्मर्यमाणत्वं स्मर्तव्यतां प्रतिपद्यते गच्छति, स्मर्तृत्वाच्चिद्रूपस्य; नित्योदितत्वाच्च। तस्मात्तत्त्वं गुरूपदेशेनादरात् परीक्ष्यमिति ।: १२-१३।

एवम्—

**अवस्थाद्वयमात्राऽस्ति स्मर्तृ-स्मर्तव्यभेदतः।**
**यत्तस्य नित्यनित्यत्वविचारायेदमुच्यते ॥--**

**अवस्थायुगलं चाऽत्र कार्य-कर्तृत्वशब्दितम्।**
**कार्यता क्षयिणी यत्र कर्तृत्वं पुनरक्षयम् ॥ १४ ॥**

अत्रास्मिन् पूर्वोक्ते स्पन्दतत्त्वेऽवस्थायुगलं दशाद्वयं यदस्ति कार्य-कर्तृत्व-शब्दितं कार्यकारणसंज्ञितं भोग्य-भोक्तृभेदभिन्नदृश्यद्रष्टृभिदा वेद्यवेदकरूपम्। तत्र तयोरध्यासाद्या कार्यता सा क्षयिणी उत्पत्तिविनाशयुक्ता। यत्पुनः कर्तृत्वं तद-क्षयम्, निरवधि चित्स्वरूपत्वात् ॥ १४ ॥

**कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते।**
**तस्मिल्लुँप्ते विलुप्तोऽस्मीत्यबुधः प्रतिपद्यते ॥ १५ ॥**

अत एव--

अत्रास्मिन् कार्ये बाह्येऽर्थे क्षयिणि सति कार्योन्मुखः कार्यसम्पादनाभिमुखो यः प्रयत्नो बाह्यकरणव्यापाररूपः स केवलं लुप्यते न लक्ष्यते न्यग्भूयेव स्वात्म-न्यास्ते, स्थगितेन्द्रियस्य वा व्यापारासामर्थ्यात्। तस्मिन् प्रयत्ने लुप्ते सति अस्मि अहं विलुप्तो नष्ट इत्यबुधोऽज्ञः प्रतिपद्यते जानाति। न तु चिद्रूपस्य विनाशोऽस्ति। उक्तं च--

**विज्ञप्तेर्न विनाशोऽस्ति विनष्टेऽपि शरीरके।**
**अभावे सूर्यकान्तस्य नैवास्ति सवितुः क्षतिः ॥**

इति ॥ १५ ॥

कस्माच्चेत्याह--

**न तु योऽन्तर्मुखो भावः सार्वज्ञादिगुणास्पदम्।**
**तस्य लोपः कदाचित् स्यादन्यस्यानुपलम्भनात् ॥ १६ ॥**

देशकालादिविच्छिन्नस्य कार्यस्यैव लोपो निवृत्तिर्न तु योऽन्तर्मुखी भावो बहिरप्रसृतेः स्वस्वरूपस्थः स्वस्वभावः सर्वज्ञतादीनां गुणानामास्पदमाश्रयस्तस्य

भावस्य लोपः कदाचित्स्याद्भवेद् उपपद्यते। कुतो न स्यात्? चिद्रूपं मुक्त्वाऽन्यस्य द्वितीयस्यानुपलम्भनाद् अनुपलब्धेः। तस्यैव हि सर्वत्र सर्वदोपलब्धिः। एतदुक्तम्--

देशकालक्रियाकारैरवच्छिन्नेषु वस्तुषु।
अनवच्छिन्नरूपस्त्वं भासि तस्य बहिःस्थितेः॥ इति।

अत्र च--

भेदः सर्वज्ञतादीनां ज्ञानादीनां च नास्त्यमी।
ज्ञानस्यैव धर्मतया चिद्रूपस्य स्थितिर्यतः॥ इति।

उक्तं च षाड्गुण्यविवेके--

गुणेषु ज्ञानमाद्यन्ते तेन तत्त्वेऽवधारिते।
धर्मत्वेनेषिता शक्तिर्बलवीर्यौजसां स्थितेः॥ इति।

कक्ष्यास्तोत्रे च—

ज्ञानं प्रशान्तं तव बोधवृत्तिरैश्वर्यमुद्यत्प्रसरा परेषाम्।
प्रकाशनं प्रत्यपि योग्यरूपा शक्तिर्बहिःस्थैर्यवती बलं सा॥
उत्पन्नबाह्यप्रसरां तु वीर्यं तेजश्च बाह्यानवभासयन्ति।
षोढेत्थमेकैव तव स्वशक्तिर्बाह्यावमर्शात्तु भवेदविद्या॥
तत्र सर्वज्ञता ज्ञानं सर्वं हि जायते ततः। इति।

तृप्तिर्बलम्। तथाहि--

बलस्य तृप्तिमूलत्वात् क्षमस्य तदभावतः।
अनादिबोधस्तेजोऽत्र बोधमूलं हि तत्सदा॥ इति।

तदुक्तम्—

प्रभावलक्षणं यच्च तेजः प्रह्वयते परान्।
बोधत्वादेव तद्वेद्यं बोधं प्रह्वयते जगत्॥
स्वतन्त्रताऽत्र चैश्वर्यं स्वातन्त्र्यादीश्वरस्य तु। इति।

तदुक्तम्—

स्वतन्त्रः सर्वकृत्येषु न नियोज्यो न विघ्नवान्।
प्रवृत्तोऽस्य प्रवृत्तो वा यतस्तेन त्वमीश्वरः॥
वीर्यं सदाऽलुप्तशक्तिः नाशाभावश्च तद्वतः। इति।

तदुक्तम्--

आत्मसत्त्वापरिभ्रंशलक्षणाद्वीर्यमासत ।

**वीर्यादेतच्च ते कार्येऽनन्वयः स्वर्णवच्च यः ।**
**अनन्तशक्तिः शक्तिः सा सामर्थ्यात् सर्वतः सदा ॥**

इति ॥ १६ ॥

तस्य तु कोपलब्धिरित्याह —

**तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणि ।**
**नित्यं स्यात् सुप्रबुद्धस्य तदाद्यन्तेऽपरस्य तु ॥ १७ ॥**

तस्य चिद्रूपस्यात्मनो योगिनः सततमुपलब्धिरनुभवो भवेत् । कीदृशस्य योगिनः ? नित्यं सदैव सुप्रबुद्धस्य । कीदृश्युपलब्धि ? त्रिपदाव्यभिचारिणी त्रिष्वपि जाग्रदादिषु पदेषु अवस्थासु न या व्यभिचरति न निवर्तते सा तथोक्ता । कार्ये तु निर्भ्रान्तिव । उक्तं च--

**काप्यवस्था न ते साऽस्ति यस्यां संविन्न वर्तते ।**
**तेन चिद्घनमेव त्वां योगिनः पर्युपासते ॥** इति ।

अपरस्य पुनरीषत्प्रबुद्धस्य प्रबुद्धस्य च । तदाद्यन्ते तदिति पदत्रयस्य परामर्शः । एतदुक्तम्—

**तदादौ प्रागवस्थायां (तदन्तेऽपि) च तन्मये ।**
**पदं प्रत्ययवाद्यन्ते जात्तुर्येष्ववागमात् ॥** इति ।

अथवा तदादौ तदन्ते च तन्मध्ये जाग्रत्स्वप्नयोरित्यर्थः । यतः प्रबुद्धस्यैतयोरेव स्फुटोपलब्धिः संवेदनम् ॥ १७ ॥

स च तस्य क कथमिति स्फुटीकर्तुमाह--

**ज्ञानज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।**
**पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः ॥ १८ ॥**

विभुर्व्यापकः चिन्मयश्चिद्रूपः परमात्मा परमया शक्त्याऽत्युत्कृष्टेन सामर्थ्येन युक्तः । पदद्वये जाग्रत्स्वप्नात्मके भाति दीप्यते प्रकाशते । कीदृश्या शक्त्या ? ज्ञान ज्ञेयभेदेन द्विरूपया । द्वैरूप्यात्त्वस्याः पारम्यम् । अत एवास्मिन्नवस्थाद्वये द्विविधोपलब्धिः । तदन्यत्र पुनस्तस्मात्पदद्वयादन्यस्मिन् पदद्वये सुषुप्ततुर्याख्ये चिन्मयश्चिन्मात्र एव । ज्ञेयाभावाज्ज्ञानस्वरूप एवेत्यर्थः ॥ १८ ॥

**तस्योपलब्धिर्योक्ता सा गुणस्पन्दादिभिः स्थितैः ।**
**कुतस्त्या चेति सा शङ्का ये तान् प्रत्युच्यते त्विदम् ॥--**

गुणादिस्पन्दनिष्यन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ १९ ॥

गुणाः सत्त्वरजस्तमांसि । आदिग्रहणान्महदहङ्कारतन्मात्रेन्द्रियभूतानि च । गुणादिश्चासौ स्पन्दः गुणादिस्पन्दः । तस्य ते निष्यन्दाः प्रह्वावाः सुखदुःखमोहोर्मिज्ञानविशेषाः । तस्य प्रागुक्तलक्षणस्य सामान्यस्पन्दस्यान्तर्लीनाऽनन्तविशेषस्य संश्रयादालम्बनाद्धेतोर्लब्धात्मलाभाः प्राप्तसत्ताकाः । अत एव ज्ञस्य विदितवेद्यस्य योगिनः स्वरूपाव्यवधानादसम्पर्कात् सततं नित्यमपरिपन्थिनः स्युः । स्वभावाच्छादका न भवन्तीत्यर्थ । सिद्धोक्तं च—

यद्वत्प्रकाशभवने प्रकाश्यविषयो न दृश्यते मातः ।
सम्पर्कात्तिव तद्वत् संविद्वेद्ये न भाव्यते जातु ॥ इति ।

ते चास्यैव स्पन्द इति प्रागेवोक्तम् । मतङ्गपारमेश्वरेऽपि—

शिवाद्यवनिपर्यन्तो योऽयमध्वाऽतिविस्तरः ।
स समस्तश्चिता ज्ञेयस्तया संवेद्यते यतः ॥ इति ।

गीतासु च--

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामतितरन्ति ते ॥

( भ० गी० ७।१४ )

इति ॥ १९ ॥

अज्ञस्य तु—

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥ २० ॥

अप्रबुद्धा सम्मूढा धीर्बुद्धिर्यस्य पुंसस्तस्य पुनरेते गुणादिस्पन्दनिष्यन्दाः स्वस्थितेश्चिद्रूपाया अवस्थायाः स्थगनेऽवच्छादने प्रोद्यताः । यतोऽसौ तदात्मकमेव नित्यमात्मानं पश्यसि, न शुद्धबुद्धरूपतया । उक्तं च--

यथादर्शं शिशुः स्वच्छं निश्वासैः स्वैर्मलीमसम् ।
करोति तद्वद्विज्ञानं स्वविकल्पैर्जडाशयः ॥ इति ।

अत एव संसारवर्त्मनि पातयन्ति जननमरणप्रवाहमार्गे प्रेरयन्ति । कीदृशे ? दुरुत्तारे दुःखेनोत्तरणं निस्तारो यत्र । अत एव घोरे क्लेशप्रदे । तदुक्तं ज्ञानसम्बोधे—

**यद्यपि स्वात्मशक्त्यैव गतिः साक्ष्यन्ययोर्द्वयोः ।**
**तथाप्येकः स्वयं याति द्वितीयोऽन्येन नीयते ।।**
**साक्षिवत् स्फीतबोधानां स्वातन्त्र्यं विषमेष्वपि ।**
**अन्धवन्मन्दबुद्धीनां पारतन्त्र्यं समेष्वपि ।।**

इति ॥ २० ॥

अथात्राऽज्ञास्याप्युत्तरणोपायमाह--

## अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये ।
## जाग्रदेव निजं भावमचिरेणाधिगच्छति ।। २१ ।।

यतस्ते पातनशीलाः। अतोऽस्मात् कारणाद्यः सततं सर्वकालमुद्युक्तो विकस्वरस्वभावतया कृतोद्योगः । किमर्थम् ? स्पन्दतत्त्वस्य विविक्तये विवेचनाय स्वरूपाभिव्यक्त्यर्थम् । यत उद्योक्तृरूपं तत् । उक्तश्च शिवसूत्रेषु--

**'उद्योगः शिवः'** इति ।

अतः प्रजाग्रदेव जाग्रदवस्थायामेव व्युत्थानेऽपि निजमात्मीयं स्वभाव मचिरेण शीघ्रमधिगच्छति प्राप्नोति । अस्य चैतद्विवेचनम् । यदहं शुद्धबोधैकरूपो-जगच्चेदं मत्स्फार एव । उक्तं च—

**सर्वो ममायं विभव इत्येवं परिजानतः ।**
**विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता ।।** इति ।

पञ्चरात्रेऽपि—

'यदात्मनि सर्वभूतानि पश्यत्यात्मानं च तेषु पृथक्च तेभ्यस्तदा मृत्यो-मुच्यते जन्मश्च' इति ।

अन्यत्र च--

**निर्मलानन्त्यबोधैकरूपस्त्वं भव्यबुद्धिभिः ।**
**वेद्याद्वा वेदकाद्वापि लभ्यसेऽवहितात्मभिः ।।** इति ।

तत्त्वार्थचिन्तामणौ च—

**इत्थं तत्तदनल्पमोहदलनप्राप्तस्वरूपदयो**
**योगी नित्यमनात्मभावविरहात् स्वात्मस्थितो निर्वृतः ।**
**दृश्यद्रष्टृविवेकविद्रुवपदव्यापी विमुक्तामयो**
**व्युत्थानेऽपि समाधिभाग्भवति सन्मोक्षश्रियः कारणम् ।।**

इति ॥ २१ ॥

जाग्रदेव स्वभावोक्तिर्योक्ता साऽज्ञैर्न लक्ष्यते ।
अतः स्पन्दोदयपदान्युच्यन्ते येषु लक्ष्यते ॥--

**अतिक्रुद्धः प्रहृष्टो वा किं करोमीति वा मृशन् ।**
**धावन् वा यत्पदं गच्छेत् तत्र स्पन्दः प्रतिष्ठितः ॥ २२ ॥**

द्विषोद्दीपितामर्षोऽतिक्रुद्धः सन् प्राग् यत्पदं गच्छत् यं ह स्फारमालम्बते यामौन्मुख्यवृत्तिं स्पृशेत् । अथवा सुचिरागतप्रियदर्शनादिना प्रहृष्टः प्रहर्षिता यत्पदं गच्छेत् परानन्दरूपं गृह्णीयात् । तथा अनेककार्यकल्लोलाकुलतया किं करोमि ? इदं करोमि, अथवेदं करोमीति मृशन् परामृशश्चिन्ताविष्टो यत्पदं गच्छेन्निश्चयकारिणीं दशामाश्रयेत्, तथा कान्ताहृतचित्ततया सम्भ्रमाद्वा धावन् धावमानो वा यत्पदं गच्छेद्यामवस्थामारोहति, तत्र तस्मिन् पदे स्पन्दः प्रागुक्त आत्मस्वभावः प्रतिष्ठितः स्फुटोपलभ्यतया स्थितः । एतदुक्तं भवति--

यत्र यत्र यदा येन सर्वशक्तिलयो भवेत् ।
स्फुटः स्यात् स्पन्दतत्त्वस्य तत्र तत्र तदोदयः ॥ ।इति ।

यतः--

क्रोधाद् दुःखभुवः सर्वा हर्षात् सुखभुवः स्मृताः ।
किं करोमीति मोहोत्था धावन्तोन्द्रियवृत्तयः ॥ इति ।

उक्तं च विज्ञानभैरवे--

क्रोधाद्यन्ते भये शोके गह्वरे वारणे रणे ।
कुतूहले क्षुधाद्यन्ते ब्रह्मसत्ता समीपगा ॥ इति ।

रहस्यस्तोत्रे च--

क्रोधहर्षविवशः परां दशामाश्रितोऽथ विमृशंश्च यः क्रियाम् ।
यत्स्पृशत्यनियतक्रियास्पदं स्पन्दमात्मबलदं वदन्ति तं ॥
एषोऽन्त्रत त्रुटेः प्रोक्तः सर्वज्ञतादिभाक् । इति ।

त्रुटिपाते सर्वज्ञत्व-सर्वकर्तृत्व सर्वेशतादयः । एष च गुरूपदेशेनादरात् परीक्ष्यः ॥ २२ ॥

अस्यैवोदयायोपायान्तरं विशेषकेणाह—

**यामवस्थां समालम्ब्य यदयं मम वक्ष्यति ।**
**तदवश्यं करिष्येऽहमिति सङ्कल्प्य तिष्ठति ॥ २३ ॥**

तामाश्रित्योर्ध्वमार्गेण सोमसूर्यावुभावपि ।
सौषुम्णेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ॥ २४ ॥
तदा तस्मिन् महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥ २५ ॥

अयमेष देवदत्तो ज्ञाता अद्भुतसद्वस्त्वभिधाय्यनुल्लङ्घ्याज्ञो यत्किञ्चिन्मम वक्ष्यति वदिष्यति तदवश्यमहं करिष्येऽनुष्ठाष्यामि करिष्यामीति सङ्कल्प्य यामवस्थामौन्मुख्यरूपां वृत्तिं समालम्ब्य गृहीत्वा यस्तिष्ठति तस्य पुंसस्तामवस्थामाश्रित्योर्ध्वमार्गेण विषुवत्प्रवाहेण सोमसूर्यविभावपि द्वावप्यपानप्राणौ मनःप्राणौ वा । सौषुम्णेऽध्वनि मध्यमनाड्यां परशक्तिमार्गे स्वयमस्तमितो लयं गच्छतः । किमस्य हृद्गतं स्यादिति कुतूहलात् । किं कृत्वा भवतः ? ब्रह्माण्डगोचरं हित्वा शरीरविषयं विहाय, देहाहंभावं त्यक्त्वेत्यर्थः । उक्तं च--

**जाते देहप्रत्ययद्वीपभङ्गे प्राप्तैकत्वे निर्मले बोधसिन्धौ ।**
**अध्यावर्त्यैवेन्द्रियग्राममन्तर्विश्वात्मा त्वं नित्यमेकोऽवभासि ॥** इति ।

तदा तस्मिन् काले तस्मिन् महाव्योम्नि च परचिदाकाशे प्रत्यस्तमितशशिभास्करे प्रशान्तज्ञानक्रिये गूढोऽनभिव्यक्तस्वभावः स्वप्नादिनाऽनुह्यमानः प्रबुद्धोऽनिरुद्धः स्यात् सौषुप्तपदवत् । यथा सुषुप्तपदे तथा प्रबुद्धस्त्वनावृत एव भवेत् । उक्तं च रहस्यस्तोत्रे—

**स्वात्मनि स्तिमितसोमभास्करं व्योममार्गमतिवर्त्य तस्थुषः ।**
**भावनाञ्जितदृशोऽपि खेचराः केचिदेव तव धामदर्शिनः ॥** इति ।

प्राणापानप्रशान्तिरेव चान्यत्र निरञ्जनतत्त्वोदये युक्तिः प्रोक्ताः । मयाप्युक्तं भोगमोक्षप्रदीपिकायाम्

**कामाख्ये विषतत्त्वे निरञ्जनाह्वे क्रमाच्च सिद्धिः स्यात् ।**
**सूर्ये सोमे हृदयात्तयोः शमाच्चेति शास्त्रसर्वस्वम् ॥** इति ।

एवं स्पन्दतत्त्वस्योदयः प्रोक्तः । तदाऽस्मादेव च सहजो मन्त्रोदयः । उक्तं च बोद्धायनसंहिताम्--

**शान्ते चन्द्रे त्वमात्राख्ये यावन्नोच्चरते रविः ।**
**उदयः सर्वमन्त्रणां विलयश्च दिवौकसाम् ॥** इति ।

मालिनीविजयेऽपि—

**यत्राधारविनिर्मुक्तो जीवो लयमवाप्स्यति ।**
**तत् स्थानं सर्वमन्त्राणामुत्पत्तिक्षेत्रमिष्यते ॥** इति ।

तथा—

धर्माधर्मान्तरे चित्तं निरुद्धं यत्तदा तु सः।
यद्वक्ति स भवेन्मन्त्रः किं पुनर्मातृकोत्थितः॥

इति॥ २३-२४-२५॥

अत एव—

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनः॥ २६॥

तद्बलं निरावरणचिदुल्लासरूपं परशक्त्याख्यमाक्रम्याधिष्ठाय मन्त्राः बीज-पिण्ड-पद-नामरूपा मननत्राणधर्मिणः सहजनादशक्त्युद्बोधदीप्तत्वात् सर्वज्ञत्वादिना बलेन यथायुक्तामन्त्रिप्रयुक्ता अधिकारायानुग्रहादौ प्रवर्तते। किमिव यथा शरीरिणः करचरणादीनि करणानि। अनेन मन्त्रिणः परत्वावबोधान्मन्त्रिष्विच्छामात्रेण यथेष्टविनियोज्यत्वमुक्तम्। तदुक्तं त्रिकसारे—

विदिते तु परे तत्त्वे वर्णातीते ह्यविग्रहे।
किङ्करत्वं तु गच्छन्ति मन्त्रा मन्त्राधिपैः सह॥ इति।

अन्यथा तु प्रयत्नप्रयुक्ता अपि ये पूर्वोक्तसङ्कल्पत्वाद्यास्पदचिच्छक्तिबलास्पर्शात् केवलवर्णरूप-मात्रारूपत्वान्लन्त्रपुत्रिकाकरणनिष्फलचेष्टा भवन्ति। उक्तं च हंसपारमेश्वरे—

पशुभावे स्थिता मन्त्राः केवला वर्णरूपिणः।
सौषुम्णेऽध्वन्युच्चरिताः पतित्वं प्राप्नुवन्ति ते। इति।

य उ एष शाक्तो मार्गोऽत्र च मन्त्राणां साफल्यम्। तदुक्तं तत्त्वरक्षाविधाने—

अशक्तत्वान्निष्क्रियत्वान्न पुंसि न परे पदे।
शक्तौ नियोजयेन्मन्त्रं जपस्तु सफलो भवेत्॥ इति।

श्रीवैहायस्यां च—

विषुवत्कं जपं कुर्यान्नादोर्ध्वध्वनिबोधितम्।
मन्त्राक्षराणि मणिवच्छक्तौ प्रोतानि भावयेत्॥
तामेव च परे व्योम्नि परमामृतबृंहिताम्।
दर्शयत्यात्मसद्भावमेवं मन्त्रो हुतिं विना॥ इति।

श्रीकालपरायाम्—

शब्दो नादात्मकस्तस्मात् प्रत्ययेनोपबृंहितः।

मन्त्रबोधस्वरूपस्थमभिन्नो बोधयत्यपि ॥ इति ।

अन्यच्च सङ्कर्षणसूत्रेषु—

स्वात्मैकनिष्ठं चिद्रूपं भावाभावपरिष्कृतम् ।
स्वसंवेदनवेद्यं प्रकृत्यातीतगोचरम् ॥
इयं योनिः स्मृता विप्र मन्त्राणां प्रत्ययात्मिका ।
ते मन्त्रा वर्णरूपेण सबाह्याभ्यन्तरोदिताः ॥
नैष्कालिकपदावस्थाः करणानीव देहिनाम् ।
प्रयुक्ताः सर्वकालेषु सिद्ध्यन्ते वीर्ययोगतः ॥ इति ।

एवं शुद्धबोधात्मकत्वेनान्तर्बाह्योदयादेकोऽपि जपो लक्षसङ्ख्याकः । तदुक्तं जयायाम्--

एकस्य मन्त्रनाथस्याप्यन्तर्बाह्योदितस्य च ।
यदैक्यं तं जपं विद्धि लक्षसंख्याधिकं मुने ॥ इति ॥ २६ ॥

अनेन युक्त्या मन्त्रवीर्यमुक्तम्, प्राक्चोदयोऽधुनास्तमयमाह—

**तत्रैव सम्प्रलीयन्ते शान्तरूपा निरञ्जनाः ।**
**सह साधकचित्तेन तेनैते शिवधर्मिणः ॥ २७ ॥**

तत्रैव स्वस्वभावे शक्तिमति । एते मन्त्राः साधकचित्तेन तत्प्रवृत्तिनिमित्तेन तदाधारभूतयेच्छया सह सम्यक् प्रलीयन्ते अस्तं गच्छन्ति । यतस्ते तदनुगास्तच्छक्तिरूपाश्च । उक्तं च कालपरायाम् —

पराक्षरतरोर्धातुर्नानाशक्तेर्विवर्तगाः ।
शक्तयो वर्णदेहेषु वक्त्राद्वर्णत्वमागताः ॥ इति ।

किंभूताः कृतकृत्यत्वाच्छान्तरूपाः । अत एव निरञ्जनाः महाकालुष्यरहिताः । निरञ्जनतत्त्वानुप्राणनाद्वा । अनेनैव च हेतुना शिवधर्मिणः शिवस्येव धर्मा गुणा येषाम् । सर्वज्ञाः सर्वकर्तार इत्यर्थः ॥ २७ ॥

सह साधकचित्तेन लीयन्ते तत्र यत् स्मृतम् ।
शिवतात्मनि सर्वात्म्यात् चाहैतत्सोपपत्तिकम् ॥—

**यस्मात् सर्वमयो जीवः सर्वभावसमुद्भवः ।**
**तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ॥ २८ ॥**
**तेन शब्दार्थचिन्तासु न साऽवस्था न यः शिवः ।**
**भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥ २९ ॥**

यस्माज्जीव आत्मैव सर्वमयः सर्वात्मको विश्वरूपः, बोद्धृरूपत्वात्। उक्तं च--

यदैव विदितं विश्वं तदानीमेव चिन्मयम्।
यन्नास्ति भागो वेद्योऽसौ नाथ यो वेदकाद्बहिः॥
वेद्यो वेदकतामाप्तो वेदकः संविदात्मताम्।
संवित् त्वदात्मा चेत् सत्यं तदिदं त्वन्मयं जगत्॥ इति।

श्रुतिश्च--

'आत्मैवेदं जगत् सर्वं नेह नानास्ति किञ्चन' इति।

( छा. उ. ३. ९. १२ )

अन्यच्च। सर्वभावसमुद्भव इति विशेषणं हेतुगर्भम्। हेतुर्वाऽयं समुद्भवातिदि सर्वेषां भावानां समुद्भवो यस्मात्। परादिवाग्रूपतया संविद्युपारोहेण हि तेषामुदयः सत्ता च। तदुक्तम्—

त्वत्कारणत्वं सर्वस्मिन्नपि ज्ञातं त्वदन्वयात्।
संवित्समन्विते विश्वे नाऽसंवित् कारणं भवेत्॥
संविदायतनं ज्ञातं तत् सदाख्यां प्रपद्यते।
तावतैव न लभ्या स्यादनुपासितसंविदा॥ इति।

अन्यच्च--

त्वदात्मकत्वं भावानां विवदन्ते न केचन।
यत्प्रकाश्यदशां याता नाऽप्रकाशः प्रकाशते॥ इति।

तथा—

सृजन् वदन् ज्ञापयंश्च त्रिधैकस्त्वं प्रकाशकः।
व्यतिरिक्तः प्रकाशेभ्यो न यथाऽन्ये प्रकाशकाः॥
न प्रकाशाः प्रकाशन्ते त्वत्प्रकाशोदयं विना। इति।

पञ्चरात्रेऽपि--

'न तत्रादित्यो भाति' इत्यादि।

यावत्--

'तस्य भासा सर्वमिदं विभाति' इति।

सर्वमयत्वेऽस्य हेत्वन्तरमाह--तत्संवेदन इत्यादि। तदिति भावानां संवेद्यानां परामर्शः, तेषां संवेदनरूपेणानुभवद्वारेण यतस्तादात्म्यप्रतिपत्तिर्भावरूपतासम्प्राप्तिस्तदभेदसंवित्तिस्ततो हेतोः। उक्तं हि स्वात्मसप्तती--

यद्वद् वस्तु स्वभावेन ज्ञानेन विषयीकृतम् ।
तद्वत्तादात्म्यमायाति जीवः सर्वमयो ह्यतः ॥ इति ।

अन्यत् संवित्प्रकरणे—

यथाऽग्निना समाविष्टं सर्वं तद्रूपमीक्ष्यते ।
तथा ज्ञानसमाविष्टं सर्वं तद्रूपमीक्ष्यताम् ॥ इति ।

तथाऽऽगमरहस्ये--

आकारवर्ग उपरि प्रतिभासतेऽस्य
ज्ञानस्य सापि तव विश्वमयी विभूतिः ।
विश्वात्मकस्त्वमिति नाऽऽगमसिद्धमेतत्
किन्तु स्वसंविदितरूपतयापि सिद्धम् ॥ इति ।

एवं संविदेव प्राणद्वारेण वाग्रूपतां धत्ते । तदुक्तम्--

स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥
केवलं बुद्धचुपादानात् क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥
अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ॥ इति ।

तथा--

स्वयं रौति य एषोऽन्तर्निर्विशेषनवात्मकः ।
स परः परमः स्थायी नित्योदितनिजाकृतिः ॥
चिदिच्छाशक्तिसम्बुद्धः स्पन्द आत्मबलेरितः ।
सवितेव स तेजांसि विचिन्वन् हृदि राजते ॥ इति ।

प्रत्यभिज्ञायां च--

चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी ।
सैषाऽऽधारतया प्रोक्ता हृदयं परमेष्ठिनः ॥ इति ।

तस्यां चान्तःसंजल्परूपायां द्वावपि शब्दार्थौ समं स्फुरतः । अत एव तयोरभेद एव विख्यातः । उक्तं केह--

'यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः' इति ।

वाक् च संविन्मूलेति प्रागेवोक्तम्—संविन्मूलादित्यादि । तथाजातीयैः श्लोकैरन्यच्चोक्तम्--

यथा तया जगद्विद्धं सर्वमेव निजात्मना ।
तथा तयाऽनुविद्धेयं सर्वतो भाति भारती ।। इति ।

योगिनाथेन चोक्तम्—

तस्मात् सर्वस्य सिद्धयर्थं भारती कारणं परे ।
परेष्टव्या तदा रूपान्वेषणेनार्थनिश्चयात् ।।
तस्या औन्मुख्यवृत्त्यैव सद्भावपरिकल्पनात् ।
नहि तामन्तरेणैषा लभेताऽऽत्मानमम्बिके ।।
सा च तस्यामवस्थायां स्वरूपज्योतिरिष्यते ।
निर्विभागक्रमापेक्षा योगिगम्यानुरूपिणी ।।
तत औन्मुख्यतश्चिन्तामयी भवति वाक् शिवे ।
विशिष्टशब्दविषयविवक्षास्फुरणात्मिका ।।
ततः शब्दात्मकत्वेन विवृत्तार्थमयी भवेत् ।
तदात्मतामन्तरेण यस्मान्नार्थावधारणम् ।। इति ।

एवं संवित्स्वरूपस्य सर्वप्रकाशकस्य प्रभेव प्रकाशनशक्तिर्या वागन्तः-सञ्जल्परूपा वर्ण-पद-वाक्याजीवभूता सैव पदार्थरूपतया बहिर्भवतीति स्वानुभव-प्रसिद्धमेव प्रबुद्धानाम् । उक्त च--

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद् बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ।।
स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्शः प्रवर्तते ।। इति ।

अन्यच्चोक्तम्--

यत्किञ्चिदाभाति बहिस्तदीश नूनं तवास्त्येव समस्तमन्तः ।
निमीलिताक्षा हृदि लक्षयेयुस्तथैव सर्वं कथमन्यथा तत् ।। इति ।

इत्थं स्वभाव एव यतः सर्वात्मस्थेन तथाविधेन सवात्मकेन स्वभावेन हेतुना शब्दार्थयोश्चिन्तासु मध्याविषये वा न सा काचिदवस्थास्ति या न शिवस्वभावम-भिव्यञ्जयति, वा न चित्स्वरूपेत्यर्थः । संवित्स्वीकरणैक्यात् । यतः सर्वस्यास्तित्वम् । तदुक्तम्--

येन येन विभिद्यन्ते हेतुना भावनिम्नगाः ।
तेन तेनैक्यमायान्ति बोधोदधिसमागताः ।। ।इति ।

प्रागुक्तं च—

शरीरजो वा शाब्दो वा मानसो समुद्गतः ।
व्यवहारोऽप्यसौ नास्ति यत्र त्वं नाथ नाग्रयः ॥

अतश्च भोक्तैवानुभवितैव भोग्यभावेनानुभाव्यतया सदा सर्वत्र संस्थितो न त्वन्यद्भोग्यमस्ति । तथा च श्रुतिः--

अहमन्नमहमन्नमहमन्नम् ।
अहमन्नादोऽहमन्नादोऽहमन्नादः ॥
( तै० उ० ३।७० )

ग्रन्थकृता तत्त्वविचारेऽप्ययुक्तम्—

स्वस्वभावस्थिता भावाः संबध्यन्ते परस्परम् ।
भोग्यभोक्तृत्वभावेन न कदाचित् स्वभावतः ॥
द्रष्टाऽनुभविता स्मर्ता ग्राहको भोक्तृवेदकः ।
कर्तोपलब्धा संवेत्ता ज्ञातेति ज्ञानसंज्ञकाः ॥ इति ।

तेन ज्ञानमेव ज्ञेयरूपतया प्रथत इत्यर्थः । उक्तं च--

भोक्तुर्विभोर्ये भवतो विभिन्नः स दृश्यते मुग्धतया स्व आत्मा ।
ते भोग्यभूताः पशुवत् परेषां भोगाय भूयोऽत्र भवे भ्रमन्ति ॥
भवं भवद्वै भवभुतमेव विभावयन्तो भगवन् भवेयुः ।
भवद्वदेव प्रभुभावभाजो विश्वं वशे वर्तयितुं समर्थाः ॥ इति ।

ज्ञानसम्बोधेऽपि--

ज्ञाता ज्ञेयं ज्ञानमिति ज्ञानस्यैव त्रिधा स्थितिः ।
ब्रह्मार्पणं ब्रह्महविरित्यत्रोक्तं तदेव यत् ॥ इति ।

मयैव चोक्तं क्वाऽपि--

द्रष्टैवाऽस्ति न दृश्यमेतदबुधैरध्यात्मना ज्ञायते
आदर्शप्रतिबिम्बवज्जगदिदं भिन्नं द्विधा भाति यत् ॥
सत्तां यान्ति घटादयो बहिरमी बोधानुवेधात् सदा
ज्ञानाद्वैतमतः स्वतोऽस्ति न पुनर्ज्ञेयस्य सत्ता क्वचित् ॥ इति ।

तथात्मसप्ततौ--

यदिदं दृश्यते किञ्चिद्दर्शनात्तन्न भिद्यते ।
दर्शनं द्रष्टृतो नान्यद्द्रष्टैव हि ततो जगत् ॥ इति ।

सङ्कर्षणसूत्रेष्वपि--

**येनेदं दृश्यते विश्वं द्रष्टा सर्वस्य यः सदा।**
**दृश्यश्चराचरत्वे यः स विष्णुरिति गीयते ॥** इति।

जाबालिसूत्रेष्वपि--

'द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धाऽपरिलुप्तचैतन्यस्वभावो जगदुत्पत्ति-स्थिति-लयैकहेतुर्भगवान् वासुदेव आत्मेति' इति।

पञ्चरात्रोपनिषदि च--

'ज्ञाता च ज्ञेयं च वक्ता च वाच्यं च भोक्ता च भोग्यं च' इत्यादि। तथाऽत्रैव—'सर्वान्तरं सर्वबाह्यं स्वयंज्योतिः स्वयंसम्बोध्यं स्वयम्भूरिति च' इति।--

श्रुतिरपि--

**'स एव ज्ञाता तज्ज्ञानमिति'** इति।

एवमेव एव मन्त्रात्मा। तेषां चात एव शिवधर्मित्वं सिद्धमिति ॥ २८-२९ ॥

अत्रैव प्रशंसाद्वारेण स्वीकरणोपायं प्राह--

**इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत्।**
**स पश्यन् सततं युक्तो जीवन्मुक्तो न संशयः ॥ ३० ॥**

वाशब्दः स्वार्थेऽत्र। किं बहुना, इत्येवं चोक्तप्रकाररूपा यस्य संवित्तिः संवेदनं ज्ञानम्। यथा मन्मयमेव सर्वम्। सोऽखिलं समग्रं जगत् क्रीडारामतया पश्यन् विभावयन्नित्ययुक्तत्वाच्च बन्धकारणस्याज्ञानस्य क्षयात् प्रबोधाप्तौ जीवन्नेवेश्वरवन्मुक्तो नाऽत्र संशयः।

**उपपत्त्युपलब्धिभ्यां सिद्धत्वाद् भ्रान्तिरत्रनो।** इति।

उक्तं च--

**सम्यक् स्वबोधविश्रान्तौ योऽलुप्तानुभवः स्थितः।**
**विषयानपि सोऽश्नन् स्याज्जीवन्मुक्तस्तु तत्त्ववित् ॥** इति।

ये त्वाहुः--विनोत्क्रान्तिं कुतो मोक्ष इति। तन्निरासाय आह--

**विना स्वभावानुभवेन पुंसः कैवल्यमुत्क्रान्तिबलाद्यदि स्यात्।**
**अत्राऽपि पक्षे ननु मोक्ष भाक्त उद्बन्धनं यः कुरुते प्रमूढः ॥** इति।

तथा--

विदेहा अपि बुद्धचन्ते प्रलये गुणवासिताः ।
शरीरिणोऽपि मुच्यन्ते विशुद्धज्ञानसंश्रयात् ।। इति ।

ज्ञानगर्भेऽपि--

मयि स्थितमिदं जगत् सकलमेव सर्वत्र वा
स्थितोऽहमिति धारणाद्वितयभावनावेशतः ।
जगत्त्रितयनाथ तानतिचिरेण सम्प्राप्यते
नृभिस्तव सपर्यया दलितकिल्बिषोपप्लवैः ।। इति ।

गीतास्वपि--

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति ।। इति ।
( भ० गी० ६।३० )

पञ्चरात्रेऽपि--

प्रज्ञाप्रासादमारुह्य अशोच्य शोचतो जनान् ।
भूमिष्ठानिव शैलस्थः सर्वान् प्राज्ञोऽनुपश्यति ।। इति ।

अत्र च नित्योद्युक्तरूपत्वमेवोपायो युक्त्या ध्वनितः । प्राक् चोक्तं हि--'अतः संततमुद्युक्तः' इत्यादि ।। ३० ।।

अथ प्रागुक्तस्य मन्त्रात्मनो युक्त्यन्तरोदयवर्णनद्वारेण निगमनं करोति--

अयमेवोदयस्तस्य ध्येयस्य ध्यायिचेतसि ।
तदात्मतासमापत्तिमिच्छतः साधकस्य वा ।। ३१ ।।

अयमेव तस्य पूर्वोक्तस्य ध्येयस्य मन्त्रात्मनो ध्यायिचेतस्युदयः । समापत्तिमेकीभावं मन्त्रात्मतापत्तिमिच्छतो गृह्णतः साधकस्य ध्यायिनो वा तदात्मतया ध्येयस्वरूपापत्तिरित्यर्थः । उक्तं हि विश्वसंहितायाम्--

ध्येये चित्तं यदा लीनं तदा ध्यानमुदाहृतम् ।
ध्येयः प्रत्यक्षतां याति ध्याता तन्मयतां व्रजेत् ।।
ऋच्छतस्त्विति पाठाद्वा ध्येयं चिन्तयतोऽत्र या ।
तदात्मतासमापत्तिरैक्यं तस्योदयः स तु ।।

ग्रन्थकृतस्तु द्वयमप्याशयः सहते । यतो मन्त्रोच्चारणेच्छया मन्त्रदेवतया सह यत्तादात्म्यं योऽन्तःसंवेदनद्वारेण तदात्मग्रहो मन्त्रन्यासात्मकः स एवास्योदय आविर्भाव इति ।। ३१ ।।

अस्यैव व्याप्तिफलमाह--

इयमेवाऽमृतप्राप्तिरयमेवाऽऽत्मनो ग्रहः ।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी ॥ ३२ ॥

उक्तं च--

येयं स्वरूपसंवित्तिः साऽमृताप्तिरिहात्मनः ।
जरामरणविच्छेदादपुनर्भवता न तु ॥
दुग्धाब्ध्युद्गतस्यायमेव चात्मनोऽनुग्रहः स्वतः ।
निर्वाणदीक्षा तच्चेयं परमात्मनियोजिका ॥ इति ।

उक्तं च मोक्षधर्मेषु--

हित्वा तु सर्वसङ्कल्पान् सत्त्वे चित्तं निवेशयेत् ।
सत्त्वे चित्तं यदा लीनं ततः कालञ्जयो भवेत् ॥ इति ।

आत्मसम्बोधे च--

भवेद्भवानामभवाय नूनं स्वभावसंविद्विदितैव पुंसाम् ।
अमर्त्यतां नर्त्यजने करोति सकृत्सुधाप्राशनमात्रमेव ॥ इति ।

दीक्षार्थोऽयम्--

ददाति ज्ञानसद्भावं क्षपयत्यखिलं मलम् ।
बोधानुवेधाद्दीक्षोक्ता दानक्षपणधर्मिणी ॥

इति ॥ ३२ ॥

स्पन्दतत्त्वोदयं प्रोच्याकृत्रिमं तत एव च ।
मन्त्रोदयं च तद्वीर्यं तद्विभूतीरथाऽऽह तु ॥—

यथोक्तस्य जाग्रत्येव निजभावाप्त्या स्वातन्त्र्यं तथा स्वप्नेऽप्यस्तीति वक्तुमाह--

यथेच्छाभ्यर्थितो धाता जाग्रत्यर्थान् हृदि स्थितान् ।
सोमसूर्योदयं कृत्वा सम्पादयति देहिनः ॥ ३३ ॥
तथा स्वप्नेऽप्यभीष्टार्थान् प्रणयस्यानतिक्रमात् ।
नित्यं स्फुटतरं मध्ये स्थितवद् यं प्रकाशयेत् ॥ ३४ ॥

यथा जाग्रति जाग्रदवस्थायां जाता स्रष्टाऽऽत्मस्वभाव इच्छया दिदृक्षात्मिकयाऽभ्यर्थितो याचितः सन् देहिनः पुंसो हृदि स्थितानभिमतानर्थात् पदार्थान्

सम्पादयति प्रकाशयति। स्वबलावष्टम्भात्। किं कृत्वा ? सोमसूर्ययोरपानप्राणयोश्चक्षुषोश्चोदयं कृत्वा चक्षुरादिष्ववधानेनेत्यर्थः। एतदुक्तं भवति – अनेकार्थसन्निधानेऽपि गणिकानटमल्लप्रेक्षकादिषु मध्याद्यदेव वस्त्वभिमतं तदेव यथा पश्यति। स्वरूपानुप्रवेशात्। तथा स्वप्नेऽप्यभीष्टानेवार्थान् मध्ये हृदि स्वस्वभावे स्थितः सन् स्फुटतरं कृत्वा नित्यं सदैव प्रकाशयेद्दर्शयति। कुतः ? प्रणयस्येच्छाभ्यर्थनाया अनतिक्रमात् अत्यागात्।

'मुक्त्वा दृढामभीष्टेच्छां नाऽन्यवृत्तिर्यदा भवेत्' इति।

एतदुक्तम्--यदीच्छा तदनुगैव भवेन्न स्वातन्त्र्येण प्रभवति तदैतत्स्यात्। तां चासौ नाप्यतिक्रामति। उक्तं च रहस्यस्तोत्रे--

विस्मृतार्थमभियुज्यधीर्यथा त्वामशेषविदमाशु शंसति।
यद्यदित्थमनयाऽर्थ्यते रसात् स्वप्नगोऽपि न विलङ्घयिष्यति॥ इति।

सिद्धोक्तं च--

'चिद्व्योम्निस्थोऽनुसन्धत्ते यत्तत्पश्यत्यखण्डितम्' इति।

ज्योतिःशास्त्रेऽपि--

येन येनेन्द्रियार्थेन विद्धः स्वपिति मानवः।
तस्य तस्येन्द्रियार्थस्य सुप्तः कर्माणि पश्यति॥

इति॥ ३३-३४॥

एवं स्वप्नस्वातन्त्र्यवर्णनद्वारेण युक्त्या सौषुप्ततमोवरणनिर्भेद उक्तः। अथ स्वरूपस्थस्यैव जाग्रत्स्वप्नादौ स्वातन्त्र्यं न त्वन्यथेत्यभिधातुमाह—

अन्यथा तु स्वतन्त्रा स्यात् सृष्टिस्तद्धर्मकत्वतः।
सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये॥ ३५॥

अन्यथा पुनः स्वरूपस्थित्यभावे चित्तस्य चञ्चलत्वात् स्वप्नादौ सृष्टिरिच्छारूपा स्वतन्त्रा स्यात्। स्वप्नादिप्रसरोऽसमञ्जसरूपो भवेदित्यर्थः। कुतः ? तद्धर्मकत्वात् सृष्टिस्वभावत्वात्। यतस्तत्तत्त्वमिच्छाख्यप्रसवधर्मि नित्यम्। कस्येव ? यथा लौकिकस्याप्रबुद्धमतेर्जाग्रत्स्वप्नपदद्वये सततं सर्वकालं सृष्टिरिच्छैव स्वतन्त्रा। न त्वसौ ह्यप्रबुद्धतया। साऽस्य सहस्रशः सम्बद्धाऽसम्बद्धविकल्परूपैव भवेदवस्थाद्वितयेऽपीति यावत्॥ ३५॥

एवमात्मनो विभूतिषु स्वातन्त्र्याख्यां युक्तिमुक्त्वा अथेदानीं ज्ञत्वकार्यसामर्थ्याख्या या तां कथयति। तत्र सूक्ष्मव्यवहितादौ ज्ञत्वोपायं तावत्कारिकाद्वयेन प्राह—

**यथा ह्यर्थोऽस्फुटो दृष्टः सावधानेऽपि चेतसि ।**
**भूयः स्फुटतरो भाति स्वबलोद्योगभावितः ।। ३६ ।।**
**तथा यत् परमार्थेन येन यत्र यदा स्थितम् ।**
**तत्तथा बलमाक्रम्य नचिरात् सम्प्रवर्तते ।। ३७ ।।**

यथा दूरस्थितः कश्चिदर्थः पदार्थो घटपटादिवस्तु विशेषोऽस्फुटः संदिग्धो दृष्टः सावधानेऽप्यन्यव्यावृत्तेऽप्येकाग्रेऽपि चेतसि सति हि यस्मात् स एवार्थो भूयः पुनः स्वबलोद्योगेनात्मबलप्रयत्नविशेषेण भावितो विचारितः स स्फुटतरो भाति निःसन्दिग्धः प्रकाशतेऽवभासते ।

तस्मात्तथा यद्वस्तु येन रूपेण यत्र यस्मिन् देशे यदा यस्मिन् काले स्थितं तद्वस्तु तथा तेनैव प्रकारेण प्रयत्नविशेषेण स्वबलं स्वस्वरूपं विकस्वरमाक्रम्याऽऽश्रित्याऽवष्टभ्य अभ्यासान्नचिरात् त्वरितं सम्प्रवर्तते सम्यक् प्रतिभातिनिरावरणस्वरूपत्वात् । प्रागुक्तं हि—

**अपि त्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत् ।** इति ।

तत्त्वयुक्तौ च--

**विषयाधिपतिर्यो हि येन जानाति पार्वति ।**
**तस्य यो वेत्ति तत्त्वेन तेन ज्ञातं चराचरम् ।।** इति ।

तेनाऽतीताऽनागतज्ञानं परिमितविषयं न किञ्चिदाश्चर्यम् ।। ३६-३७ ।।

एवं ज्ञत्वमुक्त्वाऽधुनाकार्यकर्तृत्वसामर्थ्यं क्षुज्जयाय चोपायान्तरमाह—

**दुर्बलोऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।**
**आच्छादयेद् बुभुक्षां च तथा योऽतिबुभुक्षितः ।। ३८ ।।**

दुर्बलः क्षीणजातुः अशक्तः कृशोऽपि तद्बलमुत्साहलक्षणमुद्योगरूपमाक्रम्याऽधिष्ठाय स्वीकृत्य यतः कार्ये प्रवर्तते यस्माद् व्यापारं सम्पादयति । अतिकृशस्याप्युद्योगबलावलम्बनात् समरादौ शक्तिदर्शनात् । एतदुक्तं भवति—यथा कश्चिदसमर्थोऽपि व्यायामाभ्यासान्महतीं शक्तिं प्राप्नोति उद्योगबलेन, तथा योऽतिबुभुक्षितः क्षुधार्तः सोऽपि तेनैव स्वस्वभावानुशीलनेन बुभुक्षां भोक्तुमिच्छामप्याच्छादयेत् क्षुधं शमयति । प्रोक्तं च पतञ्जलिना—

**'कण्ठकूपे क्षुत्पिपासानिवृत्तिः'** इति । तथा—

**'बलेषु हस्तिबलादीनि'** ।

बुभुक्षाशब्दोऽत्रोपलक्षणार्थम् । तेन क्षत्तृषौ शोकमोहौ जरामृत्यू चेति षडूर्मयोऽपि नश्यन्तीत्यर्थः ।। ३८ ।।

एवं न केवलमस्मिन्नेव शरीरे तस्य सर्वज्ञतादयः सन्ति, यावत्सर्वत्रापीत्युपायद्वारेणाऽऽह--

अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः ।
तथा स्वात्मन्यधिष्ठानात् सर्वत्रैवं भविष्यति ॥ ३९ ॥

अनेन प्रागुक्तेनात्मस्वभावेनाऽस्मिन् देहेऽधिष्ठिते प्राप्तेऽन्वीक्षिते सति यथा सर्वज्ञतादयो गुणा विद्यन्ते । यस्मादत्र स्वल्पयूकादिभक्षणादपि क्षिप्रमेव जानाति । उक्तं च ज्ञानसम्बोधे--

सर्वः स एव व्यापित्वाद् ज्ञः स एव स्वभावतः ।
सर्वज्ञश्चेति सर्वज्ञः पुमानेव निरुद्धचते ॥ इति ।

अन्यच्च--

सर्वज्ञः सर्वदैव त्वं सर्वस्य हृदये न चेत् ।
केनाऽन्यथाऽस्य सम्भाव्या नष्टार्थविषया स्मृतिः ॥
तदहर्जातबालैश्च स्तनपान क्व शिक्षितम् ? ।
प्राणिभिर्वाप्सु तरणमेतत् सर्वज्ञचेष्टितम् ॥ इति ।

अन्यच्च—

भक्ष्यं स्यात्किमभक्ष्यं वा स्वाद्वस्वाद्विति निश्चये ।
मक्षिकाणां कुतः संवित् क्षौद्रसंचितिकर्मणि ॥
सर्वज्ञस्याप्यधिष्ठातुस्तद्विजृम्भितमन्यथा ।
कृमिमात्राल्पकायानां सम्भृतिर्विस्मयास्पदम् ॥
कतकस्य फलं वारिप्रसाधनविधित्सया ।
द्विपः क्षिपति तस्यैषा प्रज्ञा ह्यज्ञस्य किं पशोः ॥
गीताकर्णनवैदग्ध्यं मुग्धबुद्धेर्मृगस्य किम् ।
सम्भाव्यते हि येनाऽस्य रोमन्थविरता स्थितिः ॥
भक्षयिष्यति मामित्थमाखोर्विवरवर्तिनः ।
मार्जारं प्रति का शङ्का सर्वज्ञज्ञापनं विना ॥
भयात् कूर्मः स वार्यन्तः सर्वाण्यङ्गानि गूहते ।
दुर्भेदबुद्धिस्तत्रास्य विवेकविकलस्य किम् ॥
वीक्ष्यान्यक्षीणपक्षाणां वैलक्षण्यचेतनः ।
नृत्तमारभते बर्ही स्फुरितं तज्जगद्गुरोः ।
अगाधजलमध्यस्थमत्स्यभक्षणलक्षणम् ।
केनोपदिष्टं तन्मद्गोरनुमानं बिना कृतम् ॥

अशक्यशक्तिः कस्येयं सलिलात् पिबतः पयः।
हंसस्य न पुनस्तस्य हृदयान्तरवर्तिनः॥
कृकवाकोर्गिरः कस्मात् क्षेत्रज्ञव्यापिनं विना।
यासामाकलनोद्युक्ता कालवित्कलना ततः।
प्रवर्तते दिनारम्भे निर्भ्रान्तिकृतसंविधिः॥
शृङ्गदन्तनखादीनि प्राणिनामायुधानि यत्।
परप्रहरणोद्रेके केनाऽऽख्यातान्यसंविदाम्॥
बलं तेजः करी सिंहो जानाति निजमूर्जितम्।
को हेतुर्यावदन्तस्थप्रतिपत्तिर्न सस्फुरा॥
अतिवृष्टेरनावृष्टेर्व्यञ्जकं चिह्नमिङ्गितैः।
सूचयन्ति न तच्चित्रं पशवः पक्षिणोऽपि यत्॥
कृतान्तकल्पैः सिंहाद्यैः प्रीतिः प्राणभृतां कुतः।
विनैकस्य हृदिस्थस्य संवित्संवादसुस्थितम्॥ इति।

तेषां च प्रागुक्तयुक्तया विशेषाभिव्यक्तिः। तथा स्वात्मन्यधिष्ठानात् स्वरूपाच्यवनात्। एवं सर्वत्र सर्वज्ञसर्वतादयो भविष्यन्ति अभिव्यक्तिं यान्तीत्यर्थः। उक्त च--

एको भावः सर्वभावस्वभावः सर्वे भावा ह्येकभावस्वभावाः।
एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः॥

रहस्ययुक्तिरत्रेयं शरीरे यत्र यत्र च।
संविदो दार्ढ्यलाभः स्यात्तत्र तत्र गुणोदयः॥ इति ॥३९॥

अथैषां गुणानामाच्छादकं मूलविच्छेदार्थमाह--

**ग्लानिर्विलुण्ठिका देहे तस्याश्चाऽज्ञानतः सृतिः।**
**तदुन्मेषविलुप्तं चेत् कुतः सा स्यादहेतुका॥ ४०॥**

ग्लानिर्हर्षक्षतिः अनुत्साहरूपा देहे किल विलुम्पिका विनाशिनी। तस्याश्च ग्लानेरज्ञानतः सृतिः सरणमुत्पत्तिः। तच्चाऽज्ञानमुन्मेषेण वक्ष्यमाणलक्षणेनाऽऽत्मस्वभावेन यदा विलुप्तं निर्णोदितं नाशितं तदा कुतः सा ग्लानिरेव का स्यात्कारणरहिता भवेदित्यर्थः। अत एव च योगिनां जरारोगाद्यभावः शरीरदार्ढ्यं च भवेत्॥ ४०॥

अथोन्मेषस्य स्वरूपमाह--

**एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः।**

**उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥ ४१ ॥**

एकस्यां चिन्तायां प्रसक्तस्यैकत्र विषये क्वचिद् व्यापृतचित्तस्य सतो यतो यस्मात् स्वस्वभावादपरस्याश्चिन्ताया उदयोऽभिव्यक्तिर्भवेत् । झटिति यतोऽन्या चिन्तोत्पद्यते विस्मृतस्मरणादिका स चिन्तायाः कारणमुन्मेषो विज्ञेयः । तं च पुनरुन्मेषं स्वयमात्मनोपलक्षयेद्विजानीयात् । चिन्ताद्वयमध्ये व्यापकत्वेनाऽनुभूयमानतया स्वसंवेद्यत्वाद् बृहत्कुमारीसुखवदनुपदेश्य इत्यर्थः । ॥ ४१ ॥

अस्य चानुशील्यमानस्य प्रत्ययानाह--

**अतो बिन्दुरतो नादो रूपमस्मादतो रसः ।**
**प्रवर्ततेऽचिरेणैव क्षोभकत्वेन देहिनः ॥ ४२ ॥**

अतोऽस्मादुन्मेषादनुशील्यमानादचिरेणैव कालेन देहिनः पुंसि बिन्द्वादयः प्रवर्तन्ते उत्पद्यन्ते । बिन्दुस्तेजोरूपो भ्रूमध्यादौ । नादोऽकृतिमोऽनाहतात्मकः शब्दब्रह्माख्यो दूराच्छ्रवणं च । रूपमन्धकारे दर्शनं देवतानां च सूक्ष्मादि प्रदर्शनं च । रसो मुखेऽमृताऽऽस्वादः षड्रसानां च । कथमेते प्रवर्तन्ते उत्पद्यन्ते ? क्षोभकत्वेन उत्कृष्टसिद्धिविघ्नकारित्वेन । तथा च पतञ्जलिः--

'ततः प्रातिभश्रावणवेदनाऽदर्शनाऽऽस्वादवार्ता जायन्ते । ते समाधावुपसर्गा व्युत्थाने सिद्धयः' इति ।

अन्यच्च अनेन युक्त्या सृष्ट्यादिक्रमो ध्वनितः । यतः प्रागुन्मेषात् सृष्टिरुक्ता । सा च कथम् ? अतोऽस्मदादौ बिन्दुरिच्छादृग्शक्तिप्रसररूपः । ततो नादः शब्दात्मको वागाख्यः क्रियाशक्तिरूपः । ततो रूपं पदार्थदर्शनविचारस्वरूपम् । ततस्तत्रैव रसोऽभिलाष उपभोगरूपश्चेति । एष एवातिरहस्यक्रमार्थविदामुद्योगावभासचर्वणाविलापनरूपः क्रमचतुष्कोऽक्रमोऽत्रैव युक्त्यैवोक्तः—

**'न बाधते विशेषो हि प्रकृतं परिभाषया'** इति ।

तद्यदुक्तं स्वयं तमुपलक्षयेदिति ॥ ४२ ॥

तत्कथमित्यत्रोपायमाह--

**दिदृक्षयेव सर्वार्थान् यदा व्याप्यावतिष्ठते ।**
**तदा किं बहुनोक्तेन स्वयमेवावभोत्स्यते ॥ ४३ ॥**

द्रष्टुमिच्छा दिदृक्षा तया तदवस्था इव सर्वार्थान् सर्वभावान् व्याप्याधिष्ठाय यदाऽवतिष्ठते वर्तते तदा किं बहुनोक्तेनाधिककथनेन ? स्वयमेवात्मनैव तत्तत्स्वभावमवभोत्स्यतेऽवगम्यते ज्ञास्यतीत्यर्थः । अयमत्रोपदेशाशयः-- यथा कुतूहलदिदृक्षु-

विकासवृत्त्यास्ते, एवं यः सर्वभावोन्मुख्यरूपोद्यन्त्रितः स्वरूपे तिष्ठति स स्वभावं सर्वज्ञतादिगुणास्पदं स्वयमाप्नोति । यतः प्रागुक्तम्--'अतः सततमुद्युक्तः' इत्यादि । या चैषा स्थितिः सैव तत्त्वार्थचिन्तामणौ रहस्यमुद्रेत्युक्ता । मयोक्तं भोगमोक्षप्रदीपिकायाम्--

उद्यन्तृताबलेन तु विकासवृत्त्या स्वरूपगस्तिष्ठेत् ।
स्वयमुपसृतेन्द्रियार्थानश्नन्नानन्दभूमिगो योगी ॥
एषोच्छृङ्खलरूपा विकस्वरतरा प्रबुद्धबुद्धीनाम् ।
सिद्धाः स्थिता सदाऽस्यां ह्यानन्दरताः परा च मुद्रैषा ॥ इति ।

अन्यत्रोक्तं च--

सर्वाः शक्तीश्चेतसा दर्शनाद्याः स्वे स्वे वेद्ये यौगपद्येन विष्वक् ।
क्षिप्त्वा मध्ये हाटकस्तम्भभूतस्तिष्ठन्विश्वाधार एकोऽवभासि ॥ इति ।

तथा--

स्वच्छन्दं वा यत्र तत्र व्रजन्तीर्वंशस्त्रीवच्चञ्चला या दृगाद्याः ।
शक्तीः पश्यन् केवलं नानुगच्छेद्विश्वं बिभ्रद्भासि तस्य त्वमन्यः ॥

इति ॥ ४३ ॥

अस्यामेव स्थितौ युक्तिमाह--

प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोक्य गोचरम् ।
एकत्राऽऽरोपयेत् सर्वं ततोऽन्येन न पीड्यते ॥ ४४ ॥

प्रबुद्धोऽसंकुचितशक्तिर्निर्विकल्प उद्योगवत्तृरूपतया सर्वकालं तिष्ठेद् वर्तेत । ज्ञानगोचरं विषयमालोक्य परिच्छिद्य संविद्दीप्त्या ज्ञेयं विलाप्याऽविभागं नीत्वेत्यर्थः । मयैव चोक्तं भोगमोक्षप्रदीपिकायाम्--

अथवा विभागबोधज्वलनेन विलाप्य वेद्यपीयूषम् ।
पीत्वा तृप्तो विचरन्नीरोगो योऽचिरात् सदैकाकी ॥
एतत्क्रमार्थसारं परधाराभूमिका च शक्तीनाम् ।
तदनुज्ञयाऽत्र कथितं सच्छिष्यविबोधनाय यथा ॥ इति ।

यतः सा निर्विभाग । उक्तं हि—

देशकालक्रियाकाराः प्रसिद्धा भागहेतवः ।
ते न सन्ति पुनर्यस्य विभागस्तस्य किंकृतः ॥ इति ।

अन्यच्च—

मनः सविषयं दाह्यं ज्ञानाग्निर्दर्शनैर्दहेत् ।
अन्तर्बहिर्मुखश्चैवं समाधिरुपपद्यते ॥ इति ।

तथा--

विज्ञानवाडवो दीप्तः स्वशक्त्या ज्ञेयतोयधीन् ।
अजस्रं ग्रसते नान्यस्तद्ग्रासे शक्तिमान् भवेत् ॥
नाऽप्राप्त्या पयसां तृष्णा प्राप्त्या वा भूयसामपि ।
यस्यास्ति कृतकृत्यत्वं कोऽप्यसौ वडवामुखम् ॥ इति ।

प्राक्चैतत्सोपपत्तिकं वितत्योक्तम् । यस्मात् सर्वमयो जीव इत्यादि । एवमेकत्र तत्त्वस्वभावे चिदात्मके ज्ञानरूपे सर्वमारोपयेदेवयं नयेत् । अत एव ततोऽन्येन वक्ष्यमाणेन कलासमूहेन शक्त्यात्मकेन विकल्परूपेण न पीड्यते बाध्यते न स्वरूपात् प्रच्याव्यत इत्यर्थः । उक्तं च—

एकं व्याप्ति व्योमकुड्यादियोगात्तस्मिन् बाह्याऽभ्यन्तरत्वं समाधिः ।
पश्यत्येकं ग्राहकग्राह्यरूपं व्याक्षिप्ताक्षेप्यतस्त्वत्समाधिः ॥

इति ॥ ४४ ॥

एवं यः प्रबुद्धः पतिः सोऽन्येन न पीड्यते । अर्थाद्योऽप्रबुद्ध पशु स हन्यते । स च कथं किंलक्षणश्चेत्युच्यते--

शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम् ।
कलाविलुप्तविभवो गतः सन् स पशुः स्मृतः ॥ ४५ ॥

शब्दानां राशिः शब्दराशिः वर्णसमूहो मातृका अकारादिक्षकारान्ता शब्द-जननी । वर्णात्मकत्वाच्छक्तिनाम् । तत्समुत्थस्य कादिवर्गात्मकस्य । ब्राह्म्यादि-शक्तिचक्रस्य कलाभिः ककाद्यक्षरैर्विलुप्तविभवो हृतमहाव्याप्तिः स्वभावात् प्रच्या-वितोऽत एवास्य भोग्यतां गतः सन् पुरुषः पशुरुच्यते, अज्ञत्वात् । उक्तं च ईश्वर-प्रत्यभिज्ञायाम्—

स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः ।
मायातो भेदिषु क्लेशं कर्मादिकलुषः पशुः ॥

क्वापि च--

भेदग्रन्थिविभेदे हि कर्मात्मैक्यं प्रपद्यते ।
सोऽविज्ञातः पशुः प्रोक्तो विज्ञातः पतिरेव सः ॥

इति ॥ ४५ ॥

अतश्च--

परामृतरसापायस्तस्य यः प्रत्ययोद्भवः ।
तेनाऽस्वतन्त्रतामेति स च तन्मात्रगोचरः ॥ ४६ ॥

तस्य च पशोर्यः प्रत्ययोद्भवः श्रोत्रादिद्वारेण विषयदर्शनेन स्मरणादिज्ञानोत्पत्तिः स एव परामृतरसात् स्वरूपोदयादपायः प्रच्युतिः । यतस्तेन स पुमानस्वतन्त्रतां पारतन्त्र्यमसर्वगतत्वाद्यमेति प्राप्नोति । स च प्रत्ययोद्भवस्तन्मात्रगोचरः शब्दादिविषयविषयस्तदभिलाषात्मक इत्यर्थः ॥ ४६ ॥

अत एव च--

स्वरूपावरणे चास्य शक्तयः सततोद्यताः ।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः ॥ ४७ ॥

अस्य च पुंसः स्वरूपावरणे स्वभावाच्छादने शक्तयः पूर्वोक्ता ब्राह्म्याद्या शब्दरूपाः क्रियाशक्तिद्वारेण सततमुद्यताः सदा सन्निहिताः पुरूपकल्पनाय । यतः शब्दानुवेधेन वर्णानुगमेन विना न प्रत्ययोद्भवो ज्ञानसंवेदनमस्ति । शब्दायत्तत्वात्पदार्थस्य वाच्यवाचकयोरन्योन्यद्योतकत्वाच्च । तथा चोक्तं वाक्यपदीये--

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन दृश्यते ॥ इति ।

प्राक्चोक्तं हि--

'वागेवास्याः कारणं विश्ववृत्तेः' इत्यादि ।

अन्यच्च--

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ॥ इति ॥ ४७ ॥

अथास्या एव क्रियाशक्तेर्बन्धमोक्षहेतुतामाह--

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥ ४८ ॥

येषा अज्ञानां बन्धयित्री बन्धजननी भवेत् । अक्रियात्मिका क्रियास्वभावाऽशक्ता । सैवेयं शिवस्य सुप्रबुद्धस्य पशुवर्तिनी पशुवद्यथेष्टविनियोज्यतया या वर्तते सा तथोक्ता । सा च स्वमार्गस्था मदीयेति ज्ञाता सिद्ध्युपपादिका परापरसिद्धिप्रदा

भोगमोक्षावहेत्यर्थः । अर्थाच्च भिन्ना ज्ञाता बन्धदा भवति । अथवेयं व्याख्या—सेयमित्याद्यन्यस्तुल्यार्थः । स्वमार्गस्था स्वतन्त्रा अज्ञाता बन्धयित्री । ज्ञाता तु सिद्ध्युपपादिकेति । उक्तं चैतत्प्राक्--'प्राणिनां पतनं येन' इत्यादिना ॥ ४८ ॥

कथं त्वेषा बन्धहेतुतामापद्यते तत्स्फुटीकर्तुमाह—

**तन्मात्रोदयरूपेण मनोऽहम्बुद्धिवर्तिना ।**
**पुर्यष्टकेन संरुद्धस्तदुत्थप्रत्ययोद्भवम् ॥ ४९ ॥**
**भुङ्क्ते परवशो भोगं तद्भावात् संसरेदतः ।**
**संसृतिप्रलयस्याऽस्य कारणं संप्रचक्ष्महे ॥ ५० ॥**

पुर्यष्टकस्य किल द्वे रूपे स्तः--एकं सूक्ष्ममातिवाहिकाख्यं तन्मात्रमभिलापात्मकम्, द्वितीयं स्थूलं भौतिकं भोगाख्यम् । तत्र सूक्ष्मेण पुर्यष्टके संरुद्धो बद्ध आवृतः, अत एव परवशः सन् तदुत्थप्रत्ययोद्भवं सुखदुःखसंवेदनरूपं भोगं भुङ्क्ते अश्नाति । कीदृशम् ? तन्मात्राणां शब्दादिनामनुभवद्वारेण य उदयोऽभिव्यक्तिः स एव रूपं यस्य तेन, तथा मनोहङ्कारबुद्धिवर्तिना चान्तःकरणसंयुक्तेन । तस्य च पुर्यष्टकस्य भावात्तद्वशाच्छरीरी संसरेत् संसारं याति । अत एवास्य संसृतिप्रलयस्य जननमरणप्रवाहस्यैतदेव कारणं हेतुं संप्रचक्ष्महे कथयामः ॥ ४९-५० ॥

एवं बन्धनिमित्तमुपवर्ण्यास्योच्छेदोपायमाह--

**यदा त्वेकत्र संरूढस्तदा तस्य लयोद्भवौ ।**
**नियच्छन् भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥ ५१ ॥**

एवम्—

**'बन्धमोक्षविचारेण प्रबोधाख्या यदा पुनः'** इति ।

पुर्यष्टकद्वयमध्यादेकत्रैकस्मिन् पुर्यष्टके स्थूले सूक्ष्मे वा पतित्वेन संरूढो लीनचित्तस्तदा तस्य तदुत्थप्रत्ययोद्भवस्य शब्दार्थौ लयोद्भवौ प्रध्वंसप्रादुर्भावौ नियच्छन् स्वेच्छया कुर्वन् भोक्तृतामेति । प्रभुत्वं प्राप्नोति । भोग्यरूपात् पशुत्वान्मुच्यते इत्यर्थः । तदुक्तम्—

**पशूनां तु पतिर्भूत्वा पशूनां तु पतिर्भवेत् ।**
**पशुत्वान्मुच्यते सद्यो भूत्वा पशुपतेः पतिः ॥** इति ।

स्वबोधोदयमञ्जर्यां च—

**यद्यन्मनोहरं किञ्चिदक्षिगोचरमागतम् ।**
**एकाग्रं भावयेत्तावद्यावल्लीनं निरोधकृत् ॥** इति ।

एवं सति स्वातन्त्र्याप्तेस्ततश्चक्रेश्वरः शक्तिचक्रस्वामी सर्वज्ञतादियुतः सर्वाधिपतिर्भवेदित्यर्थः ॥ ५१ ॥

एवमस्याद्यश्लोके शक्तिचक्रैश्वर्यं यदुक्तं यदिहापि—

अथेत्थं ग्रन्थनिष्पत्तेर्ग्रन्थकर्ता गुरोर्गिरम् ।
प्रहर्षवशतः स्तौति नीतिं शिष्यांश्च शिक्षयन् ॥

अगाधसंशयाम्भोधिसमुत्तरणतारिणीम् ।
वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम् ॥ ५२ ॥

तामहं गुरुभारतीं वन्दे कीदृशीम् ? दुरवगाहसन्देहार्णवपारोत्तारिणीम् । अन्यच्च विचित्रोऽर्थोऽभिधेयो विचित्राणि पदानि शब्दा यस्या सा तथोक्ता । अत एव चित्रामाश्चर्यभूतामाचार्यसरस्वतीं स्तौमि । नहि गुरोर्गरीयानन्योऽस्ति । तदुक्तं जयायाम्--

यस्माद्देवो जगन्नाथः कृत्वा मन्त्रमयीं तनुम् ।
मग्नानुद्धरते लोकान् कारुण्याच्छास्त्रपाणिना ॥ इति ।

नारदसंग्रहे च--

गुरवे दक्षिणां दद्यात् सर्वस्वं सार्थमेव वा ।
सर्वस्वमथवाऽत्यल्पं संसारोच्छेदहेतवे ॥ इति ।

मयोक्तं क्वापि—

भगवत्प्राप्तिकामो यस्तेनान्वेष्यो गुरुर्यतः ।
भगवान् ज्ञायते शास्त्राच्छास्त्रं च ज्ञायते गुरोः ॥
तद्बोधाद् ज्ञानविलयाज्ज्ञानाप्तौ प्राप्त एव सः ।
तस्माच्छास्त्रादीश्वराच्च गरीयान् गुरुरुच्यते ॥ इति ।

पञ्चरात्रेऽपि--

'यथा भगवत्येव वक्तरि वृत्तिः' इति ॥५२॥

अथाम्नायक्रमवर्णनद्वारेण संग्रहकृत्कीर्त्यर्थं श्लोकेनोपबध्नाति—

वसुगुप्तादवाप्येदं गुरोस्तत्त्वार्थदर्शिनः ।
रहस्यं श्लोकयामास सम्यक् श्रीभट्टकल्लटः ॥ ५३ ॥

अस्यार्थः प्रारम्भ एवोक्त इति पुनर्नोच्यते । इदं च ब्रह्मविद्याबीजं नाऽपरीक्ष्याऽस्थाने वपेत् । उक्तं ह्यनेनैवाऽन्यत्र—

गुणैरुपेताऽपि तु सिद्धविद्या कन्येव दत्ता गुणवर्जिताय।
सम्भोगहीना विदधात्यकीर्ति दातुर्यतस्तत्प्रगुणाय दद्यात्॥

इति॥ ५३॥

इत्यविद्यातमःस्थानां दर्शनाय प्रकाशिता।
सतां सुपर्णदेशेव शुद्धामलगुणोज्ज्वला॥
वागलुण्ठनार्थमन्येषां विद्वन्मन्यतयाऽपि तु।
शुद्धबोधोल्लासवशात् कृता स्पन्दप्रदीपिका॥
तस्मात् प्रोत्सार्य मात्सर्यमर्थमर्थं विचार्य च।
आर्यैराश्चर्यभूताया न कार्योऽस्या अनादरः॥

नारायणस्थानज उत्पलाख्यस्त्रिविक्रमाख्यस्य सुतोऽग्र्यजन्मा।
यस्तेन सच्छिष्यहिताय दृष्टा व्याख्या मयैषा च तमोनुदे स्यात्॥
गतिः स्खलन्ती न क्वचिद्यथा निशि स्याद्दीपहस्तस्य तथा स न क्वचित्।
स्खलत्यमार्गेऽपि करेऽस्ति यस्य हि प्रदीपिकेयं प्रगुणप्रकाशिका॥

किं वा बहूक्तिभिरिमां तु सरस्वतीं मे
बोधद्रुमोत्तमसृतां परतीर्थयुक्ताम्।
स्वच्छां विगाह्य विबुधत्वमुपैति मर्त्यो-
ऽप्यत्यक्तदेह इह चित्रमतः परं किम्॥

इत्याचार्यभगवतोत्पलविरचिता स्पन्दप्रदीपिका समाप्ता।

ॐ नमः सच्चिदानन्दाय

अथ

# स्पन्दसंदोहः

## श्रीमन्महामाहेश्वराचार्यवर्य-श्रीक्षेमराजाचार्यविरचितः

अकलितमहिमा यः क्ष्मादिसादाशिवान्तं
कलयति हृदि विश्वं चित्रसंयोजनाभिः ।
प्रथयति च विचित्राः सृष्टिसंहारलीलाः
स जयति शिव एकः स्पन्दवान्स्वप्रतिष्ठः ॥ १ ॥

चैतन्याब्धेः प्रसरदमृतं त्रोटितायासतन्त्रं
सर्वस्यान्तः स्फुरदपि महामुद्रया मुदितं यत् ।
पूर्णानन्दप्रदमतितरामेतदुन्मुद्रच युक्त्या
योऽन्तर्वक्त्रं रसयति जयत्येष वीरः कुलेन्द्रः ॥ २ ॥

उन्मीलितं स्पन्दतत्त्वं महद्भिर्गुरुभिर्यतः ।
तत एव तदाभोगे किंचित्कौतुकमस्ति नः ॥ ३ ॥

तत्र आद्यमेव सूत्रं विमृश्यते, परमाद्वयप्रकाशानन्दमयमहेश्वरस्वरूप-प्रत्यभिज्ञापनाय समस्तशास्त्रार्थगर्भां समुचितां स्तुतिमिमामुपदिदेश श्रीमान् वसुगुप्तगुरुः

यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शंकरं स्तुमः ॥ १ ॥

शम् अशेषोपद्रवरहितपरमानन्दाद्वयचैतन्यप्रकाशप्रत्यभिज्ञापनात्मकम् अनुग्रहं करोति यः तं स्वात्मपरमार्थं शंकरं स्तुमः—समस्तदेहप्राणादिपरिमितप्रमातृपदमधस्पदीकृत्य विकल्पाविकल्पादिरूपासु सर्वासु दशासु सर्वोत्कृष्टतया परामृशामः । बहुवचनम् आत्मीकृताशेषानुग्राह्यजनाभेदप्रथनाय ।

तम् इति च असाधारणस्वरूपप्रत्यभिज्ञापनाय। कोऽसौ शंकरः? इत्याह यस्योन्मेष इति। अत्र एके स्वरूपप्रकाशनतद्गोपनाभ्यां यत्कर्तृकाभ्याम् उन्मेषनिमेषाभ्यां जगतो विश्वस्य प्रलयोदयौ विनाशसर्गौ इति व्याख्यातवन्तः तदेके न सेहिरे, तथाहि–उन्मेषनिमेषौ कादाचित्कौ कादाचित्कजगन्नाशोदय-हेतू कथं नित्ये भगवति स्याताम्? अत उन्मेषनिमेषधर्मकजगत्कारणत्वात् एकैव भगवच्छक्तिः उन्मेषनिमेषशब्दाभ्यां व्यवह्रियते। तथा च यथासंख्यं त्यक्त्वा यथासंभवं यस्य उन्मेषात् जगदुदयो, यन्निमेषात् च प्रलयः इति व्याचचक्षिरे। अत्रापि च शास्त्रार्थोपदेशदृशा शंकरस्वरूपाभिन्नस्य जगतोऽपि कथं कादाचित्कौ विनाशोदयौ भवेताम्? इति तुल्ये प्रसङ्गे, यदि आभास-परमार्थानुसारेण तथाभासपरमार्थस्य शंकरस्वभावाभिन्नस्य जगतः तथा-भासनमयावेव विनाशोदयौ इष्येते उन्मेषनिमेषावपि तथाभासपरमार्थौ भगवति किं न इष्येते। कालोऽपि आभासनसारो, न तु तद्व्यतिरिक्तः कश्चित्, इति कथमसौ वराकः आभासयितरि भगवति भेदशंकास्पदम्।

'एकचिन्ताप्रसक्तस्य' (३।६)

इति च उन्मेषलक्षणमत्रैव अस्ति। तदनुसारेण च निमेषलक्षणमपि स्वरूप-गोपनारूपमूह्यम् इति यथासंख्येऽपि न क्षतिः इत्यपरे। तदलमाख्यायिका-वर्णनेन। प्रकृतमुच्यते––यस्योन्मेष इति। इह परमेश्वरस्य महाप्रकाशात्मनो विमलस्यापि एकैव परामर्शशक्तिः किंचिच्चलत्ताभासरूपतया स्पन्दः इति, स्फुरत्ता इति, ऊर्मिः इति, बलम् इति, उद्योगः इति, हृदयम् इति, सारम् इति, मालिनी इति, परा––इत्याद्यनन्तसंज्ञाभिः आगमेषु उद्घोष्यते। सा च एकापि युगपदेन उन्मेषनिमेषमयी। तथाहि––सदाशिवादिक्षितपर्यन्तस्य तत्त्वग्रामस्य प्राक्सृष्टस्य या संहारापेक्षया निमेषभूः सैव स्रक्ष्यमाणभेदा-पेक्षया उन्मेषदशा। प्राक्सृष्टभेदसंहाररूपा च या निमेषदशा सैव चिदभेद-प्रथाया उन्मेषभूः। भेदासूत्रणरूपा च या उन्मेषदशा सैव चिदभेदप्रथाया निमेषभूः। मायापदेऽपि च नीलदिदृक्षात्मप्राग्भूमिरूपा उन्मेषावस्थैव स्फुरितनीलपूर्वपीतावभासनविश्रान्त्यात्मकनिमेषरूपा सर्वस्य स्वसंवित्सिद्धा। अपि च इयं दिदृक्षाभूमिः नीलस्य इदन्तावभासनासूत्रणस्वभावोन्मेषरूपापि, तदैव तस्यैव परमेश्वराभिन्नस्वभावनिमेषपरमार्थापि, वस्तुतस्तु मायापदेऽपि निमेषोन्मेषोपलक्षितसर्वशक्तिविलोलतारूपा इयं परा विमर्शभूमिरेव सर्वदा सर्वस्य स्फुरन्त्यपि मायादशायां न निरूढिं लम्भयति संविदं स्वात्मनि, तत्रापि मध्ये मध्ये प्रकटीभवति। यत्स्वरूपाभिज्ञानाय स्फुटयिष्यति

अतिक्रुद्ध········ । ( १।२२ )

इत्यादि

'·········अनावृतः ॥' (१।२५) इत्यन्तं श्लोकचतुष्टयम् । परशक्तिपातप्रकाशध्वस्तमायावरणस्य तु शिवपदावाप्तौ करालम्बनं ददत्येव परं पूर्णतया सर्वदा न परिस्फुरति । यद्वक्ष्यति

'यदा क्षोभः प्रलीयेत······' ( १।९ )

इत्यादि

'···········'करोति च ॥' ( १।१० ) इत्यन्तम् ।

तथा 'जाग्रदादि···(१-३) इत्यारभ्य' 'तदस्ति परमार्थतः ।' (१-५) इत्यन्तम् । तथाहि—यदा प्रथमायाः शिवात्मनः सामरस्यभूमेः पूर्णाहन्तात्मसामरस्यावस्थितं विश्वं यदि न भवति अविद्यमानं कथं सृज्येत, नीलदिदृक्षारूपा त्रुटिपातापरपर्याया दशा उदिता, तदा नीलमात्रापेक्षया अहन्ताच्छादितेदन्तासूत्रणरूपा तावती सदाशिवेश्वरता उच्यते । तदैव सैव च पूर्णाहन्तात्मसामरस्यावस्थितविश्वापेक्षया शिवतापि, यदि हि अन्या सदाशिवप्रकाशात्मतया नावस्थिता स्यात् कथम् उत्तरकालं सृज्येत चिद्रूपव्यतिरेकेण अन्यस्य स्रष्टृत्वानुपपत्तेः । प्रमापितं च एतत् प्रत्यभिज्ञायाम्

'चिदात्मैव हि देवोऽन्तः स्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥' (१।५।७)

इति । इहापि वक्ष्यति

'यत्र स्थितमिदं विश्वं कार्यं यस्माच्च निर्गतम्' ( १।२ )

इति । ते च एते शिवतासदाशिवेश्वरते परस्परव्याप्त्या अवस्थिते एकरूपे एव । यदा तदा इति हि उपदेश्यापेक्षया वाचि क्रमोऽयं, न वस्तुनि । अत एव युगपदेव इयं संवित् स्रष्ट्री च संहर्त्री च इति सक्रमाभासा, अस्रष्टृसंहर्तृरूपा शुद्धाहन्ताप्रकाशमयी अक्रमापि इत्यलम् । उपदेशधना एव एनां भूमिं चिन्वते इति । इहापि च

'दिदृक्षयैव ··· ··· ····' ( ३।११ ) इत्यत्र सूत्रे

'तमाधिष्ठातृभावेन······' ( १।११ )

इत्यत्र च अयमेव उपदेशार्थः ।

'सदा सृष्टिविनोदाय ··· ··· ··· ।'
'प्रतिक्षणमविश्रान्तः ··· ··· ···।'
'प्राकाम्यमात्मनि यदा ··· ··· ···।'

इत्यादौ च गुरूणामयमेव आशयः। अस्ति च आगमः

'लेलिहाना सदा देवी सदा पूर्णा च भासते।
ऊर्मिरेषा विबोधाब्धेः शक्तिरिच्छात्मिका प्रभोः ॥'

इति। एवमियम् एकैव अविभागा विमर्शभूमिः उन्मेषनिमेषमयी उन्मेष-निमेषशब्दाभ्यामभिधीयते। ततश्च उन्मेषौ च निमेषौ च इति विगृह्य उन्मेषस्य निमेषमयस्य, निमेषस्य च उन्मेषमयस्य, प्राधान्येतरताविभक्तस्य धरण्यादि-सदाशिवान्तं जगत् प्रति प्रलयोदयहेतुत्वं व्याख्यातव्यम्। एवं च प्रलयौ च, उदयौ च इति विगृह्य प्रलयोदयौ इति व्याख्येयम्। तथाहि—नीलादेः यो बहीरूपताया उदयः स एव अहन्तारूपतायाः प्रलयः, एवं यो बहीरूपतायाः प्रलयः स एव अहन्तारूपताया उदयः इति प्रलयोऽपि उदय-रूपः, उदयोऽपि प्रलयपरमार्थः। भेदाभेदप्राधान्येतरताकृतस्तु अत्र विवेकः। वस्तुतः चिदात्मैव तथा भाति इति अक्रमतैव अत्र इत्युक्तम्। समासश्च इत्थमेव उपपन्नः। तथा च द्वन्द्वसमासे भाष्यम्

'यदि निदर्शयितुं बुद्धिः एवं
निदर्शयितव्यम् धवौ च खदिरौ च।'

इत्यादि। इहैव च स्वतन्त्रशिवाद्वयदर्शने एकैकस्य अर्थस्य अनेकत्वं संगच्छते। अन्यत्र हि प्रतिनियतरूपा भावाः इत्येकोऽपि द्व्यर्थः, अपरोऽपि द्व्यर्थः इति का संगतिः इत्यलम् अप्रकृतेन। एवं च व्याख्याते सति यत् पञ्चविधकृत्यकारित्वं श्रीस्वच्छन्दादिशास्त्रेषु परमेश्वरस्य उच्यते, तदपि स्वीकृतम्। तथा च—भेदासूत्रणतदुल्लासनरूपेण उन्मेषेण किंचित्स्वरूपनिमेषमयेन शुद्धाशुद्धरूपा द्विविधा षडध्वनः सृष्टिः। एवं द्विविधभेदनिमेषेण किञ्चिदभेदस्पृगूर्ध्वो-न्मेषणरूपेण संहारः। तथा उन्मेषनिमेषाभ्यां लोलीभूताभ्याम् आभासनाना-भासनप्रसरपरमार्था स्थितिः। यथोक्तम्

'··· ··· ··· ··· लोलीभूता परा स्थितिः।'

इति सिद्धपादैः। तथा उत्पन्नस्वरूपोन्मेषाभासरूपो वस्तुतो निरयादिभोग-मयो यः पूर्णो निमेषः स्वस्वरूपस्य स विलयः। सर्वात्मना पुनः यः पूर्णः उन्मेषः स चाशेषभेदोपशमनान्निरूपितपूर्वार्द्धितो निमेषमयः, सोऽनुग्रहः इति परमेश्वरस्य पञ्चविधकृत्यकारित्वम् अनेनैव स्पृष्टम्। इत्थं प्रलयोदयावपि

संगमनीयौ। प्रलयादिकं च आभास्यनिष्ठं आभाससारमेव, न तु प्रकाशात्मनोऽस्य परमेश्वरस्य तत् किंचित्। यद्वक्ष्यति

'अवस्थायुगलं चात्र ··· ··· '(१-१४)

इत्यारभ्य।

'··· ··· ··· ··· कर्तृत्वं···।'(१-१४)

इत्यन्तम्। मायाप्रमातृभूमावपि परमेश्वरस्य प्रकाशात्मनः इदं पञ्चविधकृत्यकारित्वं स्थितमेव, पूर्णं तु तत्संबन्धसावधानविज्ञानशालिसंचेत्यम्। एवंभूतस्य हि भगवतो नीलप्रकाशादिकाले नीलाभासे देशकालसंभिन्ने स्रष्टृता, देशकालाकारान्तरसंभिन्नशंकायां संहारः, प्राक्सृष्टे नीलाद्याभाससामान्ये स्थितिहेतुता, तत्रैव अभेदांशसर्गे विलयहेतुता इत्यादि पीताभासादावपि योज्यम्। तथा प्रथमाभासितनीलतद्ग्राहकभावापेक्षया संहर्तृत्वम्, अवभासमानपीततद्ग्राहकभावापेक्षया स्रष्टृत्वम्, विच्छिन्नताभासाद्यपेक्षया स्थितिहेतुता, अन्तःसंस्काररूपतापादिताभासापेक्षया विलयकारित्वम्, शुद्धसंविदैक्यापन्नप्रविलापितस्मृत्यादिबीजभावाभासापेक्षया अनुग्रहीतृत्वम् इत्येवं सर्वदा सर्वासु दशासु पञ्चविधकृत्यकारित्वं माहेश्वरमेव एकरूपं सर्वत्र जृम्भमाणमवस्थितम् इति। तत्रैव चिच्चक्रैश्वर्यात्मनि स्वस्वभावे शंकररूपे स्वप्रकाशे केषांचिदेव अनुत्तरसमाधिधनानां धिषणा अधिरोहति, न तु अन्येषां देहाद्यहंभावभाविनाम्। यदुक्तं भर्गशिखायाम्

'वीरभैरवदेवोऽपि परमानन्दविग्रहः।
उदेति मोहपङ्काङ्के पशुहृत्कुहरे कथम्॥'

इति। एवं च व्याख्यातोपदेशप्रकारः इहैव अग्रे स्फुटीभविष्यति

'जाग्रदादि··· ··· ··· ··· ··· ···'(१-३)

इत्यारभ्य

'तदस्ति परमार्थतः ··· ··· ··· ···॥'(१-५)

इत्यत्र। तथा

'तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी।' (१-१७)

'अतः सततमुद्युक्तः स्पन्दतत्त्वविविक्तये।' (१-२१)

'इति वा यस्य संवित्तिः ··· ··· ··· ···' (२-५)

'प्रबुद्धः सर्वदा तिष्ठेत्··· ··· ··· ··· ···' (३-१२)

इत्यादिस्थानेषु। ग्रन्थप्रान्ते च इदमेव संहरिष्यति।

'यदा त्वेकत्र संरूढस्तदा तस्य लयोद्भवौ ।
नियच्छन्भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥' ( ३ । १९ )

इति । लयोदयौ हि अत्र व्याख्यातपरमार्थाविव । इदमेव च चक्रैश्वर्यं—यत् सर्वदा पञ्चविधकृत्यकारिचिन्मयस्वरूपावस्थानम् इति अलं कतिपयजन-हृदयाश्वासदायिनीभिः कथाभिः ।

अपि च यस्य चिदानन्दघनस्य आत्मनः उन्मेषनिमेषाभ्यां स्वरूपो-न्मीलननिमीलनाभ्यां 'यदन्तः तद्बहिः' इति कृत्वा जगतः शरीररूपस्य, तदनुषङ्गेण च बाह्यस्यापि विश्वस्य, प्रलयोदयौ निमज्जनोन्मज्जने इति समावेशव्युत्थानापेक्षया यथासंख्येनापि योज्यम् ।

ननु च श्रीमत्स्वच्छन्दाद्यागमोक्तप्रकारेण यथा ब्रह्मादीनां स्वाप-प्रबोधावस्थयोः तदधरवर्तिलोकानां व्यतिरिक्तानामेव प्रलयोदयौ भवतः, तथा परमेश्वरापेक्षयापि विश्वस्य व्यतिरिक्तस्यैव प्रलयोदयौ इति तावत् उक्तम् । दृष्टं हि कुम्भकारादीनां व्यतिरिक्तकार्यकारित्वम् इति तावत् उक्तम् । दृष्टं हि कुम्भकारादीनां व्यतिरिक्तकार्यकारित्वम् इति प्रमाण-सिद्धमेव किम् अभ्युपगम्यते, आहोस्वित् अन्यथा ? इति संशयं शमयितुं विशेषणद्वारेण हेतुमाह । 'शक्तिचक्रविभवप्रभवम्' इति ।

'शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः ।'

इत्यागमस्थित्या यावत् किंचित् आभासते, तत् सर्वं प्रकाशमयमेव—अप्र-काशस्य प्रकाशनानुपपत्तेः इति युक्तिवशेन स्वप्नसंकल्पादौ संविद एव आभासोल्लासनाहेतुत्वं दृष्टम् इति । अनुभवानुसारेण च प्रकाशस्यैव भग-वतः प्रकाशमानं विश्वम् यस्य शक्तयः, तासां यत् चक्रं संयोजनादिवैचित्र्य-व्यवस्थितः समुदायः, स एव विभवः स्फीतता, तस्य प्रभवः प्रभवति अस्मात् इति कृत्वा तथातथावभासनपरमार्थः स्वस्वभाव एव यः, तम् । यद्वक्ष्यति ।

'यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवः ।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ॥' ( २ । ३ )

इति । तादात्म्यात् तत्संवेदनं, तस्मात् हेतोः इत्यादि ।

यद्वा शक्तिचक्रस्य इन्द्रियवर्गस्य, यो विभवो निजनिजविषयप्रवृत्त्या-दिकः, तस्य प्रभवं प्राग्वत् । यतो वक्ष्यति ।

'यतः करणवर्गोऽयं ··· ··· ।'
··· ··· ··· प्रवृत्तिस्थितिसंहृतीः ॥'
लभते ··· ··· ··· ··· ।' ( १ । ६ )

इति ।

अथ च शक्तिचक्रस्य करणेश्वरीचक्रस्य यो विभवो विचित्रसृष्टि-संहारादिकारित्वं, तस्य प्रभवं क्रमार्थावभासनकारित्वकृतमक्रममहाप्रकाश-मयम्। यद्वक्ष्यति

'सहान्तरेण चक्रेण प्रवृत्तिस्थितिसंहृतीः ॥
लभते ... ... ।' ( १. ६ )

इति आन्तरं चक्रम् अत्रैतदेव व्याख्येयम्, न तु अन्तःकरणत्रयम्—तस्य करण-वर्गेणैव स्वीकृतत्वात्। करणवर्गस्य स्वात्मनः प्रवृत्त्यादिमात्रत्वम् करणेश्वरी-चक्रस्य तु सृष्ट्यादिकारित्वमेव प्रवृत्त्यादिलाभ इति व्याख्येयम् इत्यलम्।

शक्तिचक्रं मन्त्रगणो मुद्रासमूहश्च, तस्य यो विभवः त्रिविधसिद्धि-साधनसमर्थत्वं, तस्य प्रभवम् इति प्रभवोपलक्षितोत्पत्तिविश्रान्तिस्थानम्। यद्वक्ष्यति

'तदाक्रम्य बलं मन्त्राः ... ...' ( २।१ )

इत्यादि।

... ... ... ... निरञ्जनाः ( २।२ )

इत्यन्तम्। व्याख्यातेन च शक्तिचक्रविभवेन मन्त्रादिसामर्थ्यात्मना प्रभा दीप्तिः यस्य साधकचित्तस्य, तत् वाति गच्छति प्राप्नोति अधितिष्ठति गन्ध-यति च विनाशयति स्वात्मनि विश्रमयति यः तम्। यत् स्फुटीभविष्यति।

'सहाराधकचित्तेन ... ... ... ।' ( २।२ )

इत्यादि।

शक्तिचक्रेण दीक्षानुग्रहध्येयसमापत्त्यादिना सामर्थ्यसंपदा विभवो यस्याचार्यस्योदयस्तस्य प्रभवं। यत् अभिधास्यति।

'अयमेवोदयस्तस्य ... ... ... ... ... ( २।६ )

इत्यादि

... ... .... शिवसद्भावदायिनी' ( २।७ )

इत्यन्तम्।

अपि च शक्तयो ब्राह्म्यादिदेव्यो ब्रह्मादिकारणमाला च, तासां संबन्धि चक्रं स्वभावशून्यपशुप्रमातुः अद्वयरूपोर्ध्वभूम्यनारोहणक्षमो भेदमया-धरसरणिसंचारचतुरश्चव्यूहः, तस्य यो विभवः तथाकार्यकारित्वं तस्य प्रभवम्। यद्वक्ष्यति

'शब्दराशिसमुत्थस्य शक्तिवर्गस्य ........ ' ( ३।१३ )

इत्यादि

'बन्धयित्री .... .... .... ....' ( ३ । १६ )

इत्यन्तम् ।

'तन्मात्रोदय .... .... .... .... ( ३ । १७ )

.... .... .... .... .... प्रचक्ष्महे ॥' ( ३ । १८ )

इत्यन्तं च । तस्यैव शक्तिचक्रस्य यो विभवः स्वस्वभावपदापेक्षया अधराधर-भूत्यागेन ऊर्ध्वोर्ध्वारोहणक्षमता, तस्यापि प्रभवं प्राग्वत् । यदत्रैव वदिष्यति

'....स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥' ( ३।१६ )

इति । किं च शक्तिचक्रं खेचरी-गोचरी-दिक्चरी-भूचर्यादिः—बाह्यान्तरताभेद-भिन्नो नानायोगिनीगणः, तदुपलक्षितो वीरव्रातश्च, तस्य यो विभवः अतीतानागतज्ञानाणिमादिप्राप्तिस्वविषयाभोगसमयपूर्णप्रथावाप्त्याद्यनन्तक्षुद्राक्षुद्रसिद्धिलाभम् ऐश्वर्यं प्राति पूरयति यः, स शक्तिचक्रविभवप्रः स च असौ भवो भवति तेन तेन रूपेण इति कृत्वा, तम् । यद्वक्ष्यति विभूतिस्पन्दे

'यद्येच्छाभ्यर्थितो धाता ....' ( ३ । १ )

इत्यादिना

'कुतः सा स्यादहेतुका ॥' ( ३ । ८ )

इत्यन्तेन श्लोकाष्टकेन । श्रीवामेश्वर्याधिष्ठितानि खेचरी-गोचरी-दिक्चरी-भूचरी-चक्राणि आन्तराणि, बाह्यानि च व्याख्यायन्ते । यत्र वमन्ति विश्वं भेदभेदमयं भेदसारं च, गृणन्ति उच्चैर्गिरन्ति च भेदसारं, भेदाभेदमयं च अभेदसारम् आपादयन्ति इति संसारवामाचाराः वामाः शक्तयः, तासाम् ईश्वरी स्वामिनी एकैव भगवती——तदधिष्ठितत्वात् वामाचक्रमपि वामेश्वरी-चक्रम् अभिधीयते इति । खे बोधगगने चरन्ति इति खेचर्यः प्रमातृभूमि-स्थिताः, परशक्तिपातपवित्रितानां चिदानन्दप्रसरोद्वमनसारा अकालकलि-तत्वादभेदसर्वकर्तृत्वसर्वज्ञत्वपूर्णत्वव्यापकत्वस्वरूपोन्मीलनपरमार्थाः । माया-मोहितानां तु अनानन्दप्रदाः शून्यप्रमातृभूमिचारिण्यः काल-कला-शुद्धविद्या-राग-नियतिमयतया बन्धयित्र्यः । गौः वाक् तदुपलक्षितासु संजल्पमयीषु बुद्ध्यहंकारमनोभूमिषु चरन्ति इति गोचर्यः शक्तिपातवतां शुद्धाध्यवसाया-भिमानसङ्कल्पप्ररोहिण्यः, परेषां तु विपर्यासिन्यः दिक्षु च दशसु बाह्येन्द्रिय-भूमिषु चरन्ति इति दिक्चर्यः अनुगृहीतानां अद्वयप्रथनसाराः, परेषां तु द्वय-प्रतीतिपातिन्यः । भूः रूपादिपञ्चकात्मकं मेयपदं, तत्र चरन्ति तदाभोगमय्य आश्यानीभावेन तन्मयताम् आपन्ना भूचर्यः प्रबुद्धानां चित्प्रकाशशरीरतया स्फुरन्त्यः, इतरेषां सर्वतो व्यवच्छेदकतां दर्शयन्त्यः । इत्येवं वामेश्वरीशक्त्या

प्रसारितानि आन्तराणि अपरपरापरपरप्रथाहेतुत्वात् अघोरघोरघोरतर-नामनिरुक्तानि चत्वारि खेचरी-गोचरी-भूचरी-दिक्चरीचक्राणि तथाविध-वीरव्रातसहितानि तानि। यथोक्तं श्रीपूर्वशास्त्रे

'विषयेष्वेव संलीनानधोधः पातयन्त्यणून्।
रुद्राणून्याः समालिङ्ग्य घोरतर्योऽपराः स्मृताः॥
मिश्रकर्मफलासक्तिं पूर्ववज्जनयन्ति याः।
मुक्तिमार्गनिरोधिन्यस्ताः स्युर्घोराः परापराः॥
पूर्ववज्जन्तुजातस्य शिवधामफलप्रदाः।
पराः प्रकथितास्तज्ज्ञैरघोराः शिवशक्तयः॥'

इति। बाह्यानि पुनरेतद्ग्रामैश्वर्यधिष्ठितान्येव खेचरी-भूचरी-गोचरी-दिक्चरी-चक्राणि। तत्र आकाशे चरन्त्योऽशरीराः खेचर्यः, यदिच्छामात्राधिष्ठित-मिथुनसंप्रयोगजः प्रबुद्धशुद्धविद्योदयो योगिनीगर्भोद्भूतो भवति। यथोक्तं श्रीतन्त्रालोके

'अन्याश्च गुरुतत्पत्न्यः श्रीमत्कालीकुलोदिताः।
अनन्तदेहाः क्रीडन्त्यस्तैस्तैर्देहैरशङ्कितैः॥
प्रबोधिततदिच्छाके तज्जं कौलं प्रकाशते।'

इति। गोचर्यस्तु गोशब्दवाच्यपशुहृदयसाराहरणरताः तेनैव क्रमेण स्वात्मनः, पशूनां च तत्तत्सिद्धिसाधनप्रवणा एकजन्मनः प्रभृति सप्तजन्मान्तमपि पशुमाहरन्त्यः। दिक्चर्यस्तु भ्रान्तचक्रवत् सर्वत्र चरन्त्यः परापरसिद्धिप्रवणाः। भूचर्यस्तु स्वस्वभावतयैव कुङ्कुमनारिकेलादिवत् तत्तत्पीतादिभूमिजाताः पूर्णत्वापूर्णत्वादिनानाभेदितत्तद्देवतांशकोद्भूताः।

अपि च शक्तिचक्रस्य आगमसंप्रदायप्रसिद्धनानादेवतापरमार्थस्य रागद्वेषक्रोधविकल्पादिप्रत्ययग्रामस्य, तथा देहाश्रिततत्तद्देवतापरमार्थनाना-धात्वादिगणस्य, यो विभवः तत्तदुपनिषत्सिद्धः प्रभावविशेषः, मायामूढान् प्रति बन्धहेतुत्वं च, तस्य उभयस्यापि प्रभवम्। तदेतत् उपदेक्ष्यति

'गुणादिस्पन्दनिष्यन्दाः सामान्यस्पन्दसंश्रयात्' (१।१९)

इत्यादि।

.... .... .... .... .... .... .... संसारवर्त्मनि' (१।२०)

इत्यन्तम्। तथा

'सेयं क्रियात्मिका शक्तिः शिवस्य .... .... .... (३।१६)

इत्यादि। अन्यत्रापि आगमेषूक्तम्

'कुलसारमजानन्तो ह्यद्वये निपतन्ति ये ।
स्वचित्तोत्थविकल्पान्धा निरये निपतन्ति ते ॥'

इति । तथा

'येन येन निबध्यन्ते जन्तवो रौद्रकर्मणा ।
सोपायेन तु तेनैव मुच्यन्ते भवबन्धनात् ॥'

इति । एवंप्रायं च व्याख्यानं नानागमसंवादितमस्ति, ग्रन्थगौरवभयात् तु न लिखितम्, स्वयमेव च परशक्तिपातपवित्रितैः अनुसर्तुं शक्यम् । अन्येषां तु संवादशतैरपि प्रदर्श्यमानम् इदं वस्तुतत्त्वं निदाघातपतप्तशिलापतितजलबिन्दुवत् न क्षणमपि तिष्ठति इति अलम् ।

अन्यच्च शक्तिचक्रस्य स्वतन्त्राद्वयनिजमहाप्रकाशानुप्रवेशकारिस्वमरीचिनिचयस्य, स्वामोदजृम्भात्मना विभवेन प्रकाशितहृदयसंतोषकारिण्यल्पा दीप्तिः, मितयोगिजनप्रयत्नसाध्यापि अयत्नेन स्वभावावष्टम्भमात्रसिद्धबिन्दुनादादिप्रकाशमयी क्षोभकत्वेन उत्थिता यस्य ज्ञानिजनस्य, तं वयति अनुत्तराद्वयसंवित्तन्तुसंतानितं संपादयति । यत्प्रथयिष्यति

'अतो बिन्दुरतो नादः ........।'

इत्यादि ।

........ ..... क्षोभकत्वेन देहिनः ।' ( ३ । १० )

इत्यन्तम् । एवंविधो यः तं शक्तिचक्रविभवप्रभवं व्याख्यातरूपं शंकरं स्वस्वभावं स्तुमः इति । एवमानेन श्लोकभागेन वर्तमानार्थोपक्षेपगर्भेण विश्वोत्तीर्णो विश्वमयश्च उत्तमाकुलत्रिकाद्याम्नायोपदेशदिशा स्वस्वभाव एव शंकरः इति उपपादितम्, न तु वेदान्तवादिवत् 'विश्वं यत्र तदेव ब्रह्म' इत्येवं प्रायं,

'नाभावो भाव्यतामेति ... ...... ... .......... ।' ( १ । १२ )

इत्यादिना

'न त्वेवं स्मर्यमाणत्वं तत्तत्त्वं प्रतिपद्यते ।' ( १ । १३ )

इत्यन्तेन निषेधात् । नापि सिद्धान्तदृष्टिवत् विश्वोत्तीर्णमेव परं तत्त्वम् इत्येवंरूपम्,

'तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।' ( १ । १७ )

इत्यादिविरुद्धत्वापत्तेः । नापि अप्रकटिताकुलस्वरूपकुलप्रक्रियाशास्त्रवत् विश्वमयमेव पूर्णं रूपम् इत्येवं स्वभावम् ।

'यदा क्षोभः प्रलीयते तदा स्यात्परमं पदम् ।' ( १ । ९ )

इत्याद्यसंगतेः। इति समस्तशास्त्रार्थं वाक्यैकवाक्यतया पर्यालोच्य सर्वदा सर्वासु दशासु दृढशंकरात्मकस्वस्वभावप्रतिपत्त्या अवस्थातव्यम्, न तु अत्र मनागपि अवज्ञा विधेया। अख्यातिनिर्हरणार्थैव तु सर्वदा यत्र आस्थेयः, न तु सा दशाऽस्ति यत्र शिवता न स्फुरति इति उपदिष्टं भवति। यदादिष्टं परमेष्ठिना श्रीस्वच्छन्दादिशास्त्रेषु

'यत्र यत्र निलीयेत मनस्तत्रैव भावयेत्।
चलित्वा यास्यति कुत्र सर्वं शिवमयं यतः॥'

इति। इहापि वक्ष्यति

'न सावस्था न यः शिवः' (२।४)

इत्यादि। अस्ति च शिवसूत्रम्

'सकृद्विभातोऽयमात्मा पूर्णोऽस्य न क्वापि अप्रकाशसंभवः।'

इति। तथा

'चिद्घनमात्मपूर्णं विश्वम्'

इत्यादिना इति। व्याख्यातमिदम् समस्तशास्त्रार्थासूत्रणपरमार्थमतिप्रसन्नगम्भीरमादिसूत्रम्, करोतु सर्वस्य शिवम्॥

शास्त्राब्धेरर्थमात्रं परिमितमयः केऽपि संप्राप्य तुष्टाः
कंचिन्नैवाप्नुवन्ति प्रविततयतनाः पारमस्यापरे तु।
पोप्लूयन्तेऽर्धभागे तृणवदथ परे मज्जनोन्मज्जनाभिः
खिद्यन्तेऽन्ये तु नेतुं निखिलमिदमथाप्यर्थिषूद्वान्तमीशाः॥ १॥
स्मृतिपथजुषि यस्मिन्पाशबन्धप्रबन्धा
झटिति विघटितान्तर्ग्रन्थयो विश्लथन्ते।
स्फुरति च चितिचन्द्रानन्दनिःष्यन्दिधारा-
मृतरसपरिषेकस्तं शिवं संश्रयामः॥ २॥
सर्वत्र प्रतिबोधविद्धमहसो विद्याब्धिशीतद्युते-
र्हेलालोकनकर्ममोचितनतानन्तार्थिसार्थाद्गुरोः।
श्रुत्वा सम्यगिदं प्रभोरभिनवात्स्मृत्वा च किंचिन्मया
क्षेमेणार्थिजनार्थितेन विवृतं श्रीस्पन्दसूत्रं मनाक्॥ ३॥

इति स्पन्दसंदोहः समाप्तः॥

कृतिर्महामाहेश्वराचार्यवर्यश्रीमदभिनवगुप्तपादपद्मोपजीविनो
राजानकक्षेमराजस्य॥

●